परिणामः

(नाटकम्)

श्री चूडानाथभट्टरायः

प्राध्यापकः, राजकीय संस्कृत महाविद्यालयस्य
अध्यक्षः, नेपाल संस्कृत नाटक समितेः
उपसभापतिःसंस्कृत प्रसारिणी समितेः
मन्त्री, संस्कृत विद्यापरिषदः
सञ्चालक सदस्यः नारी विद्यापीठस्य
संपादकः, हिमवत्संस्कृति पत्रिकायाः
Executive Member
of
Nepal Council of Asian Relation.
&
World Affairs.

प्रकाशिका:—
श्रीमती नूतनश्री:
८।३१५ प्यूखाटोल, काठमाडौं, नेपाल ।

[प्रणेतु रेव मुद्राणादिषु कर्मसु
सर्वेऽधिकारा: सुरक्षिता:]

प्रथम संस्करणम् १०००
वि. सं. २०१६
शारदीय घटस्थापना

मूल्यम् { भा. रु. ५।
ने. रु. ६।५०

मुद्रक:—नरेन्द्र यन्त्रालय:
काठमाडौं,
नेपाल ।

प्रा. श्रीमुकुन्दनाथ भट्टराई महोदया

करकमलयोः सादरं सम

-र्पयति-

२०१८।११२६

समर्पयामि

दिवंगतायै पत्न्यै डोरकुमारी देव्यै

स्मृति–पुष्पम्

"कुसुमस्तवकं कथं प्रिये !

वद, नेष्यामि निवापमाल्यताम्"

पुरुष पात्राणि

चन्द्रचूडः
मुरारिः
गिरिशः
सुरेशः
गोपालः
राजपुरुषाः

स्त्री पात्राणि

माया
रमा
इन्दुमती
शम्पा
परिचारिके

भूमिका

शिल्पिनः नहि विदधति पदार्थं, किन्च विशकलयन्ति तत्त्वम्। ततः समाजः सहाय्यमवाप्य समजं समुल्लङ्घ्य शोभते। माल्यस्य मूल्यं पुष्पादप्यधिकं निर्धारयति लोकः। प्रपञ्चयति पुष्पं प्रकृति गुम्फति मालाकारः कुसुमं सुमनायते सहृदयः। उररीकृत्य तादृशीं नीतिं ग्रन्थयति ग्रन्थं ग्रन्थकारः। स्वत्त्वं स्वीकर्तुं स्खलति मतिः, संरभते कल्पना, प्लुष्यति च भावना प्रतारणं न समीहे, जागर्ति प्रबुद्धोऽयं लोकः।

पाण्डुलिपिं विलोक्य, मुद्रणाय प्रोत्साह्य यै र्गुरुभि र्विद्वद्भि सुहृद्भिश्चानुगृहीतोऽस्मि तेभ्यः कृतज्ञतां विज्ञाप्य धन्यवादान् समर्पयामि। प्रियतमया पत्न्या नूतनश्रिया पुस्तकं प्रकाशयित्वा मम प्रणयाङ्कुरः सिक्तोऽस्ति। तस्या उपकृतिं विस्मर्तुं कदापि न शक्नोमि।

अलमनल्प जल्पनेन, मौलिकता निरवद्या नवा चात्रतु भवन्त एव प्रमाणम्।

सत्यमाह महाकविः—

"आपरितोषाद्विदुषां नसाधु मन्ये प्रयोग विज्ञानम्।
बलवदपि शिक्षिताना मात्मन्यप्रत्ययं चेतः॥"

विधेयः—

चूडानाथ भट्टरायः

सहायक ग्रन्थ नामानि

१ दशोपनिषदः	२ भगवद् गीता
३ शारीरिक भाष्यम् (भामतीसहितम्)	४ शावर भाष्यम्
५ वात्स्यायन भाष्यम्	६ प्रशस्तपाद भाष्यम्
७ सांख्य प्रवचन भाष्यम्	८ सांख्य तत्वकौमुदी
६ योग भाष्यम्	१० तन्त्रवार्तिकम्
११ श्लोक वार्तिकम्	१२ सर्वदर्शन संग्रहः
१३ तत्त्वसंग्रहः	१४ सूक्तिसंग्रहः
१५ नाटक संग्रहः	१६ अभिज्ञान शाकुन्तलम्
१७ रघुवंशम्	१८ किरातार्जुनीयम्
१६ नैषध चरितम्	२० हर्ष चरितम्
२१ कादम्बरी	२२ सुभाषितरत्न भाण्डागारः
२३ समाज वादकी रूपरेखा (अमरनारायण अग्रवाल एम. ए.)	२४ साम्राज्यवाद क्या है कैसे फैला (मुकुन्दीलाल श्रीवास्तव)
२५ मार्क्सवाद (यशपाल)	२६ मानव समाज (राहुल सांस्कृत्यायन)
२४ पाश्चात्य दर्शनोका इतिहास (गुलावराय एम. ए.)	२८ काश्यप संहिता

किञ्च, येभ्यः समुद्धृतानि वाक्यान्यपि यथास्थानं प्रयुक्तानि विद्यन्ते।

नान्दी

ज्वलिते चैतन्यदीपे, उदिते मधुरप्रकाशे
संसारसारभूते, स्फुरितसत्यविकासे।
मधुविषयमयि हे स्वर्गीयनादमयि रे
आगच्छ देवि, वरदे जीवनतत्त्वविहारे ॥

वीणाक्वणनप्रवृत्ते भावप्रकटितनृत्ये
कोकिलालापगीते सत्यसौन्दर्यपोते ।
मधुरलास्यमयि हे स्वरसारमयि रे
आयाहि देवि वरदे ललितकलाकलिते ॥

विश्ववैभवभूते शिवसंकल्पगीते
प्रणयसमुल्लसिते स्नेहसमुज्वलिते।
प्रेमरहस्यमयि हे स्वप्नसंसारमयि रे
आगच्छ देवि वरदे चितिसर्वस्वसारे ॥

(नान्द्यन्ते सूत्रधारः)

सूत्रधारः- (*नाट्येन प्रविशति*)

आनन्दोद्भवेन नृत्यन्ति प्राणिन इति श्रीमद्भि र्विदितप्राये नाख्येयमस्ति नः किञ्चित्। संसार एव दुःखान्त इत्यत्रापि नपराकरोति प्रतीतिः। स्वर्ग्य कल्पनया संयोगान्तस्य, नारकीय भावनया वियोगान्तस्य स्वरूपं गवेषयन्ति तज्ज्ञाः। द्वावेव सिद्धान्तौ रसोद्रेकमुद्घाटयतः। भवतु।

नटी (*ससंभ्रमं प्रविश्य*) सज्जीभूताःसर्वे। आज्ञापयत्वार्यपुत्रः।

सूत्रधारः- (*निरूप्य*) आम्, कवेः सर्वदर्शनाचार्यस्य चूडानाथ भट्टरायस्य परिणामनामधेयं नाटकं प्रस्तूयते।

नटी- आर्यपुत्र, (*सवितर्कम्*) कवेः दुखान्तनाटकनिर्माणसाहसं सभाजयितुं विप्रतिपद्ये।

सूत्रधारः- प्रिये, सत्यम्, नवीनवर्त्मना गतः स कविः वेलयति परिस्थितिः परिणामम्। दृश्यकाव्ये कलयति कविः कालकलनाम्।

(*नेपथ्ये कलकलः*)

नटी पर्याप्तमिव मन्ये प्रतीक्ष्येषु। निरूपयन्तु रूपके। (*अञ्जलिं बध्वा*) संभावयावो गन्तुम।

(*निष्क्रान्तौ*)

(*दृग्गोचरी भवति ततः पूर्वार्धविरसृष्ट तल्पश्चन्द्रचूडः*)

चन्द्रचूडः (*स्वगतम्*) किंकवलयति मां कालः? किञ्च सर्वज्ञस्या—

प्ययमविषयः। परिचरति रमा नक्तंदिवं, किं नाहं शक्नुयां प्रत्युपकर्तुम्।

बलादत्रानीतोऽस्मि मुरारिणा। अन्यदभीप्सितमापतितमन्यत्।

(अनुशेते)

(रमा हस्ते कटोरीं गृहीत्वा कपाटमुद्घाट्य प्रविशति)

रमा (परिक्रम्य) अवामि, प्रागिति मण्डपकत्वानीतं विद्यते पिब।

(कटोरीं समर्पयति)

चन्द्रचूडः (सनिर्वेदं निःश्वस्य) धिक्कष्टम्। सहसे क्लेशम्। आयुष्मति, कदर्थयामि त्वामनवरतम्। दुरतिक्रमणीया परिस्थितेः परवशता, नास्ति बुभुक्षा नानुमन्ये पातुम्।

रमा (सस्मितम्) आर्य, क्षुधाभावेऽपि पथ्यं पातव्यम्। अन्नमया हि प्राणाः।

(चन्द्रचूडः कटोरीं गृहीत्वा पेपीयते पीत्वा च वमति)

चन्द्रचूडः (निःश्वस्य) निर्विद्यसे बाले, म्लायति मे स्वान्तम्, क्लिद्यति ते स्वातन्त्र्यम्। रूक्षयति मे गर्वं सिद्धान्तः गर्हयति च ते परिसर्या उन्नायम्।

रमा किमर्थं मन्यदेव निर्व्वर्ण्णयसि, सत्येन शपे सेवासुखमार्द्रयति मे मानसम्। नहि विश्वसिषि, मयि ?

(अश्रूणि विसजति)

चन्द्रचूडः- ईदृशेषु प्रतारयति यतीनामपि मतिः। सुभगे! सतां प्रियं वदता कुलविद्या। अन्यदेव श्रुतं श्रीमत्या, मागाः विषादम्। शीतंबाधते, किंस्विद् ज्वरः प्रतिनिवृत्त इव, प्रावारय माम्।

रमा रुजोऽत्यक्तोऽसि इत्यभाषत वैद्यः। विमनायत इवार्य, ज्वरोद्गमः पुनः शिथिलयति वा शरीरम्।

चन्द्रचूडः (मुखंप्रावृणोति) स्विद्यामि।

(रमा मार्जनीं गहीत्वा कोष्ठं संमार्जयति,)

रमा (शनैः शनैः प्रचलति) (आत्मगतम्) न ज्ञायतेस्य महोद्यमस्य रहस्यम्। स्मरति वा स्मृतिकणं गृहम्। अथवाऽतिदुर्धरो बान्धवप्रणयः सर्वप्रमाथी।

चन्द्रचूडः- व्याहरामि त्वामोदनपाकाय।

रमा (सस्पृहम्) क्षुध्यति भवान्, समाप्तप्रायमिदम्। ज्वरो द्वेगोऽपगात इति विभावयामि।

चन्द्रचूड: (प्रावरणं परिहृत्य सस्मितम्) मनसास्निह्यति, पुनश्चान्यदेवं वेवेक्ति चात्रभवती। अतिवात्सल्यनिघ्नाऽसि।

रमा आर्यपुत्रस्यकृते नुदसि। बुद्धं सर्वम्। अकाले ऋपितमोदनं नहि स्वादुतरंभवति। प्रतीक्षणं प्रतिक्षणं मिमीते। (सखेदम्) गच्छानि। तिक्तापरिचर्या परितापयति तव चित्तम्।

चन्द्रचूडः (सान्त्वयित्वा) सुधारसं समुद्गिरन्तींभारती मार्कण्यंको-नाम विमनायेत । क्षुधितंमे मानसं तर्पयति तव मर्यादा, आसादयामि तव प्रेरणायां पवित्रं प्रणयम् । वैल-क्षण्यमिदमार्याया दृष्टं मया । स्वर्गादेवावतीर्णासि स्वप्रक्रियया मर्त्यमण्डलमपि नन्दनं विधातुं देवि!

रमा (सलज्जम्) नाहंस्पृहयामि तादृशीं स्तुतिं त्वत्तः ।

चन्द्रचूडः तस्मादेवोक्तं मया वैलक्षण्यमिदमार्याया दृष्टमिति । कीर्तिकीर्तनात् सङ्कुचति हृदयकमलं तवेति प्रत्येमि ।

रमा स्वयमेव कलयति स्वप्रश्नोत्तारं हृदये, इदमपि वैल-क्षण्यं भवतः ।

चन्द्रचूडः (सहासम्) भिन्नस्वभावं सर्वस्वलक्षणमिति विमृशामि । अकारणद्वेषपराः विद्यन्ते बहवः ।

रमा अतत्त्वदर्शिन्योहि भवन्त्यविदग्धानां धियः । शत्रवो मित्राणि च भवन्त्येव सर्वेषाम् ।

चन्द्रचूडः अन्येषां व्यवहारेण जायन्ते ।

रमा (सस्मितम्) आम् । सोदर्या भगिनी संजाता तव व्यवहारेणैवेति स्वात्मानं संभावयामि ।

चन्द्रचूडः (स्वीकृत्य) बाढम् । समुचितमेवाथवा स्नेहस्येदम् ।

रमा भगिनीभवने भ्राता सन्तप्त इव, व्याकुल इव उदासीन इव किमर्थं भवति ?।

चन्द्रचूडः (विहस्य) कलुषितचित्तेनेक्षसे त्वम्।

रमा कथमिव, लोक एवैतदामन्त्रयति ।

चन्द्रचूडः (सोद्वेगम्) प्रख्यातैव जनश्रुते र्दुर्निवारता ।

रमा भ्रातः, व्यावृणु विवक्षितम्। हृदयस्याधिना कालकूटाक्षपतनशवलमिवशरीरं विभर्षि ।

चन्द्रचूडः जगति वसतो व्यलीयन्त मे मनोरथाः (निःश्वस्य) ननिरूपयामि संसारस्य स्वरूपम्। नाहं व्याख्यास्यामि इतः परम्।

रमा न मां प्रत्येषि, प्रत्याययामि कथं त्वां लोके लौहेभ्यः कठिनतरा खलु स्नेहमयाः बन्धनपाशाः ।

चन्द्रचूडः (सस्नेहम्) अवैमि वत्से ! सर्वम् ! चिरंपरीक्षितासि नहि दुःखोनल स्त्वां दंदह्यते । हाटकमिव कान्तिमावहसि वन्हौ पतिता, तृणमिव नर्भविष्यसि भष्मसात् ।।

रमा (सास्रम्) देहिनोहि विषयः शुचामिति सन्दानयति दर्शनम् ।

चन्द्रचूडः (सखेदम्) वासु, दुःखदग्धानां भूतिरमंगला चाप्रशस्ताच निरूपयोगा च निष्पद्यते हृदयस्थं कालकूटं वमितुं नाहमुत्सहे ।

रमा हालाहलं शिवो न वमति, एषानुकम्पा, वा निष्ठुरता वा ।

चन्द्रचूडः आयतिरुत्तरयति। ।

रमा (सविषादम्) अन्तरयति चात्रभावान सदाधिहेतुम्। सहजस्नेहपाशग्रन्थिबन्धनाश्च बान्धवभूता दुस्त्यज्ञा जन्मभूमयः। सन्दीपयति चित्तं चिन्ता, ज्वलयति च चिता हृत्पिण्डम्।

चन्द्रचूडः (विहस्य) अपहरति सेवा सर्वस्वम्। नावबुध्यसे वत्से ! गृहवुद्धिं बध्नामि तवान्तिके। नपुनरेवं प्रवर्तितव्यम्।

रमा (सभयम्) प्रसीदत्वार्यः। क्षमासारा हि साधवः। (स्वगतम्) क्षणादेव ममात्रस्थितिं नानुमन्यते। भवतु। तावदन्यदेव पृच्छामि। (सलज्जम्) वहुकालादारभ्य प्रष्टुकामा ऽसम्।

चन्द्रचूडः भण भद्रे यथेच्छम्।

रमा आर्यपुत्रस्यायतिः कीदृशी समागमिष्यति।

चन्द्रचूडः नाहं त्रिकालदर्शी। किञ्च, याथार्थ्येन नायं परिचितो जनः। भर्तृहितानुवर्तिनी यथा ते प्रकृतिः नतथा पत्नीसुखानुवर्त्तिनी ते पत्युर्नियतिः।

रमा (सखेदम्) ततस्ततः

चन्द्रचूडः शृणु, सखि !। अरणिरमर्षाग्नेः हृदयं समाजस्य, कुमारः क्रान्तेः सीमान्तदृश्वा परिस्थितेः, प्रमाणं

शास्त्रग्रामस्य वर्तते मुरोरिः । किन्तु व्यवसायात्मिका बुद्धिर्न दृश्यते तस्मिन् ।

रमा किन्तु नासौ वर्तते ऽवसरानुयायी ।

चन्द्रचूडः किञ्चान्तर्द्वन्द्वेन विह्वलीकृतात्मा स सरति, संसारे। कदाचित् नास्तिकरूपं कदाऽऽस्तिकस्वरूपं विभर्ति । यदा यं भावं समाश्रयति तदा वज्रेणाप्यविचाल्यो भवति ।

रमा युज्यते ।

चन्द्रचूडः अस्मिन समाजे जनाः नहि सभाजयन्ति तादृशं जनम विवदन्ते सर्वे, विषीदति, सः ।

रमा [*ताम्यता चेतसा*] श्रुतं श्रोतव्यम् ।

चन्द्रचूडः (*स्मृत्वा*) सहस्त्रधेव तव हृदयं भिद्यते किमु ? कल्पना खल्वेषा । परमार्थेन गृहीतमिव, विस्मृतं भवत्या, व्यवदधाति सत्यं कल्पना ।

रमा विदुषस्तव कल्पना साकारीभवति, तव तर्कना स्वरूपं तर्पयति । श्रुत्वेदं मूर्च्छति मे मानसम् ।

चन्द्रचूडः परिहासं सत्यमनुषे मानिनि ! मागाः विषादम् । ज्ञातमधुना त्वमसि भावनामयीव ।

रमा युज्यते । गच्छानि स्वकार्यसमाप्तये ।

(*चन्द्रचूडस्तूष्णीमास्ते, रमा दिशोऽवलोक्य निष्क्रामति*]

चन्द्रचूडः (स्वगतम्) नहि सम्यगध्यवसितम्। सुकुमारे स्त्रीहृदये कुतोऽयं वाग्वज्रप्रहारः। सत्यं, सहस्त्रधेव तस्या विदीर्णं हृदयम्। [निःश्वस्य] भवतु। कथं प्रतारयामि कथमसत्यमपलपामि। यद्वा किमिति स्वायत्ती नकृतो जिह्वा।

[मुरारिः प्रविशति]

मुरारिः [भर्त्सयन्] आश्चर्यम्। प्रावरणेन मुखमाछाद्य विकत्थसे कति। अये, मन्त्रयसे सदैवैकाकी। हठं समाश्रित्य व्यथसे किंवा। किमनेन पुनः पुनर्दैवोपालम्भेन।

चन्द्रचूडः [प्रावरणमपसार्य] अलमतियन्त्रणया। असकृत् व्रणयसि हृदयम्।

मुरारिः [सस्नेहम्] आनेतास्म्यन्यमेव चिकित्सकं श्वः। आयुर्वेदनिष्णातो भवति वैद्य इत्यत्र नानुसन्दधे।

चन्द्रचूडः सपद्येव मेऽप्रोये नाहं दर्शयेयं चिकित्सकाय।

मुरारिः [सेर्ष्यम्] किमिति।

चन्द्रचूडः महासमरे दुर्भिक्षेचाद्यावधि येमृता समुल्लङ्घ्य मारिता एभि र्दुष्टै श्चिकित्सकापसदैः। वर्तन्ते बहून्यन्यानि कारणानि।

मुरारि : [विहस्य] व्याकुरु तानि, यदियुक्तं मन्यसे।

चन्द्रचूडः अथकिम्।

मुरारि : [विचिन्त्य] जाँनलाक महोदयेन शश्वद्विचार्य वैद्यत्वमभ्यस्तमिव त्वमपि तथैव कर्तुमना विभाव्यसे। वैद्यशास्त्रेणैव परीक्षायामनुभवे च साहाय्यं समुत्पाद्य प्राचीनानां विदुषां कल्पनाबाहुल्ये सृष्टीश्वरविषये स विश्वासं नायासीत्।

चन्द्रचूडः [सखेदम्] मित्र, त्वं कदा रसेलमहोदयस्य मतं, कदाचित् कान्टस्य सिद्धान्तमनुसरसि। कदा स्वपक्षं समर्थयसि शङ्कराचार्यस्याद्वैतवादमाश्रित्य, कदा राद्धान्तावसरे हेगेलमर्थयसे। एकदा प्राशंसीः चार्वाकदर्शनम्। विलोक्य त्वामेतादृशं किमहं ब्रूयाम्। किञ्च मनुष्ये सहजं ज्ञानं स्वीकृत्य तच्च बाह्यविषयानुभवगम्यमिति यथा जानलाकः प्रत्येति नाहं तथा।

मुरारि : तात्पर्यमन्यदेवासीत्। शरीरं पणीकृत्य वैद्यत्वमनुसंधातुमिच्छसीव।

चन्द्रचूडः पावकः खल्वेष वचनोपन्यासः।

मुरारि : व्याकुरु स्वयमेव विवक्षितम्। (परिक्रामति

चन्द्रचूडः नच व्याकरणीयोयं विषयः।

मुरारिः (साक्षेपम्) प्राणरक्षणान्नपरं पुण्यं जगति गीयते जनेनेति विमृशन्ति कवयः। तत्तु विवक्षितमपि नहि।

चन्द्रचूड: मित्रोपकरणमात्मा त्वमसि, तस्मादेवाभीप्ससि प्रयासम्।

मुरारि: (साक्षेपम्) भद्र! अभिगमनीयाश्च गुणाः सर्वस्य।

चन्द्रचूडः नाहं विसंवदानि चात्र।

मुरारि: शून्यहृदयेव किमपि ध्यायन्ती सास्त्रा तवसखी मां व्यज्ञापयत्।

चन्द्रचूडः भवतु, किमर्थमनुवप्यते। भवेदत्रापि हेतुः।

मुरारि: मण्डमेव पिवसीति।

चन्द्रचूडः अभिवक्तु भवान्, विषीदति साऽत्रापि।

मुरारि: स्यात्। सदैव शय्यामधिशयितुं त्वमिव नह्याशास्ते लोकः।

चन्द्रचूडः उन्मत्त इवलोकोऽधुना प्रमाद्यति। संभ्रान्तैः सर्वा निर्मूलीकृताः स्वसंस्कृतिः।

मुरारिः (विहस्य) नहि जोषं निषीदति लोकः। परिस्थित्यनुसारेण परिवर्तनं कलयति कालः। फल्गु अपास्य सारं संचिनोति समाजः। तथात्वे यदि संस्कृतिरपचीयते चेत् को व्यवस्यति तां रक्षितुम्। कति

ता अयासिषुः कति वा यास्यन्ति वृथैव किमर्थ मनुतप्यसे ।

चन्द्रचूडः प्रवाहे समायातं किं सर्वं सहर्षं स्वीक्रियते। नाहं मोहं ब्रवीमि, त्वं पिदधासि श्रोत्रम् व्यवदधासि लोचनम् हृदयमप्यपवारयसि ।

मुरारिः (*सहासम्*) आम् ! ज्ञातम् । मुमूर्षसि त्वम् । विज्ञानमन्यथा किमिति जुगुप्ससे ।

चन्द्रचूडः नाहं स्तनंधयः, जानामि समज समाजयो र्भेदो भूद्विज्ञानेनेति । यदि विज्ञानविदो भवेम भेकैकरपातः कालसर्पस्येव नस्यात् ।

मुरारि : किं कथयितुं प्रवर्तसे ?

चन्द्रचूडः आयुर्वेदस्य प्रादुर्भावः प्राथम्येनात्राभूदिति लोकः प्रत्यपद्यत ।

मुरारिः किंतेन, अधुना पाश्चात्याः वैज्ञानिका इत्यत्राप्यस्ति किं संशयः ? ।

चन्द्रचूडः वयमपि व्यवस्यामः, अन्विष्यामः, उपरमामः ।

मुरारि : (*सस्मितम्*) ज्ञातम् , मृत्वा प्रवर्तसे ।

चन्द्रचूडः यदि मर्तुं सन्नद्धाः तर्हि पुनरपि महर्षयः प्रादुर्भवेयुः ।

मुरारिः कियन्तो भारतीयाः पञ्चत्वमागताः ।

चन्द्रचूडः ते तु दासत्वेन नष्टमतयः संभ्रान्ताः समधिरूढाः

चितायाम् । किञ्चाहं मैत्रीये ज्ञात्वैव, पतितामेतादृशीं भावनां समवलम्ब्य नाहं जीवितुमुत्सहे। मृत्युस्तु सदैव साहाय्यार्थं पार्श्ववर्ती विद्येत । जानामि भद्र ! मृत्यु र्भीतंनमुञ्चतीति ।

मुरारिः (*सहासम्*) त्वमद्याप्युपर्यैव प्लवसे । त्यज साहसम्। संकुचितहृदयानले प्लुष्यति विश्वबन्धुता नच तत्र प्लुष्णाति मानवता ।

चन्द्रचूडः (*सभ्रूक्षेपम्*) आर्य ! तूष्णीमास्यताम्। दृष्टं सर्वेषां सर्वदा सर्वत्र चौदार्य्यम् । विश्वशान्तये शस्त्रास्त्राण्युपसंस्कुर्वन्ति ते । किं सैव शान्तेः सरणिः । एटल्याण्टिकप्याक्टनाम्ना स्वकर्तव्यं घोषयद्भिः पाश्चात्यैं दर्शितं स्वस्वरूपम् । अफ्रिकादेशवासिनं प्रतिकृतमौदार्य्यमपि प्रमाणकोटिमवगाहते। प्रत्यक्षेऽपि कोऽनुमाति ! अभिनिविशसे कस्य हेतोः । पुनरपि तच्चरणमेव शरणमित्याश्रयामः । धिग् कष्टम् ।

मुरारिः किं करोषि त्वं ताम्यता चेतसा एकाकी । तेषामेव हस्ते समर्पयति विधिः शक्तिम्। त एव संचालयन्ति विश्वम्

चन्द्रचूडः अज्ञानोपहतविचारतया, आत्मनिर्भरताया अभावात् सर्वे स्पृहयन्ति वैदेशिकसभ्यतायै। भवतु, तानि

दिनानि समायास्यन्ति, यत्र साकारी भवति मे मनो रथः (उपविशति)

मुरारिः महामात्रैः विचारणीये राष्ट्रियेऽस्मिन् विषये कथं प्राप्यते साफल्यमस्माभिः।

चन्द्रचूडः सत्यम। परन्तु परित्यज्यात्मविश्वासं तेषां साहाय्य प्राप्तये क आशास्ते। ते नीवीमन्तः शस्त्रागारात् शस्त्रं प्रसार्य लाभं ग्रहीतुं समराग्नौ राष्ट्रमेव जुह्वति।

मुरारिः अपितु अविनयनिदानतया स्वातन्त्र्यस्य सर्वेषु युवकेषु वर्धत एवाहर्निशमुच्छृङ्खलता, येषां स्कन्धोपरि स्थाप्यते लोकसंचालनभारः।

चन्द्रचूडः क्षन्तव्योऽयमपराधः समय एव लघूकरोति दोषम्। मुक्तोवत्सः क्षणमुत्प्लवते। किमर्थमनुतप्यसे।

मुरारिः कोऽधुना भिषज्यति स्वकर्तव्यं स्मारं स्मारं व्यक्तीकरोतु भवान्। केन अध्यगायि शास्त्रं, निरूपयतु परितः कः खल्वधिजिगांसते। चिकित्सकब्रुवाः धनोपार्जन मेव ध्येयं मन्यमानाः लोकं प्रतार्य प्राणोपरि स्वच्छन्देन प्रत्युत उत्प्लवन्ते।

चन्द्रचूडः (निःश्वस्य) आचार्यो विष्णुगुप्तः स्वकीये कौटिल्यार्थशास्त्रे तान दण्ड्यानाचचक्षे। कस्याग्रे रारटिमि, को व्यवस्यति स्वकर्तव्ये चिकित्सकापसदेनैकेन भागिनेयस्य प्राणाः समपहृताः।

मुरारिः श्रृणु, यदियुक्तं मन्यसे। चन्द्रोदये मिलति सुवर्ण-मित्याचार्यो ऽलेखीत्। किन्त्वधुना नमिलति पारदे सुवर्णं, नकोऽपि तदनु संदधाति किमर्थम्। किञ्च कुत्र चन्द्रोदयस्य शतरूप्यकं मूल्यं कुत्र च दशरूप्यकमिति तथात्वे अव्यवस्थितव्यवस्थया विध्वंसः संजायते। सर्वथा समर्थयामि तव वचनम्। नचार्थवाद-मभ्युपैमि भारते वर्षे चरकसुश्रुतादयो ग्रन्थाः सम्यक् पठ्यन्ते चेदपि पर्याप्त मिव भवति।

चन्द्रचूडः आर्य, किंकथये। कोवान्तरायो हृदयस्य येन सहस्त्र-धा न दलति। विस्मृतम सर्वैः संस्कृतम्। परिचितं ज्ञानं विस्मृत्य लोको नवनवगुणरागी कथं भवेत्।

मुरारिः तांम्यसि सदैवानया दिशा।

चन्द्रचूडः अस्मिन्विषये पूर्वद्यु मायया सार्धं विवाद मकरवम्। सा किल प्रबुद्धेति संभावयामि।

मुरारिः माया, सा तु चिकित्सकस्यैव पुत्री। दास्यति बि० ए० परीक्षामेषमः। अभिन्नहृदया सखी रमायाः सा। द्वयोर्महदन्तरं तथापि तयोः मैत्री प्रशंसनीया।

चन्द्रचूडः आम्। सत्यमाह "व्यतिषजतिपदार्थानान्तरः कोऽपि हेतुर्नखलु बहिरूपाधीन्प्रीतयः संश्रयन्ते"।

मुरारिः किमाह माया, व्याकुरू सर्वम्।

चन्द्रचूडः "बहुव्ययसाध्या सरणि र्विद्यते पाश्चात्यचिकित्सकानां तामनुगन्तुं निर्धना नशक्नुमो वय" मित्याह सो ।

मुरारिः ग्राम्यै र्बह्व्योविद्यन्ते ज्ञाता ओषध्यः, ते न प्रख्यापयन्ति न चोद्गिरन्ति तथैवोपरमन्ति पश्चात् ।

चन्द्रचूडः सखे, सर्वमज्ञानं वेवेष्टि । ज्ञानस्य ज्योत्स्ना द्रवयति यदा तिमिरं तदोन्मिषति हृदयदलम् । इतो दारिद्र्योपहततया निगिरति क्षुदनलः, दरिद्राणां परिश्रमः श्लिष्यति, यातना युनक्ति, भीतिःपूर्यते विषादो लम्बते दीप्तिस्ताम्यति । अन्यत्र मानो जागर्ति, वेषः स्पर्द्धते हठो भ्राजते संभ्रमो द्योतते,प्रमादो जृम्भते, संतोषः क्षरति । इतस्ततः समाजे महतोमेतादृशीं विभिन्नतां धनिक निर्धनेषु दर्शं दर्शं कस्य सहृदयस्य हृदयं न व्यथते । (*तूष्णीं सास्त्रमास्ते*)

(*कपाटमुद्घाट्य प्रविशति माया*)

मुरारि : (*सस्मितम्*) माये ! जीवसि चिरकालम् ।

माया (*दूरादेवावनतेन मूर्ध्ना प्रणमति*) वन्दे वाम् ।

चन्द्रचूडः आयुष्मती भव ।

मुरारि : चिरं जीव ।

माया भस्त्रेव श्वसिमि । सखी कुत्र विद्यते ।

मुरारिः नजाने । मुहूर्तमत्रापि स्थातुं शक्यते । इदमासनमास्यताम् ।

माया (सस्मितम्) परिहससि। (चन्द्रचूडं प्रति) किमिति जोषमास्यते ।

चन्द्रचूडः विमृशामि कया रीत्या आह्वय इति । वत्से, इत्यतिप्रणयः, मातः इति चाटुः, भगिनि इत्यात्मसंभावना, भद्रे इतीतरस्त्रीसमुचितम्, बाले इत्यगौरवोपेतम्, सुन्दरि इति प्रणयपरिचयः आर्ये इति जरारोपणम् भवति इति सर्वसाधारणम् ।

माया स्वकीयोऽयं जन इति प्रत्याययामि कथम्। अलमति विमर्षेण। यदास्माकं विवादः समजनि तदारभ्य मन्ये वज्रपरमाणुभिरिव निर्मितं भवन्तम्।

चन्द्रचूडः वासु, अलमतिशयोक्त्या ।

माया सत्यं भणामि । वेश्मविश्वासस्यासि । पुण्यवन्ति पुण्यान्यपि तानि येषामसि परिणामः ।

मुरारिः त्वमेव वेत्सि ।

चन्द्रचूडः कुलकुमारि, प्रेरयत्युदन्तश्रवणकुतूहलिनी श्रोत्रवृत्तिः ।

माया आर्यः मामवधीरयति । अहमस्मि सामान्या नारी । सामान्यमनांस्यप्याकर्षन्ति महतां गुणाः ।

चन्द्रचूडः सखि, किमर्थं किमिति वा विस्रम्भसे न मयि, शपथे-

–नापि निवार्यते कुत्र कस्तूरिकोमोदः? कुत्र गत्वो पठ्यते एम्. ए.?।

मुरारि : परीक्षायामुत्तीर्य किमाभिर्दिश्यते।

माया न नार्यः चिकृक्षन्ति हलम् [*विहसति*]।

चन्द्रचूडः तथास्त्वे, अधिकरणस्थानात् गलहस्तयन्ति पुरुषवर्गम्।

मुरारि : (*विहस्य*) पुरुषयितुं वाञ्छति। स्त्रीयोगार्थे तिपाठं-संशोधनमभीप्सामः। भवतु।

माया [*सावज्ञम्*] विचारणीयेऽस्मिन् विषये परिहासं नाहं समीचीनं मन्ये। इमां दुरवस्थां विलोक्य विहसन्ति विद्वांसः। महत्करुणं वर्तते। दृष्ट्वा चेत्थं सहस्रेव स्फुटति हृदयम्।

चन्द्रचूडः सत्यमाह भवती, महत्करुणं विद्यते!

माया नराणां नार्य एव जनन्यः, भवद्भिरेव समुद्धरणीया वयम्। अभ्युपपद्यतां समुचितैः प्रवन्धैः। नियन्त्र्य मातृजातिं नह्यासादितं केनापि राष्ट्रेण महत्त्वम्।

चन्द्रचूडः विदुषि, कैरपि स्वकर्तव्यमिदमिति न चिन्त्यते, तवेव जिग्लासति हृदयं मे।

मुरारिः समाजमस्माकं कौमृस्य मतानुसारेण प्रथमावस्था-यामेव विद्यत इवावैमि।

मायाः बाढम्। कान्टो मानवेतिहासं तिसृष्ववस्थासु व्यभक्त।

मुरारिः आगष्ट कौम्ट महाशयस्य मतमुक्तं मया । अन्त्यावस्थायां निरीश्वरधर्मं प्रचारयामास यः । परस्परं सौहार्दमवलम्ब्य नियमपूर्वकोन्नतिकरणमेवास्य धर्मस्यासीदुपदेशः ।

माया विवृणोत्वार्यः सर्वम् ।

मुरारिः प्रथमावस्थायां मनुष्याणां पौराणिकबुद्धिमवकलय्य तत्राप्यवान्तरभेदं विभज्य, नीचावस्थायां काष्ठपाषाणादिषु चेतनत्वमारोप्य पूजयन्ति। मध्यमावस्थायां देववाद इति परामृशन्ति । यस्मिन् प्रचण्डदिव्यदेवताः संकल्प्य तारापथे, ताः सर्वज्ञसर्वशक्तिमत्वादि मत्वा समर्चयन्ति । पुनश्चैकेश्वरवाद एवास्य चरमावस्था । तत्पश्चात् दार्शनिकः कालः समायातः । यस्मिन् समस्तज्ञेयं ज्ञानाधीनमिति स्थापयितुं प्रायतिष्ट । तस्य चरमावस्थायामस्माकमद्वैतवादश्चकास्ति । अधुना वैज्ञानिकसमयो जागर्ति चरमावस्थायाम् । परीक्षयातथानुभवेन विना न प्रत्येति कोऽपि । सर्वे प्रयस्यन्ति याथातथ्येन निर्णेतुं वस्तुतत्त्वम् । जेहीयते कल्पना कुतर्कश्च ।

माया युज्यते । ततस्ततः ।

मुरारिः सामाजिक्यावस्था झटिति परिवर्तितुं न शक्यत इति

तस्यासीत् सिद्धान्तः । पुनश्च भद्रे ! युद्धावस्थां विवादावस्थामुद्योगावस्थाञ्च भजन्ति लोकाः । एतासु तिसृष्ववस्थासु वयमधुना विवादावस्थायामेव वर्तामहे ।

चन्द्रचूडः (*सस्मितम्*) पाश्चात्यास्तु प्रतिनिवृत्ता इव युद्धावस्थायाम् ।

मायाः (*सस्मितम्*) यथा भणतु भवान् । लोकस्तु मनुष्यतामेव समालम्बितुं यतते । मनुष्यतैव समाजस्यादर्श इति विमृशामि ।

चन्द्रचूडः (*सविस्मयम्*) कुत्र ?

मुरारिः यत्र किल वैज्ञानिकचरमावस्था प्रभवति तत्र ।

माया (*साक्षेपम्*) स्त्रीशिक्षा न समुचिता किम् ?

मुरारिः अन्यथैव सम्भावयति भवती नाहमित्थं कदाप्यवोचे । भारतीयनार्यो गार्गीप्रभृतयः पण्डिता आसन्नित्यवधारयामि ।

माया सत्यम् । किन्तु दृष्टिकोणादेको विवादो द्वैविध्यं भजते ।

चन्द्रचूडः (*आत्मगतम्*) प्रतिभाशालिनी खल्वेषा । (*प्रकाशम्*) देवि, प्रसीद स्वयमेवोत्तरयतु भवती मे प्रश्नम् ।

माया आर्य, विवादेऽपि को विमनायेत । स्वैरं पृच्छतु । ज्ञात्वा नाहं तूष्णीमासे ।

चन्द्रचूडः समुत्तीर्य परीक्षां किमध्यवस्यति भवती । विमुह्यामि ।

माया सत्यमेव जटिला समस्या। मम विषये पिता किं सङ्गिरते न ज्ञाने।

मुरारिः लिङ्गभेदं परित्यज्य स्कन्धेन स्कन्धं संयोज्य समाजमुन्नतिमार्गे नीयत इति भण विदुषि !

चन्द्रचूडः पाश्चात्यदेशे विषमा समस्या समुत्पन्नेति श्रूयते।

मुरारिः उदूढा वध्वः स्वेददूषितचरणोदकं जोषं न पास्यन्ति। सत्यमवधारय। किमिति खिद्यसे।

माया महत्यां दुरवस्थायां वयं स्मः। स्त्रीणां किं लक्ष्यं तन्निर्धारणीयम्।

मुरारिः कै र्निर्धार्यते।

चन्द्रचूडः (सखेदम्) यदि पण्डितंमन्यैः संस्कृतज्ञै र्लक्ष्यं निर्धार्यते चेत् पातिव्रत्यं पुष्यते, स्वैश्च दुहितृसमा बालिका परिणीयते।

माया सत्यम्। विधवाविवाहो निषिध्यते, गुप्तव्यभिचारो व्यवधीयते।

चन्द्रचूडः यदि पाश्चात्यशिक्षादीक्षितैः परामृश्यते चेत्, स्त्रीस्वातन्त्र्यं राटट्यते युवत्या साकं मैत्री समर्थ्यते। गृहेतु स्वस्त्री देवरेण सार्धं वक्ति चेदपि व्यभिचारशङ्कया ताड्यते। बहुविवाहं खण्डयित्वाऽपि अन्तर्जोषं जोषं परस्त्रीगमनं सानुमोदं स्वीक्रियते।

मुरारिः इष्यते चौदार्यं प्रख्यापयितुं, मनस्यन्यत वचस्यन्यत कर्तुं प्रयत्यते व्हयते मानवता।

माया किमिदं सत्यमाह भवान्।

चन्द्रचूडः अन्यथा संभावयति चेदालोचयत्वार्या परितः, प्रत्यक्षे करिणीदृष्टे न हि चीत्कारेणानुमितेऽनुमातारः।

माया आकर्ण्येदं विदीर्यते मे हृदयम्।

मुरारिः प्रायस्तरुणीषु सौहार्दं कुरुते लोकः।

चन्द्रचूडः फ्रायडस्य मतानुसरेण कामशान्तये संसृज्यते लोकः। (अनुस्मृत्य) सर्वं बाह्याडम्बरमेव मन्ये। तासामार्थिकोन्नतिः कया रीत्या संजायते। स्त्रीशिक्षा सुसंस्कृतिहिता भवति कथमेतानि कैरपि न विचारितानि। नारीभिरेव निर्धारणीयाः स्वविषयाः।

माया का विचारयतु। पञ्चदशवर्षादर्वागेवोपयच्छते। तस्मादेवाहमाबालब्रह्मचारिणी भवितुं प्रयतिष्ये।

चन्द्रचूडः (विहस्य) विवाहस्तु जीवनसंग्रामस्य प्रसाद एव। कत्यनूढाः प्रमदाः पश्चात् प्रेमतुषानले हृदयं श्रपयित्वा स्वलक्ष्यमुलंघयन्ति। एका परिचारिका स्वयौवनहठं स्मरन्ती ममाग्रे व्यलपत्।

मुरारिः अथ किम्।

माया सत्यमभ्यधात् एनोनः तथाहि नभसि नीलनीरदमेव

निचाययति चैकः, तथान्यस्य नयनं सूक्ष्मां रजतरुचि-राभाशाभयीं कादम्बिनोप्रान्तरेखां निध्यायति ।

मुरारिः दिव्यद्युतिवलयिता भव्यदूती ।

माया द्वितीयजनस्येव भवतो दृष्टिः ।

चन्द्रचूडः अलमनेन ।

माया अनेन विवादेन मे हृदयदौर्बल्यमपनीतमिव ।

चन्द्रचूडः विदुषि, गृहगतैरनुगन्तव्या एव लोकवृत्तयः । तथाह मिल्टनः, "ये जल्पन्ति जीवनं न सर्वं पाटलकुसुमतल्पसममिति । किमिति भीयते कण्टकाकीर्णे विकीर्णाःकुसुमाङ्कुराः सदैव चियन्ते ।"

मुरारिः अथ किम् । श्रीकृष्णोऽपि तथैवाब्रवीत्

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् ।
सर्वारम्भाः हि दोषेण धूमेनाग्निरिवावृताः ।। इति'

माया दासीव कृतास्मि स्वगुणगौरवेण ।

मुरारिः भद्रे ! विवादे सत्यस्य विमर्श एव समीचीनः । ब्लाकीस्तथैवाशंसत्– "लक्ष्यं तत्त्वज्ञानाय एव कृत्वा विवादो भातु कदापि विजयैकपरायणस्त्वं माभूरिति ।"

चन्द्रचूडः विवाहादेव स्नेहग्रन्थिं संयोज्य गृहस्थस्य निःसरति सन्ततिः । यां दृष्ट्वा द्रवति हृदयम् । अलोहः खलु संयमनपाशः स्नेहः ।

माया अनुगृहीतास्मि। सत्यं सज्जनमाधुर्याणामभृतदास्यो दशदिशः।

मुरारिः यदि चात्रेन्दुमती स्यात् तदा सा निराचष्टे सर्वम्।

माया अतिशयसुखमनुभवति रमा यादृक् प्रेमबन्धने न तादृक्संतोषमासादयतीन्दुमती।

मुरारिः मदरचितावरणेन तस्या ज्ञानदीप्तिस्तिरोहिता विद्यते। किञ्च "किं किं करोति न निरर्गलतां गता स्त्री"।

माया रमा तदेव सुखं वदति यद् सा दुःखमिति गणयति।

मुरारिः सा सदैव गृहकार्ये निमग्ना वराकी वर्तते। सत्यमाह कविः- "कार्येषु मन्त्री करणेषु दासी, भोज्येषु माता शयनेषु रम्भा। धर्मानुकूला क्षमया धरित्री भार्या च षाड्गुण्यवतीह दुर्लभा॥"

माया बाढम्। रमा चक्रवाकमयीव पतिप्रेम्णि विद्यते।

चन्द्रचूडः स्त्रीचित्तमहो विचित्रम्। स्त्रियो नष्टा ह्यभर्तृका इति श्रूयते। सत्यम्, सुखं तदाऽन्तः पदार्थत्वेन परिगणितम्

माया पेशलं हि सतीमनः, रमामादर्शमहिलां संधारयामि।

(भोजनार्थे रमायाः आव्हानं श्रुत्वा मुरारिः निष्क्रामति), माया च सानुरागं चन्द्रचूडं विलोक्य प्रणम्य च निष्क्रान्ता)

इति प्रथमोऽङ्कः॥

[द्वितीयोऽङ्कः]

(गिरिशस्य वासगृहम्)

गिरिशः (पुस्तकमुद्घाट्य) समाजमुन्नमयितुं गान्धिवादः केवलप्रेरणानुनयविनयादीन् समुचितान् मन्यते। इदं कथं संजायेत। इमर्सनोऽपि भौतिकशक्तितो बलीयसी आध्यात्मिकशक्तिरिति ये पश्यन्ति ते बुधा इति ब्रह्माण्डमेव बुद्धिः शास्तितरामिति दृष्टान्तेनोदाहार्षीत्। (पुस्तकं परित्यज्य लिखति)

(सुरेशस्तदा प्रविशति)

(अग्रतोऽवलोक्य) अयि वयस्य, स्वागतम्। बहोः कालादागतोऽसि। अद्य कस्मात्त्वम्। (आसनं निर्दिश्य) इदमासनमास्यताम्।

सुरेशः (उपसृत्य) पञ्च दिनान्येव व्यतीतानि। उदर-व्याधिना ग्रस्यते शरीरम्।

गिरिशः (प्रसार्य चक्षुषी) ततस्ततः (लिखति ब्रवीति च) "जगत्प्रेरणतृष्णालुः पुमान् स्वयं प्राग् पुरोयातु व्यवस्यतु" इति सुकरातोऽवोदीत्।

सुरेशः अस्मिन् विषये मुरारिणा सार्धं विवादोऽजायत।

गिरिशः (विहस्य) यस्मिन् कस्मिन् विषयेऽपि स्वात्मानं पण्डितं

मन्यते। तेनैव स्वभावेन सदैव विवादः संजायते।

सुरेशः सदैवास्मान् तिरस्करोति। किञ्च, कार्यप्रलोभनादिकमपि व्यर्थमेवेति प्रतिव्याहरत्।

गिरिशः तदा किमुक्तम्।

सुरेशः किं राष्ट्रसेवायाः प्रलोभनाय वितीर्णा शक्तिपदकविशेषाधिकारा निरर्थका एवेति तदावादि मया।

गिरिशः अस्मिन् विषयेऽहमपि संशये। तथाहि सेनापतिः एण्ड्री. ए. ब्लासोवः नाजिहस्ते यदा प्रत्यपद्यत तदा स्वदेशस्थित बन्धुभिः सार्धं योद्धुमयूयुजत् तत्र स्थितांस्तान्।

सुरेशः (*संस्मृत्य*) प्राक् मास्कोनगररक्षायां बहुमानपुरःसरं सोऽलभत पदकम्। ब्लासोवं नियमापवादं सभावयामि।

गिरिशः (*विहस्य*) उपपद्यते। ततस्ततः।

सुरेशः कीदृशोऽयं जनः, कदा सांख्यसिद्धान्तं स्तौति, कदा चार्वाकदर्शनम्। एकदा युक्त्या निरीश्वरवादं सर्वप्राथम्येन संसारे सांख्यमेव प्राणैषीदिति सांख्यमतमस्तावीत्।

गिरिशः मुरारिः सीमान्तदृश्वा दर्शनस्य।

सुरेशः बाढम्। परन्तु सखे! दर्शनशास्त्रमत्यन्तमेव

प्रत्याचष्टे। अस्मादि भारतमनेन, वज्रयानस्य चरमावस्थायां तु व्यदीर्यत।

गिरिशः कथं दर्शनं प्रत्यादिशति, मार्क्सवादेनैधि रूस-देशम्। कुत्र दोषो न विद्यते। पोपैः रोमदेशे क्राइष्ट-स्योदयमूलकः सिद्धान्तः कथमस्मादि। वज्रया-नाचार्यैरेव रासायनिकज्ञानं देशेऽस्मिन्नख्यायि, अपिच कलाश्चैत्यादिषु सुरक्षिता एवाचकासुः। युद्धमपि निरोद्धुं तत्रत्याः प्राभूवन्नाचार्याः।

सुरेशः युज्यते। बौद्धदर्शने स्वातन्त्र्यविचारधारा विद्यते। वहुजनहिताय बहुजनसुखाय च निरगायि। येनैवमोह—"कलिकलुषकृतानि यानि लोके मयि निपतन्तु विमुच्यतां तु लोकः"।

गिरिशः कथमज्ञायि।

सुरेशः मुरारिस्तथैवाभ्यधात्। किञ्च लोकतन्त्रात्मकदिशा संघस्य प्राग् प्रादुर्भावोऽभूत्।

गिरिशः लोकतन्त्रवादिनो विदेशे द्रव्यमिव स्वसिद्धान्तं प्रचारयन्ति।

सुरेशः घटते। तस्मादेव सर्वासु दिक्षु बौद्धधर्मः प्रतियो-गितां विधत्ते। बलादन्यस्कन्धोपरि स्थापित-धर्मभारो न कदापि प्रमोदमुत्पादयति। (द्वावेव धूम्रपानं कुर्वाते) दिवानिशं कं ग्रन्थं लिखति भवान्?।

गिरिशः उद्यतोऽस्मि प्रबन्धमेकं गुम्फितुम्। शक्ष्यामि न वेति मनो दोलायते।

सुरेशः सत्यम्। विदुषामापरितोषाद् न प्रीणाति हृदयम्।

गिरिशः समाप्य सर्वं संशोधनाय दास्यामीन्दुमत्यै, सैव परिपूर्णतां विधास्यति। भद्र! पाण्डुलिपिरेषा, प्रतिलिपिं सैव करिष्यति।

सुरेशः युज्यते, सा सर्वं विविनक्ति। सत्यपर्यवेक्षिकया तया सह वादे प्रसादयति चेतः। सर्वगुणसम्पन्ना तादृसी सुन्दरी विदुषी न मया दृष्टा।

गिरिशः ओम्। तस्याः सखी मायापि प्रगल्भा, प्रबुद्धा पण्डिता चेत्यवैमि। पित्रा पाठिता सा। चिकित्सकस्तस्य पिता स्त्रीशिक्षामुन्नेतुमारिप्सते। विरला एव विद्यन्तेऽत्र पुत्रपुत्रीषु समानव्यवहारिणः। *(पत्रं लेखनीञ्च स्वस्थाने स्थापयति)*

सुरेशः मायायाः लावण्यं विद्यते न सौन्दर्य्यम्। स्त्री विनश्यति रूपेणेति सत्यमिव प्रतिभाति।

गिरिशः सत्यं भण, शम्पामाययोर्मध्ये कतरा सुन्दरी।

सुरेशः सर्वांगसुन्दरीन्दुमती तव भंगिनी विद्यते। शम्पाऽपि न न्यूना, शम्पायाः सौन्दर्य्यं प्रकृतिप्रदत्तं सा ज्योत्स्नेव यौवनचन्द्रोदयस्य। किन्तु मुग्धा सा तरलतारुण्यस्वभावा सौदामिनीव चञ्चला।

कृत्रिमसौन्दर्येण मायापि रसायनमिव यौवनस्य प्रतिभाति। सा धीरा गम्भीरा प्रवीरा च।

गिरिशः श्रृङ्गाररसेन प्लावयन्ती जीवलोकमिव संभावयामि। शम्पा द्वादशवर्षायामेव विधवा संजाता। तस्मात् तद्रूपं मधुमिवमनास्वादितरसम्।

सुरेशः सत्यम् "स्त्रीष्वनर्गलचेष्टासु कस्येच्छा नोपजायते"

गिरिशः तस्याः सुतारा दृष्टिः, सकामाः कटाक्षाः, सुकुमाराश्चरणपाणिपल्लवाः, सुधाकान्ति स्मितम्, अरुणो दन्तच्छदः, भास्वन्तो दन्ताः, सुकृष्णाः केशाः, प्रमुग्धा वाणी, गौरी कान्तिः, गुरुः स्तनाभोगः, पृथ्वी ज़घनस्थली, सुरभिर्निश्वासः, सुगन्धवाहः प्रस्वेदः, सश्रीकः सकलाङ्गभोगश्च। दीप्यते शम्पा सर्गसमाप्तिरिव सौन्दर्य्यस्य। मायापि कुमारी किन्तु... ... ...

सुरेशः किन्तु परीक्षापिशाची तामहर्निशं निगिरति। चिन्ता च श्रयति सदा, सा विचारनिमग्ना ताम्यति, परामृशति, वितर्कयति, निमिषति, विचिकित्सति, अध्यवस्यति च।

गिरिशः परीक्षापिशाचीग्रस्ताऽपि मदिरामयीव विलासेषु काचन जायते। श्रृणु, सकृदहमगमं प्रयागम्। अवत्सं तत्रैव कस्मिन् वासगृहे। अनवद्या सुन्दरी गृहपतेस्तनयासीत्तत्र। किं वर्णयामि तस्य रूपम्।

सत्यमाह कविः—

दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनी स्तास्तुवे वामलोचनाः ॥

सुरेशः (विहस्य) कालिदासस्य शकुन्तलेव सापि सृष्टिराद्येव धातुर्भवेत् ।

गिरिशः (सानुरागम्) स्मरिष्यति भवान्, यदा वां वनविहाराय गतावभूतां तदा कश्चन गायति स्म

"श्रुतं दृष्टं स्पृष्टं स्मृतमपि नृणां ह्लादजननं
न रत्नं स्त्रीभ्योऽन्यत्क्वचिदपि कृतं लोकपतिना" ॥

सुरेशः सत्यं स न्यवोविदत । ततस्ततः ।

गिरिशः मित्र, साप्तपदीनं सख्यमुत्पन्नं कतिपयप्रियालापा प्रीतिरिति कल्पते सर्वो जनः ।

... ...

सुरेशः (सस्मितम्) यस्मिन्नापणे भोजनागारे वासगृहे चोन्मिषति सुन्दरीवदनारविन्दं तदेवावृण्वन्ति मधुव्रताः । आधुनिकी वाणिज्यपरिपाटी चैतादृशी संजाता हस्तगतं किन्नु मूलकोषमेव लावण्यस्य ? सत्यम् । रतिवल्लभो भूतलं पर्यङ्कीयति ।

गिरिशः नहि त्वयाबोधि । नानेकपुरुषव्रणिताधरा सा वाराङ्गना ।

सुरेशः ज्ञातम् । युज्यते, सावित्रीतुल्या सा सती ।

गिरिशः मामुपहससि । भवतु, न वदामि किमप्यतःपरम् ।

सुरेशः प्रसीदतु । न पुनरेवमभिधास्ये।

गिरिशः मदिरा, तारुण्यं, धनं, मन्मथः रूपाभिमानः, गर्वश्च किमुत्पादयति जानीषे ?

सुरेशः सर्वजनप्रसिद्धमेतत् । मदयति मदिरा, तरलयति तारुण्यं, अन्धयति धनम्, उत्पथयति मन्मथः, विरूपयति रूपाभिमानः, खर्वयति गर्व इति ।

गिरिशः नहि सम्यगध्यवसितं त्वया, शृणु तर्पयति मदिरा, तोषयति तारुण्यम, प्रसादयति धनम्, निर्व्वापयति मन्मथः, प्रियाकरोति रूपाभिमानः, आवर्ज्जयति गर्व इतिपाठं पाठ ।

सुरेशः तदेवं स्वीकृतं भवता।

गिरिशः (सस्मितम्) बाढम् । मदिरामाकण्ठं पीत्वा; प्रियां तां समाश्लिष्य... ...

(*अर्धोक्ते विरमति*)

सुरेशः किं प्रसह्य ।

गिरिशः (*भर्त्सयन्*) किममृते च विषाङ्कुरः सम्भवति । एकत्रैव लम्बिता वासना रचयति चितां कथमहं तां कामये यदि सा न कांक्षेत् । प्रणय एव द्वयो रैक्यं करोति । हृदयं वशीकृत्य प्रयुज्यते प्रणयप्रयोगः ।

सुरेशः जाने । ततस्ततः ।

गिरिशः पश्चात्तु नक्तंदिवं मत्कोष्ठे समागत्य चादेवीत् ।

सुरेशः अधुना सा त्वद्वियोगे कथं प्रणान् विभ्रीत ?

गिरिशः तस्याः पित्रा सर्वं विज्ञाय लोकापवादभिया प्रत्याख्यायि त्यक्त्वा तत्स्थानं भवनेऽन्यस्मिन्नेवावात्सं। तत्रापि सा समागत्यारंस्त पितरं प्रातारयच्च । अनुभूतं मया "मनोरथानामगति र्न विद्यते" इति ।

सुरेशः स्थाने तव प्रणयः प्रीयते। प्रीतेः कारणं प्रस्तौतु ।

सुरेशः विस्मृतं पुनरपि त्वया, मदिरा तारुण्यं धनं मन्मथः रूपभिमानश्च किं किं न साधयति। शृणु, सोपानात् प्रच्युतां तां समाश्लिष्य समदीधरम्। ततः प्रभृति संबन्ध आश्लिक्षत्। अथवा भवितव्यतायाः द्वाराणि भवन्ति सर्वत्र ।

सुरेशः युज्यते, स्त्रीणां हृदयमुपेक्ष्य निशङ्कं परिहसितुं कः शक्नोति ?।

गिरिश कथमिव ।

सुरेशः एकदा महाविद्यालयाद् ग्रामनिरीक्षणार्थं ग्रामे केचन छात्रा गता आसन्। तन्मध्येऽहमप्यासम्। इतस्ततो भ्रमतो मम नयनगोचरीभूता ग्राम्यबाला, या किल धारायन्त्रे जलमानेतुं तन्मार्गेण गतासीत्। प्रसह्य तां प्रेतुं पित्से। पुनः पुनर्विनिन्द्य मामोक्रोसत् विक्रोशन्ती साऽशपत्।

गिरिशः (विहस्य) प्रसह्य तस्याः कुचकुड्मलं नामार्क्षीत् किमु ?

सुरेशः किं कथये सखे ! तदा शून्यत्वेनाकाशमप्यतिशयानो-नाविन्दं कर्तव्यम्। ज्ञातं तदारभ्य प्रीत्या हृदयं ह्रियते न तु प्रसह्य।

गिरिशः सत्यम्, "के वा न स्युः परिभवपदं निस्फलारम्भयत्नाः"। कति हायना सासीत्।

सरेशः षोडशवर्षा भवेत्। रमायाः सदृश्याकृतिरासीत्।

गिरिशः हृदयमपि भण।

सुरेशः (विचिन्त्य) रमाचन्द्रचूडयो र्बधमानं प्रेमालोक्य, साहचर्यं चाभीक्ष्णं वीक्ष्य कथमहं निश्चिनोमि, तयोः मनसि कलुषितभावनो नोन्मिषतीति।

गिरिशः भद्र ! दृढप्रतिज्ञश्चन्द्रचूड इति तर्कयामि। य आसन्न-मरणावस्थायामपि नात्याक्षीत् स्वसिद्धान्तम्। किञ्चान्तराले विद्यते पति मुरारिः,पतिरेव विश्वसिति चेत् कथमन्यथा वयं संभावयामः। सा सती स्यात्। संबन्धस्तु तयो र्भ्रातृभगिन्योरिव स्यात्।

सुरेशः (आत्मगतम्) सोदर्य्ययोः भ्रातृभगिन्यो र्युवयोः चारित्र्यं सर्वं शश्वत् पश्यामि। मिमर्दिषति भगिन्याः स्तनं, चुचुम्बिषति कपोलञ्चैकान्ते। तौ तु न सोदर्य्यौ न च संबन्धिनौ (प्रकाशम्) कथं कल्पते युवकयोः भ्रातृभगि-न्योरिवैष संबन्धः।

गिरिशः मित्र, न धर्मवृद्धेषु वयः समीक्ष्यते ।

सुरेशः मुरारिरिव निमील्याक्षिणी नाहं प्रत्येमि सर्वम् । मम हृदयं शङ्कते । कर्तव्याकर्तव्यं विभक्तुं महर्षयो नाशकन् सुन्दरीणां समक्षे ।

गिरिशः परन्तु, स्निग्धमुग्धां हि सत्स्त्रिय इति श्रूयते ।

सुरेशः सत्यम्, स्वभावस्वच्छानां पतनमपि भाग्यं हि भवति । भवतु ।

(मायेन्दुमत्यौ प्रविशतः)

गिरिशः (सस्मितम्) सखि, अद्य कस्मात् । वयमपि स्मः स्मृतिपथे । इन्दुमति, कुतः संगृह्यानयस्येनाम् ।

इन्दुमती आमन्त्रितास्मि ।

सुरेशः कस्य हेतोः ?

इन्दुमती परीक्षोत्तीर्णोपलक्ष्ये विनोदयितुम् (मन्दं परिक्रम्योपविशतः)

सरेशः के के निमन्त्रिताः ? वयं किमर्थं विस्मृताः ? युज्यते, यो यस्य हृदये नास्ति समीपस्थोऽपि दूरगः ।

इन्दुमती सन्धुक्षयति वक्रो वचनोपन्यासः । नाह्वायि गिरिशोऽपि मया, भ्रातः प्रसीदतु । भवांस्तु परिवारमध्ये पतति ।

माया (सोपहासम्) आवाहनं प्रतिमाया भवति किमिदं विस्मृतम् ।

गिरिशः (विहस्य) निमन्त्रणं न ह्येतत् श्राद्धस्य। अधुनैवा मन्त्रय वत्से !

इन्दुमती सदैवोपहसति भवान्, यद्यन्यदेवाधिगच्छेत् ।

माया हला, मैत्री च किं कार्यव्यपेक्षिणी भवति।

सुरेशः इन्दुमति, तेऽवैमि मयि सोदर्यप्रणयम् । वयमामन्त्रयितारः। भवतु, के के आमन्त्रिताः। मुरारिणा विना सभायाः शोभैव मुद्रिता भवति।

इन्दु आमन्त्रितोऽस्ति सः।

गिरिशः गोपालमपि समानय इति तमवोचम् ।

माया (*स्वगतम्*) नाहूतश्चात्र चन्द्रचूडः। (*प्रकाशम्*) ये पार्श्ववर्तिनस्त एवामन्त्रिता भवन्ति प्रायशः।

इन्दुमती रुजा परिभूत इति विमृश्य चन्द्रचूडो नाहूतः ।

माया स्वस्थशरीरः संजातः।

सुरेशः (*साकूतम्*) कथं ज्ञातवती भवती ?

इन्दुमती शश्वत्तत्र गच्छत्येषा ।

गिरिशः तस्मादेव भवेत्, दुर्लभं तव दर्शनं जातमिति संभावयामि।

सुरेशः कीदृशं मनुते तमार्या।

माया प्रवातेऽपि निष्कम्पा गिरय इत्येतदपि तिरोहितं भवति सर्वं कथयन्ति तं लौहपुरुषम् । सत्यमाह श्रीहर्षः–
"विवेकधाराशतधौतमन्तः सतां न कामः कलुषी-

करोति"।

सुरेशः (स्वगतम्) लब्धावकाशोऽधुना चन्द्रचूडस्य मनोरथः। प्रक्ष्यामि तावदेनाम्। एषा तद्वशवर्तिनी संभूतेति तर्कयामि। भवतु। (प्रकाशम्) वासु, परिचितं सपद्येव दासीकरोति चन्द्रः।

इन्दुमती बाढ़म्।

सखि, प्रष्टव्यासि।

माया अवहिताऽस्मि

सुरेशः चन्द्रचूडस्यादर्शकल्पनया कथं प्रतिष्ठते संसारः। वयं यथार्थवादं समर्थयामः।

इन्दुमती अवितथमाह सुरेशः। कल्पनामय आदर्शवादः, यथार्थो यथार्थवादः

गिरिशः अलमनल्पविवादेन। इदं पुस्तकं समीक्ष्यापनयतु तत्रस्थदोषं, भवती संशोध्य प्रतिलिपिं करोतु। स्वयं सर्वं कर्तुं न ममावसरो विद्यते।

इन्दुमती नाहं पारयामि। उपन्यासरचनया परवशोऽयं जन इत्यार्यः प्रत्येतु। तथापि प्रयतिष्ये। ममोपन्यासं कः संशोधयिष्यति ?।

सुरेशः आर्ये! विस्रम्भसे चेद् व्यवस्यामि संशोधयितुम्।

इन्दुमती (सहर्षम्) धन्यवादान् ददामि।

गिरिशः (मायां विलोक्य) श्रुतं भवत्या। करुणायसे चेत

गृहाणैतान् भरान् ।

माया नाहं तादृशी प्रवीणा । (अनुस्मृत्य) भवतु, सख्याः प्रबन्धमहं निर्व्वर्तयामि ! अत्रभवान् (सुरेशं निर्दिश्य) भवल्लेखस्थितदोषं निराकरोतु । किञ्च पुरुषाणां गाम्भीर्य्यप्रधानं लेखं ज्ञातुं न शक्नोमि ।

सुरेशः (स्वगतम्) पर्य्यनुयुङ्क्ते माम् । संगोपयामि लक्ष्यम्

गिरिशः सखे ! सत्यमाह भवती, किं स्वीक्रियते भवता ।

सुरेशः (सस्मितम्) मित्र, अनुग्रह एवेयमभ्यर्थना ! द्वावेव ग्रन्थौ संशोधयिष्ये ।

गिरिशः वयस्य , माया यदीन्दुमत्याः प्रबन्धदोषान्निराकरिष्यति चेत् तदा यत्र कुत्रापि स्वसखीं प्रष्टुं शक्ष्यति । पुनश्च लघियान् संजायते भवद्भारोऽपि ।

माया (आत्मगतम्) कुपित्वा किं वेन्दुमती भणति । (प्रकाशम्) को नियोगो विकल्प्यते ।

इन्दुमती (सेर्ष्यम्) किमिति सुरेशो मां प्रष्टुं न शक्ष्यति । किंवा नाहं स्वाधीना, कोऽधुना प्रत्यूहति स्त्रीस्वातन्त्र्यम् न चाद्य परतन्त्रतया निगडीकृताहं पुरातनी दासी भ्रातः, महद्भिश्च यथार्थदर्शिभि र्भवितव्यम् ।

सुरेशः [साक्षेपम्] सत्यमाह चात्र भवती । समाजस्यार्थिक्यावस्थयैव परिस्थित्यनुसारं मनुष्यः परिवारं सङ्घटयति । यदा विकासात् वैयक्तिकसम्पत्तिकालः

समायातस्तदैव नारी नरस्य सम्पत्तिः संजाता।

मा‍या [सुरेसं विलोक्य] श्रूयतां मार्य, समाजस्य रक्षार्थं द्वावेव तुल्याधिकारिणौ, यद्यधायि पुरुषै र्बलवीर्यपराक्रमेषु सफलता तथात्वेऽपि तेषां जनयितृत्वेनासेधि नार्या महत्वम्। यदि राजा नरश्चेत् नारी सचिवः सखी शिष्या च, तस्मादेवार्हति समानासनम्।

इन्दुमती कीदृशी प्रवञ्चना, यद्येवं किमिति इदृशी भिन्नतार्थिकदृष्टिकोणे। भूयः सदैव कस्य हेतोः परतन्त्रता नियन्त्रयति।

मा‍या [सस्मितम्] अभिनिविशसे मुधा। परामृश सम्यक् जीवनोपायं पुरुषाधीनं स्वीकृत्य, परिवाररक्षणार्थं स्वातन्त्र्यं विसृज्य पिण्डयत्यात्मानं नारी।

सुरेशः [साटोपम्] नैतदेवं वृथा विकत्थसे। अनया दिशा नारीं सान्त्वयन्ति। शृणु। एषः पिण्डितार्थः। यदाशिष्टव्यक्तिगतसम्पत्तिकालस्तदाऽऽप्नोत् पतिव्रताया गाथा। किञ्च व्यक्तिगतसम्पत्त्याधारे निर्मितं समाजं न विनश्येदितिधिया पातिव्रत्यं कल्पयन्ति एवमितिहासपर्यालोचनया स्थितम्

इन्दुमती माये, व्याख्यामि सर्वं शृणु, यदि द्वौ पती स्यातां तदा तेन द्व्यामुष्यायणेन कस्य दायं प्राप्येत, तस्मिन् विवादे का गतिःस्यात्। नियुपि, नैतत्व्याख्यम्। अन्यापी निमी-

स्य कथं विस्रम्भसे । साधनहीनानां निर्धनानां तथा च मध्यमश्रेणीनां जनानाञ्च स्त्रियः पुरुषस्याधिपत्यं स्वीकृत्य तेषां वंशपरम्परां संचालयन्ति । यद्वाऽऽर्थिक-संकष्टेन पुरुषाणां क्षणिकानन्दाय स्वशरीरं विक्रीय क्षुधा ज्वालां शमयन्ति ! साधनवतां धनिनां तथा नीवीमतां स्त्रियः स्वात्मनिर्णयद्वारीभूतं विकास-कपाटं पिधाय तिष्ठन्ति । अथवा यौवने सन्ततिं समुत्पाद्य तारुण्य एवान्यासां सपत्नीनां प्रभावं दर्शं दर्शं हृदयमहर्निशं संकोच्य यावज्जीवं रुदित्वा प्राणानेव जुगुप्सन्ते । सर्वाः स्त्रियः पुरुषाणा-मन्याय्यं तितिक्षन्ते । सत्यमाह आदमस्मिथः “ धनिकवर्गाणां स्त्रियोऽनुपयुज्यमानाः केवलं शृङ्गारहेतोरलङ्कारा इव संगच्छन्त इति ।

सुरेशः   विभवानुरूपास्ते प्रतिपत्तयः । कृषिसमये, उद्योगावस्थायाञ्च यादृशी परतन्त्रतासीत् तादृशी यन्त्रविकासकाले न विद्यते । शारीरिकबले ता भवेयुरबला यन्त्रयुगेऽधुना श्रमस्यापरिगणनया सबला स्त्रियः पुरुषवर्गमपि निरस्यन्ति ।

माया   (सभ्रूक्षेपम्) महान्तः समाज शास्त्रिणः पाश्चात्याः स्वदेशे दाम्पत्यं समर्थयन्ति चेत् स्व समाजस्य

ज्ञानं परित्यज्य कथं त्वमिवाहमपि ब्रूयाम्। किमर्थं स्पृहयसि उच्छृङ्खलतायै ।

सुरेशः (*विहस्य*) भवती स्थापयति किमर्थमस्माकमग्रे पाश्चात्यानामादर्शम् । तत्रापि नार्य नवति प्रतिशतं परिणयनात्प्राक् स्वजीविकायै परिभ्रमन्त्यइत स्ततः यापयन्ति जीवनं दास्यं विधाय। विवाहं कृत्वा वराक्यः सन्तति रुरुत्सन्ति, यद्वा वेश्यावृत्ति-मारभन्ते।

इन्दुमती किञ्च वसतिं व्यसनानाम्, आधानमाधीनाम्, अवस्थानमनवस्थानाम्, आधारमधृतीनाम्, आवास मवसादानाम् , उद्वेगमुद्वेगानाम् , कारणं करूणायाः पारं परायत्ततायाः योषितं प्राच्याः कवयो व्याहार्षिषुः ।

माया मया नाम शुष्कघनगर्जितेऽन्तरिक्षे जलपानमिच्छता चातकायितम्। अलं बहु विकत्थ्य, आर्य महिलानां सतीत्वादर्शं स्मारं स्मारं सभ्यतायाः सोपानमारो-हन्ति पश्चात्याः। महत्यार्याणां संस्कृतिः ।

इन्दु स्वसंस्कृत्या वेशं क्रोडीकृत्य कथं वयं सदैव शोषिता भवेम। क्रन्दाम्यहं कदा शोषणकारिण्याः संस्कृतेरन्तो भविष्यतीति ।

सुरेशः स्त्रीपुरुषयोः लिङ्गभेदं विहाय साम्यं यदा नाद्रियते

तदापर्यन्तं न विशीर्य्यते यातना, स्त्रीपुमानित्य-
नास्थैषा।

माया — अनया युक्त्या किं लोकशोषणपद्धतिः निराकृता भवति, किञ्च खण्डिता भवतीह भारतसंस्कृतिश्चान-
्या दिशा ? शान्तं पापम्। किंनु खुल दर्दुरा व्याहर-
न्तीति मेघः वर्षितुं स्मरति।

इन्दुमती — (सखेदम्) हला मत्पक्षमवलम्बयत्यासीदुत्कण्ठा किन्तु परिणामोऽन्य एवावर्ततः। सुरेशः स्त्रीदुःखं विभावयति, भवती निरस्यति नारीदुःखम्! व्यावृणु सर्वम्।

माया — स्वभावमन्यथाकर्तुं कोऽपि न प्रभवति। (सभ्रूक्षेपम्) अज्ञात्वैव रहस्यमामूलचूडान्तं परिवर्तयितुनाहमुत्सहे।

इन्दुमती — निमग्नं समाजमुद्धर्तुं न पर्य्याप्नोति रूढिप्रणालिः।

माया — नह्यासादयामि त्वत्पक्ष एव तर्कं युक्तिं दृष्टान्तञ्च। वैयक्तिकसम्पत्याधारे यदि स्त्रीणां स्थितिस्तादृशी निर्मिता चेत् पश्वादिषुस्त्रीणां न स्यात् पारतन्त्र्यं ते स्त्रियमधिकृत्य पुनश्च न प्रेमापयेयुः।

इन्दुमती — विसंवदसि त्वम्। मनुष्येतराणां स्त्रियः स्वतन्त्रा विद्यन्ते न तु दास्यः। धिक् कष्टम्। ज्ञात्वप्यभिनिवि-
शते चेदेतादृशी विदुषी कथं न विशीर्य्यते स्त्रीस-
माजः [निःश्वस्य] "लोकस्य भग्नाः पन्थानः"।

माया — अनुतप्ये। शृणु – "न केवलं यो महतोऽपभाषते,

शृणोति तस्मादपि यः स पापभाक्" । शान्तं पापम् !

इन्दुमती [सास्रम्] शृणु भद्रे ! दृष्टान्तम् एका वराकी कीदृशीं यातनामनुभवति निशामयत, । एको नीवीमान् प्रसह्य धर्षयित्वा दासीं तां मारयितुं कांक्षति । फलमप्यचिरेण द्रक्ष्यथ ।

गिरिशः किं सत्यमुदाहरति भवती ?

इन्दुमती सखे! नाहमपलपामि, पाश्चात्यप्रभावैर्धूमायितहृदयाणामग्रे सर्वं स्वसमाजस्य दुःखमसत्यमिव प्रतिभाति ।

गिरिशः न मया तिरस्कृतः सिद्धान्तः।

सुरेशः किंस्वित् ! माया सभावयेदन्यथैव । किन्त्वार्याऽऽदर्शपक्षपाती कविरेव लिखितुं प्रभवेत् "उपपन्ना हि दारेषु प्रभुता सर्वतो मुखी" इति । (ह्रेपयति)

माया "मातृदेवो भव" इत्यपि तत्रैवोपलभ्यते । सखि, भण सर्वं किं विलम्बसे ।

इन्दुमती प्रिये, साधुना बाला प्रविशत्यन्धतमसं यत्र दिनकरस्य सुधाकरस्य किरणप्रवेशो रुद्धोऽस्ति । शुष्यन्त्यश्रुविन्दवस्तस्या नयनयोः सदैव जोहूयते मृत्युं, सूत्रात्मानं नेतुमस्थिपञ्जरात् प्रार्थयते यमम् ।

गिरिशः नामापि गृह्णतोऽस्य पापकारिणः पापमलेन लिप्यत इव जिह्वा ।

माया [निःश्वस्य] चन्द्रचूड ! त्वयि जीविते कः खलु दुरात्मा साहसमीदृशं कर्तुं पारयति। तादृशाः कुवैटकिका इव तेजस्विरत्नविनाशकाः कस्य न वध्याः।

इन्दुमती युज्यते । सुरेश, त्वमस्योंकोर इव क्रौर्यस्य, अपत्यं मृत्योः येनाभिधीयसे । किं नवध्रासिपरिकरम्

सुरेशः जिह्रेमि शुष्काधरपुटः पोटेव प्रतिकारशून्यं शुचा स्तकर्तुम्।

माया एते विवादकुशलाः नह्यनुतिष्ठन्ति स्वकर्तव्यम् तिष्ठ देवि, निवेदयिष्यामि कर्तव्यव्रतपरायणाय, परोपकारदीक्षिताय तस्मै चन्द्रचूड़ाय । आःदुरात्मन् , आःपाप, तिष्ठ तिष्ठ । स जले ज्वलति ताडितस्तेजस्वी । अत्रोपयुज्यते चन्द्रादमृतमिति किमाश्चर्यम् ।

इन्दुमती हला तादृशीमवस्थां नयन्ति ते यद्यस्मोभिर्नह्युपचर्यन्ते कतव्यं स्वसमय एव । मृष्यसीमामवस्थाम् ।

माया यवनराजस्याकवरस्य वक्षसि क्षुरिकां प्रहर्तुमुद्यता वोरबालेवाहं दीप्ये। नाहं शुनी सर्वैरनुगताः।

गिरिशः "नकामवृत्ति र्वचनीय मीहते" इति सत्यं प्रत्यपीपदत्।

माया तथाहि अन्याय्यः परदाराणां व्यवहारः।

गिरिशः अलं विवादेन । भद्रे! कां भाषां समाश्रित्य रचयस्युपन्यासम्।

इन्दुमती मातृभाषैव सर्वातिशायिनी भवति। तथापि राष्ट-

भाषा राष्ट्रभाषैव वर्तते,भवच्छद्दशाः किं परामृशन्ति, समाजः किमालम्बते । सत्यम्-" हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा"।

सुरेशः (विचार्य) साधु, उचितवेलातिक्रमे चिकित्सका दोषमुदाहरन्ति।

माया शक्यमाशाबन्धेनात्मानं धारयितुम्।

गिरिशः त्वं दरिद्रां आतुरो इव वैद्येनोपनीयमानमौषधमिच्छसि ।

इन्दुमती मायें, विचारय कति विद्यन्ते वर्णाश्रमिणस्तत्रापि कति स्युः स्वधर्मनिरतास्तत्रापि कति भवेयुः पतिव्रताः। अन्यत्र ब्रम्हाण्डे न विद्यते चैषा प्रणालिः सर्वत्र प्रचलति विधवाविवाहः त्रुट्यते बन्धनं यदास्माभिस्तदा भविष्यति सर्वं सुसम्पन्नम् ।

सुरेशः वाढ़म् । आपत्सु पतिरन्यो विधीयते शास्त्रे।

माया मनोहरं रुचिरं विशदं विशालं स्वच्छन्दमितिसर्वे स्वपक्षं मनुते । किञ्च "नवनव गुणरागी प्रायशः सर्वलोकः"।

इन्दुमती किन्तु तत्र पुरूषा न कीलयन्ति स्त्रियम्।

माया परन्तु नविद्यते तत्र स्त्रीषु विश्वासः ।

गिरिशः निसर्गनिपुणाः स्त्रियः पुरुषं वञ्चयितुम् ।

इन्दुमती तस्मादेव दासी विहिता नारी ।

सुरेशः हला, शम्पा वैधव्यधर्मे स्यात्किन्नु ? त्वमेव भण !

माया सा किल स्वप्रतिष्ठां कमाग्नौ जुहोति ।

गिरिशः को निषेधयति ताम्।

इन्दुमती (सखेदम) सर्वे देवरादयो धर्षयितुं तां यतन्त इति श्रूयते । धिक् कष्टम् ! तस्याः शृङ्गारो दुष्यति, श्री, क्लिद्यति, यौवनं ताम्यति, हास्यं भ्रस्यति लोस्यं त, लीला स्विद्यति, किमेष धर्मादर्शः !! ।

सुरेशः किं धर्मः स यो दिवानिसं सन्धुक्षयति मानसम् । कीदृशोऽयमाचारः यो नक्तंदिवं स्वान्तं ग्लापयति । धर्मस्य व्याख्यानावसरे सर्वे प्रतारयन्ति समाजम। नह्येकरूपेण सर्वत्र सर्वैः सर्वदा स्वीकृतो धर्मः ।

इन्दुमती यदि सा जाता स्याद् वर्णाश्रमेतराणां समाजे तदा वैधव्येऽपि नकापि हानिर्भवेत। तदा युवतिं तामन्यएव परिणयेत्, तथात्वे गुप्तव्यभिचार न प्रसर्पति।

सुरेशः तद्गृहन्त्वधुना व्यभिचार स्थानंविद्यते। प्रत्युत जार एवार्जयति धनं मिति श्रूयते।

माया सत्यम्, अतीत्य गणिकालयं वर्तते ।

गिरिशः (सतर्कम्) आम्, तथा ।

(मुरारिगोपालौ प्रविशतः)

मुरारिः नमस्ते । (समन्तादवलोक्य) सहसव किमिति सर्वे

तूर्ष्णीं भूताः । किमस्माकमेव वार्ता प्रचलति ।

सुरेशः प्रसन्नस्ते तर्कः ।

इन्दुमती (अपवार्य) सखे, आकारमनुधावति तवाशयः अभिप्रायं जुषते नवारम्भः भावं संगिरते ते भाषा चिरं जीवसि सौम्य, वयमिह चिन्तयामः, श्वशुरगृहगमन इव विलम्ब्य समागतो भवानिति ।

माया (स्वागतम्) निसर्गनिपुण त्वेषा वाग्जालेन वञ्चयितुम् (प्रकाशम्) आर्यश्चन्द्रचूडः कुत्राधुना भ्राम्यति ? ।

मुरारिः सखि, बिभेमि सहसा प्रभावतो विज्ञातुम् । काप्येका बालासीदति यातनाचक्रे इति श्रुत्वा तामुद्धर्तुं बद्धपरिकर इतस्ततो वृथा प्रयस्यति ।

इन्दुमती (सोपहासम्) का पुन र्धन्या स्त्री यानेन परिमृग्यमाणात्मानं विनोदयति ।

मुरारिः आचारं तावत्प्रतिपद्यस्व । तुदसि व्यर्थम् ।

गिरिशः श्वेतजलदयुतं गगनं मलिनं नील नभोः निर्मल मितिचोदीरयति लोकः ।

इन्दुमती साधु, साधु । (सुरेशं विलोक्य) प्रियबन्धो ! श्रुतं त्वया वचनम् ।

माया कः खलु नतं लौहपुरुषमिति परास्यति ।

गोपालः किन्तु नास्तिकोऽयं जनः ।

सुरेशः (विहस्य) न हि सर्वे भवादृशाः ।

माया नास्तिकशब्दकशाघातेन बहवो महात्मानो व्यापादिताः । ईशुसुकरातप्रभृतयो व्यापीपदन् नास्तिकत्वलाञ्छनेन । " सदैव कठिनकार्ये पुरुषार्थेण बाधासु विजयं प्राप्य, स्वावलम्बनमार्गानुसरणं विधाय शरीरं धृत्वा जनो जगति विचरेदिति" मार्टिनलूथरोऽभ्यधित । तेनैव मार्गेण गतश्चन्द्रचूडः स्वसिद्धान्तं कथं जहाति ।

इन्दुमती (विहस्य) समारूढा भवती किमभिवक्तुम् ।

माया (आशयं विदित्वा) नहि ।

सुरेशः (प्रसङ्गमन्यथाकर्तुम्) कति वर्षो भवान् ।

गोपालः षट्चत्वारिंशद्धायनाः व्यतीताः । (मायां पृच्छति) भवती कामवस्थां श्रयति ? ।

इन्दुमती का सा भवेत् या स्ववत्सरमुक्त्वा जीर्यति । भवानेव परामृशतु ।

गिरिशः स्वैरं भणतु भवान् ।

गोपालः (निश्चित्य) षड्विंशतिवर्षा स्यात् ।

माया (सस्मितम्) अन्याय्यः किल तरुणीवत्सराणां विमर्शः ।

[सर्वे परस्परं विलोक्य ह्रेपयन्ति]

इन्दुमती (स्वगतम्) उद्वेजयाम्येनम् । (प्रकाशम्) अवटीटा भवद्भगिनी संजाता कियत्वर्षा ? ।

गोपालः (सोद्वेगम्) पितृभ्यां स्नहेनाह्वोयि न च तस्यास्त-
देव नाम।

गिरिशः सातीवसुन्दरीति श्रूयते।

गोपालः सत्यम्। यदि सावटींटा भवेत् कीदृशी स्यात् सुन्दरी।

सुरेशः (विहस्य)नाधुना विवाहकालो। न च वयं निरूपयामः
सर्वम्।

गोपालः (सरोषम्) दुर्विदग्ध, मामुपहसि। आः पाप, विधवा
विवाहं समर्थयसि।

सुरेशः यदि परिणीता भवेत् तस्या आत्मा प्लवेत। यदि
हिन्दुधर्मानुयिभिः प्रगतिर्ज्ञाता स्यात् परिणतिर्न
भवेदीदृशी।

गोपालः [कर्णौ पिधाय] शान्तं पोपम्।

सुरेशः कानीनाःकति चात्र अकालकालकवलिताः कतिविधवा
संज्ञाताः गणिकाः, कतिभृता भ्रूणहत्याः, स्मारं स्मारं
लुञ्छति मानसं मे। जुगुप्ससे किं व्यासकर्णकाइष्ट-
प्रभृतीन् कानोनान्?।

गोपालः अपसद, निराकृत धर्ममुपहससि।

मुरारिः (स्वगतम्) नास्यावसरं दास्ये। (सान्त्वयन्)
नकल्प्यते नाम्नि वस्तु तत्त्वं तत्तु परिचयनेव बृणीते।

गोपालः अनुमतंमे, नयुक्तं सुभाषितं प्रत्याचरितुम्
मित्राणिशत्रवश्च व्यवहारेणैव।

माया साधु साधु, प्रसीदत्वार्यः । कतिषु सा संजाता विधवा ।

गोपालः साभूदेकादश वर्षा । वराकी काचोर्मिकां करान्निष्कासयितुं पर्यदेवीत्तदा ।

इन्दुमती (*निःश्वस्य*) क्रूरसमाजस्य ताण्डवं स्वमस्तके प्रवृत्तं तदा किं विविनक्तु । कथं वितर्कयतु लोकस्य कलङ्कं कृत्यं स्वलावण्ययुते कलेवरे । अभूतेः कारणं, विलासस्य विरामः, अन्याय्यस्यारम्भः, मिथ्यायाः प्रचारः, प्रभावस्य निरोधः, विवादस्य प्रयोगः, प्रीतेरवसानं वैधव्यमिति तदैव कथमभ्युपैतु । साभूत् बाला, मुग्धा प्रवञ्चनानभिज्ञा । यौवनोन्मेष एव यस्याः सौभाग्यशोभा समकुचत् । (*निर्विद्यते*)

माया विवाहवेलायामासीत् वरः कति वर्षः ?

गोपालः भवेत् स षट्पञ्चाशद्वर्षः ।

सुरेशः हन्त ! भगिन्याः सौभाग्यमुन्मूलयितुं प्रवृत्तं भवन्तमेव लक्षयामि ।

गोपालः (*सक्रोधम्*) आम् । अहमासं यमराजस्य सगोत्रः, पुनरासीत् भगिन्युपरि महान् विरोधः, ज्ञात्वैव मयाऽभर्जि तस्याः सौभाग्यबीजम् । प्रसन्नस्ते तर्कः ? ।

इन्दुमती सखे ! तूष्णीमास्व, शृणु सर्वम् ।

मुरारिः अनागरत्वं स्वस्य प्रकटीकरोत्येषः ।

माया (*सानुकम्पम्*) किं विलोक्यादित तस्मै ! ।

गोपालः रूपं, वित्तं, श्रुतं, कुलं सर्वं विलोक्यैवादायि। यस्य प्राङ्गणे ग्रामे मत्तमातङ्गाः निषीदन्तिस्म।

गिरिशः अधुना शम्पा षोडशवर्षा संजातेति विमृशामि। सर्वं विचारितं वरस्य किन्तु न हि समीक्षितं वयः।

इन्दुमती धनं प्रशस्तं विचित एव।

गोपालः [अबुद्ध्वा] अधुनापि दायविभागे लक्षरूप्यकाण्यस्याः हस्ते आयान्ति।

सुरेशः अनपत्या सा, तद्धनं भवत्करकमले समायाति, प्रीयतां पूर्यतां भवान्।

इन्दुमती तेनैव हेतुना दत्ता भवेत् प्रागधुना किं विचारयसि। गृध्यसि भगिनीदायम्, भगिनीभाग्यमवक्रीणीषे।

मुरारिः अलमनेनोपालंभनेन, गहने विषये प्रक्रमतां वचनोपक्रमः

इन्दुमती इतःपरं किं भविष्यति, यत्र सन्दीपयति नार्य्या दुःखम्।

सुरेशः कथं मौनमेवास्ते मुनिः। श्रुतं श्रीमत्या, सर्वं समाजावस्थां निचाययतु।

माया उपर्युपरि प्लवसे। विस्मृत्य सर्वमावेगमेव समवलम्बसे। कर्तव्यं विलङ्घसे।

गिरिशः (विचार्य) स्नेहमयि, यदि विवादेऽवसरमादत्ते चेत् भवती, कथं संजायेत सत्कार आमन्त्रितानाम्। गम्यतामधुना निभालयितुं प्रबन्धं, समयोऽपि सन्निकटः

इव, त्वर्यतां वत्से !।

गोपालः ममार्थे मुञ्चतु प्रयासं नाहमश्नामि किमपि।

इन्दुमती विवादे कुपित इव श्रीमान्।

गोपालः [ससंभ्रमम्] नहि, नहि।

गिरिशः तथाचेत् किमिति व्युदस्यति भोजनम्।

गोपालः गृहेऽद्यासीत् रुद्राध्यायपाठः, आम्रपायसाभ्यामती-
तृपं ब्राह्मणान् शेषेणान्धसा तृप्तोऽस्मि।

सुरेशः किं जायते तेन।

इन्दुमती [विहस्य] वाञ्छितार्थं वितरति चन्द्रचूडः।

सुरेशः अहो! बुद्धेर्वैपरीत्यम्, जलधारया पाषाणप्रतिमां
प्रद्याल्य कथं सिध्यति मनोरथः। चेतनो जनो जडात्
कार्यं साधयितुमाशास्ते। किमतःपरमाश्चर्यम्।

इन्दुमती यदि गृहमानीय शिवलिङ्गं पेषणिका क्रियेत तदा
सा व्रयेत् किमपि।

सुरेशः [विहस्य] सत्यं शंसति भवती।

मुरारिः अज्ञात्वैव मूर्तिपूजारहस्यं प्रत्याचष्टे। प्रतीकं विधाये-
श्वरस्य निर्मिमीत प्रस्तरमूर्तिम्। जडे शक्तिपातं
विधाय तस्मात् फलं कामयमानो मनुष्यः कर्मण्ये-
वाधिकारं स्वस्य प्रकटयति न तु जाड्यम्।

सुरेशः पुरा योनिलिङ्गपूजका अभूवन्। पश्चात् पाषाणस्य
लिङ्गं योन्युपरि संस्थाप्य कल्याणकारकमिति विचार्य

शिवलिङ्गमर्च्चयितुमुपाक्रंस्त। ततस्तत्संप्रदायप्रवर्तकाः पूजाविधानं बहुविधं प्राणैषिषुः।

मुरारिः तथैवाहुः साम्यवादिनः। किञ्च वस्तुतत्वमन्यमेव वर्तते। निर्गुणोपासनायां मन्दमतीनां तथा न स्फुरति मति यथा सगुणोपासनायां, तस्मादेव प्रतीकं विधायोपासनां सुकरां निरपीपदन्नाचार्याः। वृथैवाज्ञात्वा वहसि प्रमादप्रणाल्याम।

गिरिशः तादृशमाकारं किमिति व्यदधुः।

मुरारिः अष्टमूर्तिमष्टौ रूपाणि संकलय्य, पञ्चवक्रं पञ्च महाभूतान्यलङ्कृत्य, चतुर्बाहुश्चतुर्विधपुरुषार्थं प्रकल्प्य, लिङ्गाकारं सामान्यशरीराकारं निरीक्ष्य वर्तुलाकारमाधारं तु तत् स्थापनहेतोः स्यादित्यवकल्पयामि। संभवेदेव एष पिण्डितार्थः।

गिरिशः अलमनल्पजल्पनेन, । भ्रातः, परीक्षोत्तीर्णा भगिनीत्यद्यात्र दीयते प्रीतिभोजनम्। उत्सवेऽस्मिन् महता भाग्येन समागतो भवान्। किमप्यभुक्त्वोपेक्षसे चेन्न प्रत्यवस्यन्ति केऽपि सर्वेऽनुतप्यन्ते।

गोपालः [सखेदम्] मुरारे! मार्गे किमर्थं नावादि, महासंकटेऽस्मिन् स्थापितोऽस्मि।

इन्दुमती अलमलम्। अहमस्मि मन्दभागा, ममोत्सवे न हृष्यन्त्येतादृशाः सज्जनाः। विवादे कुपितः किमु?

जाने न प्रीणाति श्रीमान। कल्याणमास्त्वस्या इति हृदि प्रणयति। (नाट्येन परावर्तते)

गोपालः (सस्मितम्) शान्तं पापम्। भवत्यन्यथा स्मरति भवतु भो! कवलयाम्यहमपि, प्रसीदतु सखी।

गिरिशः दिष्ट्यानुकम्पते, सर्वं सूपपन्नं, गच्छ वत्से!

सुरेशः (सविनोदम्) पिपासा विद्यत इत्यचकथयच्चिरस्य, भोजनात्प्रागानीयतां सुस्वादु पेयम्।

गोपालः (कर्णौ स्पृशन्) शान्तं पापम्। ब्राह्मणब्रुव, त्वत्सदृशाः कुर्वन्ति पानम्। धर्मप्राणो वयं म्लेच्छैः स्पृष्टं पानीयमपि नपिवामः दूर आस्तां मद्यम्।

सुरेशः (साश्चर्यम्) वैडालव्रतं समाश्रित्य समाजं कदर्थयसि। चाण्डालं तिरस्कृत्य न हि लभ्यते महत्वं गतः स कालः। यदि जाति रेव भ्रंस्यति चेत् कुत्रास्ते तव धर्मः। सावधानेन चेतसा विचार्यताम्। कुक्कुरः क्रीडति क्रोडे तवपत्न्याः लेढिवदनं श्वा तस्याः। कपोलं तस्याश्चुंवति भवान्। पुनर्मनुष्यहस्तस्पृष्टं गाङ्गं जलं दुष्टमिति वदितुं नलज्जसे। एषः किं तव सनातनो धर्मः?

माया कुक्कुरादपिनीचं नरं कोऽपि धर्मो न साधयति।

सुरेशः सखे!, मुधैवाभिनिविशसे। त्यज हृदयस्य दौर्बल्यम्, भज मानवधर्मम्। एषां सद्भावनयोन्मिषति विश्वब-

न्धुत्वम् । चरकादिमहर्षिभिः सुराणां प्राशस्त्यमलेखि । पुरा सुरा सुरैरसुरैर्भूसुरैरपि सेविता । या किल मरणसमये संजीवयति सा कथंनिन्द्यते ।

गिरिशः मात्रया उपयुज्यमाना प्राणधारिणी वर्तते सुरा । विद्यते वचनमपि शास्त्रे "औषधार्थे सुरां पिबेदिति" ।

इन्दुमती स्थाने कवयतिस्म कविः ।

मुरारिः [*सभ्रूक्षेपम्*] सुरेश, प्रकटितविद्यामदोऽसि । मदिरा-माहात्म्यं विशदीकृत्य समाजं लोडितुं यतसे ।

गोपालः नैषा सभा, एषा पानभूमिः जिह्मेम्यत्र क्षणमपि स्थातुम् । प्रसह्यात्रानीय वञ्चितोऽस्मि मुरारिणा । फलमिव पापस्य, कारणमिव कलिकालस्य प्रतिभासि त्वम् । आः पाप, फलमचिरेणोपभोक्ष्यसे । (*सहसोत्थाय गन्तुमिच्छति*)

गिरिशः [*अञ्जलिं बद्ध्वा*] मुहूर्तमवधानदानेन प्रसादं क्रियमाण-मिच्छामि ।

मुरारिः सुरेश, पदे पदे परिहासं नाहं समीचीनं मन्ये । विनयमाद्रियन्ते विद्वांसः । अतिरोषणश्चक्षुष्मानन्ध एव जनः ।

सुरेशः बाढम् । दासमपि न तथा कल्पयन्ति यथैष मामप-शब्दैस्तर्ज्जयते । धनैरविक्रीतं क्वचिच्छरीरकमस्मि । धनाभिमानिनोऽस्य कियद्दूरं वा चक्षुरीक्षते ।

मुरारिः सारं ग्राह्यं सर्वस्य ।

सुरेशः कथं स्याद्विषवृक्षेऽमृतफलम् ।

मुरारिः किंस्वित !! निश्चलोऽसौ स्वसिद्धान्ते । यदि नाम मदिरायै स्पृहयेत् सदैवैष पातुं प्रास्यति, पर्याप्त-साधनेऽपि दुष्करमिन्द्रियदमनमित्यवैमि । नास्य तुलामधिरोहन्त्यत्रत्याः ।

सुरेशः (*सावज्ञम्*) हुम् । वक्तुमित्थं न लज्जसे, त्वमसि धनिकानां पृष्ठपोषकः, रे रे तैरश्रद्धयाक्षिप्तमस्थि जिगलिषसि कथम् ?। पुनश्चेन्द्रियदमनादेव स्यात् विवाहिता नप्तृतुल्या कन्यका । साम्राज्यवादपोषका भवन्ति धार्मिका दार्शनिकाश्चेतिसत्यमाह कार्ल-मार्क्सः ।

मुरारिः साम्यवादे वृद्धां पत्नीं परित्यज्य दुहितुः प्रियतमं कारायां निक्षिप्यापि प्रतिष्ठा संजायते ।

सुरेशः किंवक्तुकामोऽसि भो व्यक्तिवादिन् ? व्यक्तिगताक्षेपं विधाय साम्यवादस्य सिद्धान्तो न हीयते । स्वस्या-ज्ञानं किं पिपर्षि ? । व्यक्तिवादं समर्थ्य समाजं क्षुत्क्षा-मकण्ठं कर्तुं यतस। धिक् कष्टम् ।

माया (*स्वगतम्*) कलहः संजायेत । भवतु, नात्रावसरं दास्ये । [*प्रकाशम्*] किमपि प्रष्टुकामास्मि । तत्त्वं समीहे ।

सुरेशः स्वैरं भणतु भवती।

माया गान्धीवादः शोषणहीनसमाजस्यादर्शं स्थापयति। शोषणहीनस्य तात्पर्यञ्च शासनं वर्गहीनं समाजमिति तज्ज्ञाः प्रवदन्ति। तथात्वे मार्क्सवादस्यैव सिद्धान्तः समागतः पुनरत्र भिन्नता कीदृशी? व्याख्यातु।

सुरेशः प्राक् मार्क्सवादः समाजं सङ्घटयति समाजस्य संगठनं कृत्वा पूर्णत्वे तस्य विघटनं भवतीति विश्वसिति। तथा च विज्ञानस्य सैव प्रणालिः सर्वत्र पूर्णत्वे तस्यावसानं दृश्यते तस्माद्वैज्ञानिकी सरणिः सेतिनात्र विप्रतिपत्तिः।

मुरारिः शृणु भद्रे! गान्धीवादः प्रथममेव समाजं विघटते व्यक्तेः स्वतन्त्रत्वं संस्थाप्य परिपुष्णाति च समाजम्। मार्क्सवादस्तु व्यक्तेरस्तित्त्वं विनाश्यैव प्रक्रमते समाजस्वरूपम्। एकत्राऽहिंसा दीव्यत्यन्यत्रो हिंसा। गान्धीवादः ध्रियते चेतनस्य पुष्टिं मार्क्सवादस्तु निधत्ते ज़डस्यविश्वासमनयोरेतावत्येव मौलिकी भिन्नता।

गिरिशः (सान्त्वयन्) किमिति सदैव विवदेते भवन्तौ।

माया वादस्तु करणीय एव। 'वादे वादे जायते तत्त्वबोधः' किञ्चाधिनायकतन्त्रे व्यक्तिगतस्वतन्त्रताया अत्यन्ताभावो भवति।

सुरेशः (अपवार्य्य) परन्त्वधिनायिका शक्ति कस्याः श्रेण्याः

हस्ते वरीवर्ति निरूपणीयमेतदेव सम्यक्। शोषककरतलगता चेद्यदि सा शक्तिः संजायते तदा दमनं भयङ्करम्। आहोश्वित् शोषितहस्तगते समाप्तं भवति शोषणस्य तस्मादेव महात्मा लेनिनः श्रमिकहस्तगतमधिनायकवादं समर्थयामास । अधिनायकत्वशब्दश्रवणादेव जुगुप्सन्ते, किन्तु कर्णकटुत्वं भवतु तथापि तस्य महत्वं न हीयते।

मुरारिः परन्तु वर्ट्रैंड रसैलस्तु मनुष्यस्य प्राधान्यं स्थापयितुं प्रयस्यति । कार्यकारणश्रृङ्खलाबन्धनेऽपि मानवः स्वतन्त्रे स्थातुं शक्नोतीति स्वपक्षं प्रकटीकरोति।

माया सत्यमेव । स्वातन्त्र्यमन्यदेवोच्छृङ्खलत्वमन्यदेव।

मुरारिः पण्डितंमन्या युवका उच्छृङ्खलतया सामाजिकपरिपाटीं तुत्रोटयिषन्ति। किन्तु नवीनादर्शं स्थापयितुं न शक्नुवन्ति । धर्ममुन्मूलयितुमभिलषन्ति किञ्च तेषामस्तित्वमेव धर्मे निहितं वर्तते नीवीपतिप्रथामाक्षिपन्ति किन्तु रुशदेशकर्मकरानतीत्य वर्तन्ते अमेरिकादेशस्थिताः श्रमिकाः अशनवसनादिषु । पुनश्च रुसस्याधिनायकस्य विलासिता अमेरिकादेशस्य राष्ट्रपतिं सत्यमतीत्य विद्यते।

सुरेशः नीवीवतां प्रवादः एषः। क खलु प्रत्येति प्रवादम्। अध्येतव्योऽयं विषयः।

सुरेशः स्वैरं भणतु भवती।

माया गान्धीवादः शोषणहीनसमाजस्यादर्शं स्थापयति। शोषणहीनस्य तात्पर्यञ्च शासनं वर्गहीनं समाजमिति तज्ज्ञाः प्रवदन्ति। तथात्वे मार्क्सवादस्यैव सिद्धान्तः समागतः पुनरत्र भिन्नता कीदृशी ? व्याख्यातु।

सुरेशः प्राक् मार्क्सवादः समाजं सङ्घटयति समाजस्य संगठनं कृत्वा पूर्णत्वे तस्य विघटनं भवतीति विश्वसिति। तथा च विज्ञानस्य सैव प्रणालिः सर्वत्र पूर्णत्वे तस्यावसानं दृश्यते तस्माद्वैज्ञानिकी सरणिः सेतिनात्र विप्रतिपत्तिः।

मुरारिः श्रृणु भद्रे! गान्धीवादः प्रथममेव समाजं विघटते व्यक्तेः स्वतन्त्रत्वं संस्थाप्य परिपुष्णाति च समाजम्। मार्क्सवादस्तु व्यक्तेरस्तित्त्वं विनाश्यैव प्रक्रमते समाजस्वरूपम। एकत्राऽहिंसा दीव्यत्यन्यत्रो हिंसा। गान्धीवादः ध्रियते चेतनस्य पुष्टिं मार्क्सवादस्तु निधत्ते ज़डस्यविश्वासमनयोरेतावत्येव मौलिकी भिन्नता।

गिरिशः (सान्त्वयन्) किमिति सदैव विवदेते भवन्तौ।

माया वादस्तु करणीय एव। 'वादे वादे जायते तत्त्वबोधः' किन्त्वाधिनायकतन्त्रे व्यक्तिगतस्वतन्त्रताया अत्यन्ताभावो भवति।

सुरेशः (अपवार्य्य) परन्त्वधिनायिका शक्ति कस्याः श्रेण्याः

हस्ते वरीवर्ति निरूपणीयमेतदेव सम्यक्। शोषककरतलगता चेद्यदि सा शक्तिः संजायते तदा दमनं भयङ्करम्। आहोश्वित् शोषितहस्तगते समाप्तं भवति शोषणस्य तस्मादेव महात्मा लेनिनः श्रमिकहस्तगतमधिनायकवादं समर्थयामास। अधिनायकत्वशब्दश्रवणादेव जुगुप्सन्ते, किन्तु कर्णकटुत्वं भवतु तथापि तस्य महत्वं न हीयते।

मुरारिः परन्तु वर्ट्रेंड रसैलस्तु मनुष्यस्य प्राधान्यं स्थापयितुं प्रयस्यति। कार्यकारणशृङ्खलाबन्धनेऽपि मानवः स्वतन्त्रे स्थातुं शक्नोतीति स्वपक्षं प्रकटीकरोति।

माया सत्यमेव। स्वातन्त्र्यमन्यदेवोच्छृङ्खलत्वमन्यदेव।

मुरारिः पण्डितंमन्या युवका उच्छृङ्खलतया सामाजिकपरिपाटीं तुत्रोटयिषन्ति। किन्तु नवीनादर्शं स्थापयितुं न शक्नुवन्ति। धर्ममुन्मूलयितुमभिलषन्ति किञ्च तेषामस्तित्वमेव धर्मे निहितं वर्तते नीवीपतिप्रथामाक्षिपन्ति किन्तु रूशदेशकर्मकरानतीत्य वर्तन्ते अमेरिकादेशस्थिताः श्रमिकाः अशनवसनादिषु। पुनश्च रूसस्याधिनायकस्य विलासिता अमेरिकादेशस्य राष्ट्रपतिं सत्यमतीत्य विद्यते।

सुरेशः नीवीवतां प्रवादः एषः। क खलु प्रत्येति प्रवादम्। अध्येतव्योऽयं विषयः।

माया साम्यवादिनः स्वसिद्धान्तं प्रसारयितुं ह्यर्बुदं रूप्य
व्ययीकुर्वन्ति। तत्रापि स्वलक्ष्यमन्यथाकर्तुं न पार्यते
किं करोमि क्व गच्छामि न कुत्रापि श्रेयः संपद्यते।

मुरारिः (निःश्वस्य) यदि चारित्र्यं न समर्थयसि चेदपि प्रतिष्ठ
स्याक्षुण्णा, सिद्धान्तं पुष्णासि चेत् स्वराद्धान्ते
एवैषः। समाजस्यार्थिकपरिस्थितौ द्वावेव यु
वोभूयेथे समानधर्माणौ।

गिरिशः (स्वगतम्) प्रबुद्धः खल्वेषः। (प्रकाशम्) कथमिव!

मुरारिः कार्यकाले समापन्ने त्वमपि नीवीवादं समर्थयसि
मध्यमवर्गीयो जनः परस्परयोर्विवादे श्रमिकं विहा
धनिनां पृष्ठं पुष्णाति, इत्यब्रवीत् कार्लमार्क्सः।

सुरेशः मध्यमवर्गस्य विनाशस्तु नक्तंदिवं संजायत एव, यद
नीवीपतिः नीवीमन्तं जिगलिषति तदाऽल्पजनह
केन्द्रिता भवति संपत्तिः तदा तयोर्महदन्तरं संभवति
ततो विनष्टो मध्यमवर्गो विदधाति सामाजि
क्रान्तिम्।

मुरारिः (विहस्य) मार्क्सस्य भविष्यवाणी निस्फलीभूतात्र, तथ
ऽधुना शक्तिसंख्या प्रभुत्वे माध्यमिकानां वृद्धिः संभूत
पर्यालोचनेन न दृश्यते ह्रासः। किञ्च १९०५ संवत्स
तत्रत्यानां माध्यमिकानां दशां विलोक्य तादृ

भविष्यद्वाणीं व्याहार्षीत् । किञ्च फासिष्टवादस्य कल्पनां कर्तुं सः समर्थो नाभूत् ।

सुरेशः मधुरया गिरा तान् विलोभ्य प्रचारितोऽपि फैसिज्मः कथमपि समुद्धर्तुं यदा समर्थो नभवति तदा माध्यमिकस्य नाशस्तु निश्चितो भवत्येव । फैसिज्मः न कदापि प्रचलति । मार्क्ससिद्धान्तं पूर्णमहं विस्रम्भे । सत्वरमेव यदि सिद्धान्तं समाजो न कलयति चेदपि पश्चात्तु समालम्बते ।

मुरारिः मार्क्सः फैसिज्मं न व्यतर्कयत् । भविष्यत्कालं कल्पयितुं नासौ प्रभुः ।

सुरेशः अनेनैव तस्य पाण्डित्यं महत्त्वञ्च न हीयते । मार्क्सवादस्य मिथ्यात्वेन पर्याप्तो हेतुः ।

गिरिशः विकारं खलु परमार्थतोऽज्ञात्वा नारम्भः प्रतीकारस्य ।

मुरारिः सुष्ठु त्वं भणसि, द्वयोरेको मनोरथः किन्तु विभिन्नः खल्वभिनिवेशो युवयोः । त्वं वाक्प्रवीणो धर्मद्वेषी, किन्तु गोपालो धर्मनिष्ठो वञ्चनाभिज्ञः । सत्यं ब्रूहि यदि चाण्डालकर्मणि नियुज्यसे चेत् साम्यत्वं समवलम्ब्य किं त्वं तदनुमन्यसे ।

गोपालः (सहस्ततालं विहस्य) संशयच्छेदि वचनम् ।

सुरेशः (सभ्रूक्षेपम्) ध्येयनिरूपणावसरे त्वं मायसि यद्वाऽभिनिविशसे ।

मुरारिः यथा त्वं मनुषे।

माया आर्य, किं न श्रुतं भवता तथाहि।

"नरम्यं नारम्यं प्रकृतिगुणतो वस्तु किमपि
प्रियत्वं यत्र स्यादितरदपि तद् ग्राहकवशात्।"

सुरेशः वैज्ञानिकं सिद्धान्तमबुद्ध्वैव खण्डयति।

मुरारिः तत्तु न जाने। किन्तु यस्य पृष्ठे न विद्यत इच्छाया: भारोवद्धस्तादृशो विचारोऽनुन्नयत्युपरि। य: किञ्च स्ववासनां नियन्त्रयितुं न शक्नोति न भवति परमार्थत: स स्वतन्त्र:। प्रतिकूलावस्थायामपि स्वानन्दं दर्शं दर्शं तथा च प्रसह्य दुःखमुपपादयितुं स्वादर्शं प्रयतनीयमेवेति व्यचीचरत् रसैल:।

माया अनासक्तयोगविषये श्रीकृष्णोऽपि स्थितप्रज्ञस्यावस्थामित्थं व्याजहार। तथाहि सर्वान् मनोगतान् कामान् यदा प्रजहाति, दुःखेष्वनुद्विग्नमना सुखेषु विगतस्पृहश्च संजायते तदा तस्य प्रज्ञा प्रतिष्ठितेति।

मुरारिः (सखेदम्) वयं पाश्चात्यानां वचनं प्रमाणमावहाम: स्वाचार्यैः कथितं तदेव सिद्धान्तं जुगुप्सामहे। तस्मादेव रसैलस्य नामाध्यगायि।

गोपालः किमर्थं स्वाचार्यं न विश्वसामः पुनश्च पाश्चात्यानां वचनं ब्रह्मवाक्यं मन्यामहे।

माया (संस्मृत्य) अवितथमाह चन्द्रचूड!

'स्वदेशजातस्य नरस्य नूनं गुणाधिकस्यापि भवेदवज्ञा"

गिरिशः अहमेव कृष्णात् परं रसैलं समर्थयामि ।

सुरेशः आम् । मदिरामयीव तृष्यत्सु, अमृतमयीव शुष्यत्सु तेषां भारती भाति ।

मुरारिः व्यर्थमेव यूरोपीयानां महत्वं व्याचष्टे । अतिपरिचय-दोषात् मानहानिः संजाता ।

गोपालः किं तदेव कारणम् ।

मुरारिः स्वसंस्कृतिज्ञानकारिणीं विद्यां मननपूर्वकं कोऽपि नह्यधिजिगांसते । पुनश्च विज्ञानप्रकाशचाक-चैक्यात् भ्रान्त्या सर्वे तान् प्रत्यधिकमन्धविश्वासं विधाय स्वविवेकशक्तिं जहति। इदमेव कारणमवैमि ।

सुरेशः पण्डिताः सर्वेऽन्धविश्वासमाद्रियन्ते पाश्चात्यविद्या-विदस्तु तमपास्यन्ति । संस्कृतज्ञाः प्रायोऽन्धविश्वास-पङ्के निमग्ना सीदन्ति। परितो विलोकयतु ।

मुरारिः ग्रन्थः किल द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासित-व्यश्च ।

गिरिशः *(निरूप्य)* संस्कृतज्ञाः समाजस्य प्रगतिं रोद्धुं, वस्तु-तत्त्वमन्यथाकर्तुं नैष्कर्म्यसिद्धिं प्रतिपादयितुं, तथा-र्थिकप्रणालिमेव विघटयितुं प्रयतन्ते ।

माया कतिपयास्तु संस्कृतशास्त्रं पारलौकिकमित्याघोषयन्ति, समर्थयन्ति प्रचारयन्ति च ।

मुरारिः (विहस्य) भवतु ते वराकाः स्वाज्ञानं प्रकटयन्ति। यत्र वर्ण्यते चतुर्विधपुरुषार्थः, तत् भवेत् कथं केवलं पारलौकिकं शास्त्रम्।

गिरिशः अर्थशास्त्रस्य, राजशास्त्रस्य च ग्रन्थाः तव साहित्ये नायान्ति दृष्टिगोचरम्।

मुरारिः अस्मिन् वाङ्मये वार्ता दण्डनीतिग्रन्थाः, बहव आसन् किन्तु दासत्वेन तेषां पाठ्यप्रणालिर्विनष्टप्राया संजाता।

माया विज्ञानस्य पुस्तकमेकमपि न वर्तते।

मुरारिः विज्ञानस्य ज्ञानं गणितशास्त्राध्ययनं विना गगनकुसुमायते। किञ्चात्रत्यैरेव संख्याया दशोत्तरज्ञानमज्ञायि, दशमलवस्योत्पत्तिरपि भूता भारते वर्षे। परन्तु पश्चात् सर्वे दासत्वं समवलम्ब्य वाचाटाः समभूवन विदुषामत्यन्ताभावोऽभूत्।

सुरेशः आयुर्वेदस्याचार्योऽपि पुरा तु भारतवर्ष एवाभूत्। किञ्चाधुना विज्ञानज्ञानलवहीन एषो वरीवर्ति।

मुरारिः अथ किम। कौटिल्यार्थशास्त्रस्य सूत्राणि सर्वाणि दर्शनसूत्राण्यतीत्येव वर्तन्ते किन्तु वैयासिकसूत्रस्य टीकाटिप्पण्यादिभिः वेदान्तग्रन्थराशिः भवति।

माया श्रुत्वा सहस्रधैव विदीर्यते हृदयम्।

मुरारिः मैकालस्य दूरदर्शिता सफलीभूता, सिद्धस्तस्य मनोरथः।

सुरेशः कथमिव।

सुरारिः एतादृशीं परीक्षाप्रणालिं भारते प्रचाल्य तेन परीक्षा-मुद्रालयात् समानाकारा एकपरिमाणा मुद्रा इव पण्डिता निस्कासिता।

सुरेशः प्रागितः कीदृशः पाठ्यक्रम आसीत्।

सुरारिः साङ्गोपाङ्गषडङ्गो वेदोऽध्येतव्यः प्रागितः किन्त्व-धुनैकस्मिन्नेवाङ्गे द्वादशवर्षपर्यन्ताध्ययनादपि तस्मि-न्विषये निष्णातो न भवति। किमाश्चर्यमतःपरम्।

माया कीदृशास्ते छात्राः ?

सुरारिः द्वित्राणि पुस्तकानि स्थापितान्यपि परीक्षायां तानि समग्रमेव न समीहन्ते परीक्षार्थिनः। खण्डमेकमधीत्य समग्रे ग्रन्थे यदोत्तिर्णा भवन्त्याचार्यपरीक्षायां तदा कीदृशी दशा स्यात् विद्यायाः।

गोपालः (साकूतम) भवान् पक्षपातं विधत्ते। आङ्लभाषाया-मपि न हि ग्रन्थः समग्रः पाठ्यते।

माया परीक्षाप्रणालिस्तु तादृश्येव दृश्यते। तस्मात् परीक्षाक्रं-ममेव निन्दितुं पारयति।

गिरिशः यदि परीक्षा परिक्षिप्ता भवेत् योग्यता कथमवबुध्येत। परीक्षैव कृन्तति जाड्यं, प्रचारयति च शिक्षाम्। परीक्षा विप्रलभत इति तु सर्वथा सत्योपलाप एव।

सुरेशः वयं पक्षद्वय एव शिथिलाभिमानाः। किञ्च यथादृष्टं सर्वमनवद्यम।

गिरिशः (गोपालं प्रति) मनसि किं वर्तते !

मुरारिः विद्यादानं करोत्वार्यः !

गोपालः युक्तमुक्तम् । छात्रावाससहितां पाठशालामुद्घाटयामि ।

माया धन्योऽस्ति तत्र भवान् । विद्यादानमतिदानमिति युज्यते ।

गोपालः एतावान् मे मतिविभवः समाजं सेवितुम् । तत्रान्नदानं विद्यादानं च भवति ।

सुरेशः (विहस्य) धनिकवर्गैः स्वास्तित्त्वरक्षणार्थं संसेवितोऽयं पन्थाः । समायातः साम्यवादस्य कालः । वातावरणमेव क्षुब्धं विलोक्य समुदेति कर्मकराणामाशावादः । क्रान्तिरेव तुत्रोटयिषति समाजावस्थाम् ।

गोपालः (सेर्ष्यम्) सत्यम् । समागत एव साम्यवादः । सन्ध्यावन्दनादिकं परित्यज्य ब्राह्मणब्रुवाः नियमादिकं स्नावयन्ति । धिक् कष्टम् । अनया रीत्या "कलौ सर्वे वर्णा द्विजातयः" समभवन् ।

सुरेशः वत्स, गोपाल, गोष्ठे तव भाषणं युक्तं गोष्ठ्यां नहि । वयं त्वां जानीमस्तस्मादेव मर्षामस्ते वाचालताम् । त्यजेदृशं स्वभावं यदि युक्तं मन्यसे ।

गिरिशः अलमलं परिच्छेदेन ।

माया मुरारेरनुयायी खल्वेषः ।

सुरेशः सखि! मुरारिः जानाति साम्यवादं लोकतन्त्रं च, तस्मात् स परामष्टुं पारयति। पुनरेषो वराको गोमय-गणेशः साम्यवादस्य गणतन्त्रस्य चाद्यक्षरमपि न बुध्यते वृथैवाभिनिविशते।

गिरिशः अलमलं विवादेन।

(परिचारिका समागत्य भोजनं सुसम्पन्नमिति निवेदयति सर्वे स्वासनादुत्तिष्ठन्ति)

जवनिका पतति।

इति द्वितीयोऽङ्कः।

तृतीयोऽङ्कः।

(उद्याने वृक्षाधः सुखासनेनोपविष्टौ)

सुरेशः बाले, निशामय। वादप्रतिवादयुक्तवादानां चक्रे परिभ्रमन् मानवेतिहासः क्रमशो विकसत्येव। यवनदेशात् (ग्रीक) डाइलेक्टिशब्द आङ्गलभाषायां समागत इति वदन्ति तद्विदः। तस्यार्थो द्वन्द्वात्मक इत्यवधारय। मूलावस्थायां वादविवाद एवार्थोऽस्यासीत।

इन्दुमती ओम। यवनाः सत्यं निश्चेतुं विरोधिविचाराणां सङ्घर्षं सर्वोत्तमं मेनिरे। किञ्चैकस्यां भाषायां स्थितं पदं कथं सरति चान्यत्र। एतदपि विचारणीयं विद्यते।

सुरेशः भाषाशास्त्रविदो नदीमिव वाग्मतीं गिरं स्वस्थाने सूक्ष्मामपि परस्परसंगमादेव महतीं संजातां भाषां व्याकुर्वन्ति। भाषा देशकालव्यवहारानुसारेण निष्पद्यते। भाषैव परस्परयोः संबन्धं युनक्ति।

इन्दुमती बहवः शब्दा आङ्गलभाषायामपि संस्कृतस्यैव समागता इत्यचकथत् मुरारिः। तथाहि मातृपितृभ्रातृदुहितृप्रभृतीनि भाषारम्भकाणि पदान्येव समानस्वरूपाणि वर्तन्ते। किञ्च सूनुः शब्दप्रयोगस्तु

द्वयोरेव भाषयोः द्वयर्थकेऽपि तुल्यार्थप्रतिपादका विद्यते।

सुरेशः नास्मिन शास्त्रेऽहं प्रभुः। मुरारिरेव जानाति, तमेव पृच्छ।

इन्दुमती अस्माकं विचारं परिमार्जयितुं मुरारिमुपयुक्त-साधनं मन्ये। चिरात् भारतेऽपि "वादे वादे जायते तत्त्वबोधः" एष सिद्धान्त आसीदिति प्रत्यपीपदन् मुरारिः।

सुरेशः मुरारिः सर्वोद्योग इव दर्पस्य, युगागम इव हठस्य, सर्वाधिकार इव यौवनोष्मणो वर्वर्ति।

इन्दुमती गोपालो हृदयमभिमानस्येति विमृशामि।

सुरेशः किन्तु मुरारिः किल सीमान्तदृश्वा शास्त्रस्येति विन्दे।

इन्दुमती उपपद्यते। अहर्निशं स्त्रीस्वातन्त्र्यं खण्डयति सः। तस्मादेव तेन सार्धं विवादः संजायते। कदा भ्राताऽपि तस्य राद्धान्तं समर्थयति।

सुरेशः भद्रे, त्वमसि धनिकस्य पुत्री, स तु पुत्रः। तस्मात् सामाजिकनियमादेव गिरिशो विपर्य्येति प्रक्रियाम्। तव पितुः सर्वस्वे सः प्रभुः। त्वमसि कल्याणि? न तथा। तस्मात् सिद्धान्तो विच्छिद्यते।

इन्दुमती भवते रोचते न वा मत्पक्षः। विवादावसरे नाहं

विभेमि। संजाता चैषा प्रकृतिः, स्वभावो मूर्ध्नि वर्तते।

सुरेशः आत्मगुणावमानिनि, नैतत्परिहार्यम्। कथं गुणमपि दोषमाकलयसि।

इन्दुमती सत्पक्षपातो हि धियां स्वभावः। तस्मादेव भवेत भवद्वशवर्तिनी मे प्रकृतिः।

सुरेशः सम्यगुपलक्षितं भवत्या, श्रुत्वैव ते वादशैलीं दृष्ट्वैव प्रतिभां, हृदयसिंहासने विराजसे देवि, त्वमसि मेऽद्वितीया प्रियसखी।

इन्दुमती यूरोपे स्त्रीणां मैत्री पुरुषैः सार्धं भवति। नरनार्यो-सख्यमहं सम्भावयामि।

सुरेशः तस्मादेव श्रद्धधामि त्वाम्। स्त्रीस्वातन्त्र्यं प्रकटीकर्तुं मया सार्धमत्र समागच्छस्येकाकिनी।

इन्दुमती श्रूयते वहवो विसंवदन्तीति किन्त्वहं न त्रस्यामि।

सुरेशः शरीरनिर्वापयित्रीं स्वतन्त्रतां कम्पितस्वान्तेन को वारयति। न कोऽपि व्यपोहति शारदीं ज्योत्स्नां पटान्तेन।

इन्दुमती किञ्च भ्राता व्यसनविकारेण व्यथां विभर्ति।

सुरेशः गिरिशः प्रगतिं प्रत्यर्थयति, स्त्रीस्वातन्त्र्यं व्याख्याति किन्तु त्वां नियन्त्रयति।

इन्दुमती अहं तावन्न विस्मरामि। (अर्धोक्ते स्वगतम्) समालिङ्ग्य मां जल्पति नह्यत्र दोषो वर्तते इति।

सुरेशः (स्मितं कृत्वा) विवक्षितं ह्यनुक्तमनुतापं जनयति। स्वैरं भणतु। अभिन्नहृदयो जनस्तव समीपे वर्तते।

इन्दुमती (सकटाक्षपातम्) उरसि पातितं वाष्पविन्दुं स्मरामि।

सुरेशः नेदं विस्मरिष्यावः।

इन्दुमती बाढं जाने। ततः किम्

सुरेशः मुरारिगिरिशयो र्विचारधारा स्वसिद्धान्तप्रणाल्यां न प्रवहति। अनयो र्न बुध्यते मनोभावः।

इन्दुमती (निरूप्य) परिहरति परिश्रमः, परिरभते विलासिता। परिप्लवते पराभवः। पराकरोति परापवादः।

सुरेशः मकारत्रयेऽहर्निशं निमज्जति। अहमप्याशंसे मधु मदिरेक्षणे, मदिरामोदिश्वसनोऽस्मि। मात्रयोपयुज्य नाहं विचेतीभवामि। गिरिशस्तु विमुह्यति।

इन्दुमती सुष्ठु निरूपयति भद्रः। कलुषति सङ्गदोषः। समानधर्माणौ स्वः।

सुरेशः स्वबाहुबलान्नार्जितमस्ति मया वित्तम्। इत्थंप्रतिदिनं परिभवति। स्मारं स्मारं त्रासयति समन्ततो विध्वंसः।

इन्दुमती पित्रार्जितानि धनानि वर्तन्ते, पर्याप्तं भवति स्वसुखाभिलाषावयोः।

सुरेशः पिता कुत्र निवसति ?

इन्दुमती कदा ग्राममधितिष्ठति कदा तु मोहमयीम्।

सुरेशः समस्यति मां सखी। अतिप्रश्नं प्रष्टुं प्रेरयति कुतूहलः नान्यथा वित्तर्कयति चेत् सङ्गच्छतां हृदि मे प्रश्नम्

इन्दुमती विश्राणयति प्रणयिने प्राणान् प्रेयसी, किमवगणयसि त्वं माम् ?

सुरेशः प्रसीदतु सखी, मोहमयीं विहाय भारतस्य व्रणमिव वाराणसीं किमर्थमाश्रयति भवती।

इन्दुमती प्रवेशिका परीक्षा तत्रैवादायि मया, भ्राता एम्. ए. परीक्षां वाराणस्यां ददाति, ग्रामस्य व्यवहारोऽस्मिन्नेव प्रान्ते प्रचलति प्राड्विचाकाग्रे तस्मादेव हेतो र्वसामि पठनाय भ्रात्रा सार्धम्।

सुरेशः विश्वविद्यालयस्तु तत्रापि वर्तते किल।

इन्दुमती वयस्य, श्रूयतां तावत्। सर्वे परिवाराः न निवसन्ति सदैव तत्र, बहुव्ययसाध्यः स प्रदेशः। ग्रामोऽप्यासन्न एवात्र, व्ययश्च स्वल्पः, पुन र्व्यवहारार्थेऽवतिष्ठते भ्राता, विचार्यैवं सर्वं वसावः। परीक्षार्थं विभिन्न-स्थले स्थिते द्वयोरेव व्ययो बहु वर्तते। भवता कुत्रा-ध्यगायि ?

सुरेशः प्राक् तु चात्रैवाध्यगीषि, पश्चाद् बहु दुःखं विषह्य कलिकातायामपठिषम्।

इन्दुमतो इतो बहुव्ययं भवेत् तत्र। वणिजामेव श्रेयस्करं नगरं

तत्। तस्य नाम प्रथितमेशियायामपि ।

सुरेशः प्रधानाध्यापकताडनाभियोगान्निष्कासितोऽभवं पाठशालातः।

इन्दुमती किमर्थं ताडयतिस्म तं भवान् ।

सुरेशः वस्तुतस्तु नासीत् तत्र मम कोऽपि दोषः। ममोपरिनिक्षिप्तो दोषभारः ।

इन्दुमती तथात्वे पित्रा न प्रार्थितः किमध्यक्षः।

सुरेशः भर्तृमरणदुःखं विषह्य मातैव पितृतामकरोत्। गर्भे सत्येव मयि पञ्चत्वमाप मम पिता।

इन्दुमती भवतैव न प्रार्थितः किमु ?

सुरेशः निरपराधोऽहं कथं साञ्जलिः स्वापराधमोक्षणाय प्रार्थये। किं विवेचयति भवती। अभ्यर्थनात्तु स्वीकारो भवति दोषस्य। भद्रे! *(सगर्वम्)* गुरुप्रणामेष्वपि स्तम्भितमिव शिरः कथमपि नमति मे।

इन्दुमती साधु, साधु! नागरोऽसि, किञ्च समानशीलोऽसि।

सुरेशः देवि, मालाकार इवोन्नतान् नमयन् कल्पयति साम्राज्यवादी स्वसुखम्।

इन्दुमती प्रिय, समाश्वसिहि। *(निःश्वस्य)* सत्यम्। मूर्च्छन्त्यमी विकाराः प्रायेणैश्वर्यमेतषु।

सुरेशः न खलु साधुसेवितोऽयं पन्थाः येन ते प्रवृत्ताः। किञ्च लौकिकी नीतिरेव व्यवदधाति धनिकवर्गाणां

दोषम्। रुसोप्रभृतयः समुच्छृङ्खलास्तस्मादेव सम-भवन्।

इन्दुमती सखे! त्वमसि वज्रमन्दिरं दर्पस्य। दृष्ट्वा तव प्रकृतिम् (विचारयति)

सुरेशः मा भैषीः "सत्यमेव जयते"।

इन्दुमती (संस्मृत्य) स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः।
समुचितमथवा ते वृत्तिरेवं विधैव।

सुरेशः (विहस्य) आदर्शभूपतेरेवं विधा वृत्तिरिति प्रत्यपद्यत कालिदासः। किञ्च नाहं नरपातः, परन्तु यः किल लोकार्थे परिहर्रति सुखं स स्वस्य हेतोरेव प्रयस्यति।

इन्दुमती सखे, अनुमान्यस्ते तर्कः। दुस्तरे महति पङ्के निमग्ना वयम्। जटिला समस्या, परिस्थितिश्च विकटा, समाजस्य कः स्यात परिमाणः।

सुरेशः बासु, समाश्वसिहि। त्यज भविष्यच्चिन्ताम्। कोऽपि न चात्र प्रभवति समुद्धतु परिस्थितिम। केन कदाधारि वद सुन्दरि?।

इन्दुमती यत्र न पर्याप्नोति मानवेतिहासो विमर्षितुम्।

सुरेशः भूपृष्ठे यद्दिनावच्छेदेन विद्यन्त मनुष्याः, तदापर्यन्त तेषां संजायत इतिहासः, तादृश इतिहासः द्वन्द्वात्मकरूपेणैवेधते। परिवर्तिनि जगति समाज एव कथं स्थिरो भवतीति शक्यते कल्पयितुम्।

इन्दुमती पर्यालोनया कतिविधा अवस्था समतीत्याद्य नीवीवादान्तिके वर्तते समाजः। अतिरिक्तार्घ एवैनं प्रेङ्खयति। अधुनैष मुख्यः प्रश्नः संजातः। अतिरिक्तार्घ एव कर्मकरनीवीपत्योर्युद्ध कारणं भविष्यति। किं मनुते।

सुरेशः एकत्रीभावः संजायत इव लक्ष्यते प्रतिदिनं सम्पत्त्याः। तेनोपमक्रते मध्यवर्गस्य लोपः। निरूपयतु भवती नीवीपतिसंख्याप्यपचीयते।

इन्दुमती किमवलम्व्योल्लङ्घयन्ति वैतरणीं वैषम्य प्रणालिं नीवीवादिनः।

सुरेशः धर्म एवालम्बते वैषम्यम्।

इन्दुमती धर्मं प्रति हि विप्रतिपन्नो बहुविदः केचिदन्यं धर्म माहुः केचिदन्यं सोऽयंमविचार्य प्रवर्तमानोविहन्येत, अनर्थं चर्च्छेत्।

सुरेशः [*विहस्य*] धर्मः प्रसिद्धो वास्यादप्रसिद्धोवा। सचेत प्रसिद्धो नजिज्ञासितव्यः। अथाप्रसिद्धोनतराम्। [*द्वावेवहसतः*]

इन्दुमती यथाविघटयन्ति नीवीवादं कर्मकरा नतथा कृषकाः सङ्घर्षन्ति। प्रत्युत ते सङ्घटयन्ति नीवीसिद्धान्तम्। कीदृशोऽयं मोहान्धकारः स्वल्पेऽस्मि नपर्याप्ते क्षेत्रखण्डे।

सुरेशः स्वार्थान्धकारो व्यवदधाति कर्तव्यम्। नहि हितंविहितं विद्यते तेषां तत्र। तथापि परितोषं परिशीलयन्त्यज्ञानादेवते।

इन्दुमती युज्यते। कृषकोस्तु पाश्चात्यदेशीया एव परिश्रमिणः

सुरेशः वैज्ञानिकदृशा विलोक्यागादि डा. वोएल्करेण भारतीयानां कृषकाणां कर्मणि सावधानता क्षमताच। शिक्षादीक्षारहिता धनधान्यहीना ते वराका चेक्षीयन्ते।

इन्दुमती दोषी कोऽत्र?

सुरेशः अहोरात्रमेव श्रमाग्नौ शरीरं हुत्वा सदैव क्षुत्क्षामकण्ठा खाद्यार्जितुं येचिक्लिषन्ते तान् यदि वयमालस्योपहतान् व्याहरामश्चेद्दोषिणोवयम्।

इन्दुमती बाढ़म्। करतलेनाच्छादयितुमिच्छति समाजः सूर्यमिव सत्यम्।

सुरेशः परद्रव्योभिलाषिणो नैष्कर्म्यसिद्धान्तप्रतिपादका वैडालव्रतिनस्तुन्दिला मठाधीशाः परिश्रमिण इति वञ्चितः समाजो मन्येत।

इन्दुमती तिक्तं चारित्र्यं. चित्वा समाजस्य प्रबध्नोमि प्रबन्धमिवोपन्यासम्। शम्पागोपालयोः स्थितिः उपयुज्यते नवा। तयोश्चरितं गुम्फितुं वाञ्छमि।

सुरेशः प्रथमः कल्पः । विदुषि! ज्ञात्वैव मनोवृत्तिं शम्पायाः ग्रथ्नासि चेद् सुन्दरंभविष्यति ते साहित्यम् । सर्वं स्वं कथं निचायसि ।

इन्दुमती [संस्मृत्य] मायारमयोः मुरारिगोपालयोश्च हृदय मभिन्नमिव प्रत्येमि । मुरारिर्नक्तं दिवं गोपाल हर्म्यं गत्वाऽवश्यमेव शम्पायाश्चरित्रं ध्यास्यति ।

सुरेशः स मार्मिकज्ञो दार्शनिकः ।

इन्दुमती- प्रतिनिवृत्य स्वप्रियायै सर्वं भणिष्यति ।

सुरेशः अनुवर्तिनि कलत्रे च्यवते सर्वम् । अतः सर्वे सुखी-भवन्ति ।

इन्दुमती रमा मायाग्रे स्वकुतूहलं निगूहितं न शक्ष्यति । स्वभावः एव प्रेरयत्येनामित्यालोचयामि । नियोज्य स्वकर्मणि मायां साधयामि सर्वम् । यथास्थितं निबन्धामि सर्वं पुनरेवाहं स्वपुस्तके । किं मनुते, अत्रभवान् ।

सुरेशः मान्यस्ते तर्कः सत्यमाह कविः-
"स्त्रीणामशिक्षितपटुत्वममानुषीषु; संदृश्यते किमुत याः प्रतिबोधवत्यः"।

इन्दुमती (विहस्य) महाभाग, नार्हस्येवं मन्त्रयितुम् ।

सुरेशः त्वमसि विदुषी, पणकचतुष्टयेन विक्रीणीते भवती-माम् । तवाग्रे वयमेडमूकाइव निषीदामः ।

इन्दुमती अवधीरयति मां तत्रभवान् । निसर्गस्वैरिणी भवति महतां भवतांमतिः।

सुरेशः देवि, विभवानुरूपास्ते प्रतिपत्तयः । नाहं सत्यमपलपामि, प्रसीदत्वार्या कः कस्तूरीकामोदं शपथेन निवार्येत।

इन्दुमती तवामृतवाणीं समाकार्ण्य पीयूषनिर्भररस्नातामात्मानं संभावयामि।

सुरेशः सुधारससमुद्गीरन्तीं गिरं श्रुत्वाऽनिर्वचनीयमेवानन्दं जनयति। देवि, कण्ठे हारास्तु तेभाराः । किञ्च यद्युपन्यासं कर्णपथं याय्रात् तदा किं प्रक्रमेत मानसं मे।

इन्दुमती उपन्यासे नायिका चरित्रचित्रणमेव महत्कठिनं विमृशामि ।

सुरेशः अथकिम् ।

इन्दुमती तत्रैवप्रक्रमते वृत्तान्तः, स्वपिति विरोधः, गाहते मनोरथः, आरभते मर्यादा निवसन्ति प्राणाः ।

सुरेशः (विचार्य) वाढम् । प्रेरयतिपरिचयः, पारयतिपरिणामः, सङ्केतयति प्रक्रिया, सूचयति प्रतिष्ठा यत्र। किञ्च प्रयत्नोऽपि प्रयस्यति प्रतापोऽपि तप्यते, प्रयोगोऽपि युज्यते, प्रीतिरपि तृप्यति सत्काव्यनिबन्धे।

इन्दुमती यदि द्वित्रा जनाः पठित्वा नस्पन्दन्ते चेन् किंतेनकाव्येन ।

सुरेशः किन्त्वधुना सर्वे श्वानइव भषन्ति कवयः। मनुष्यणां हृदयदौर्बल्यं मुद्रणाय त्वरयति । सर्वत्रैव दरिद्दृश्यते दारिद्र्यस्य प्रभावः। अथवा अधीत्यतेषां कृत्यं को लाभो-लोकस्य। येषां सदैवान्तर्द्वन्द्वः हृदयं नप्लोषति सोऽपास्यतिभावनां तथात्वे किंलिखति काव्यम्।

इन्दुमती सत्यम्। यस्मै रोचते लेखनं स स्वानुभवमेव समुदाहरेत्। किन्त्वन्तर्द्वन्द्वेन मम मानसभपि नक्लिश्यते, केवलं वादप्रतिवादाधातमनसा नक्षम्यते निमील्याक्षिणी क्लेशजालम्।

सुरेशः युज्यते। अवगच्छति सखो साम्यसमाजवादादिसिद्धान्तान् (*स्वगतम्*) गृहीतानया पन्थाः साम्यसमाजवादयोः संघर्षस्य। (*प्रकाशम्*) निपुणात्रभवती स्वभाव प्रख्यापनाय।

इन्दुमती (*स्वपाण्डित्यं प्रख्यापयन्ती*) मोहनो गान्धिवादशंद्वोदभैषीत्। किन्तुलोकः सङ्कटयति। अधुनैव यदिमन्नाम्नि संयुज्यसंघमेव रज्यते संप्रदायेचेत ममावसाने संकटावस्थायां यँगइण्डियायां हरिजनपत्रिकायाश्चोत्तरमन्विष्य विवादे शप्त्वा प्रमाणार्थं तदेवो-

दाहरिष्यन्ति। धिक्कष्टम्। तथात्वे ममशरीरेणैव सार्धं सर्वाणि ममलेखानि दग्ध्वाभस्मसात् विदधीरन् इति मोहन दास एकदा व्याहार्षीत्।

सुरेशः अन्ये स्वसिद्धान्तं प्रचारयितुं यतन्ते, किन्त्वसौ सङ्गोपयति। विमुह्यति तस्याग्रे दुर्जनानामप्युपद्रवः। महात्मानां प्रभाव एवावगमयति शान्तिमहिंसाञ्च।

इन्दुमती प्रत्येति तत्रभवान्? (विहसति)

सुरेशः यद्भवतु। वन्दनीयोऽसौ। अमृतत्वं मृत्युनादायितस्मै। भारतीयदर्शनोनुसारी यायावरः खल्वेष। दर्शने राजनीतिं संयोज्या भैत्सीत भारतस्य वन्धनशृङ्खलाम्। किञ्चाध्यात्मिकोन्नतौ सत्यमहिंसामीश्वरमेव साधनमित्यंमंस्त।

इन्दुमती खलूक्त्वा। तस्यसिद्धान्तः समाजे न प्रचलति। यदा मानवो गुणातीतो भवति तदैवतस्य सिद्धान्तं निर्विशति। परन्तु स्थितप्रज्ञानां समाजः नासीत्पूर्वं न साम्प्रतं विद्यते नपश्चात् भविष्यति। स प्रवाहमेव प्रत्यावर्तयितुमीहते। सभ्यताघटीयन्त्रस्य हस्तमेव सहस्त्रशताद्विपूर्वमपकर्ष्टुं यतते यतिः।

सुरेशः (स्वीकृत्य) सत्यम्, सुन्दरि, निरूपयसि समाजावस्थाम्। यान्त्रिकेऽस्मिन् वैज्ञानिकयुगे परित्यज्ययन्त्रं

स्वात्मनिर्भरग्रामनिर्माणे पूर्ववत्तुरीवेमादिकमेव कथं स्वीकुर्महे।

इन्दुमती श्रीनेहरूरपि तंराद्धान्तमुत्सृज्य यान्त्रिकोन्नतौ बद्धपरिकरोवर्तते। भारते तस्यानुयानिनस्तु विद्यन्ते बहवः गान्धिशिरस्त्राणवन्तः किन्तुते कलुषितं स्वार्थं सङ्गोपयन्ति तस्मिन्। चन्द्रचूडोऽपि गान्धिमतं श्रद्धत्ते किंसोऽपि स्थगयति बाध्येयम्।

सुरेशः नाहं महाशयं चन्द्रचूडं विप्रतिपद्ये। स समाराधति समाजं दिवानिशम्।

इन्दुमती तस्य रामराज्यकल्पना विफलतामगमत्। भारतस्य विभाजनमेवासामर्थ्यं प्रकटयति खण्डयति चाहर्निश-मैक्यम् (*संस्मृत्य*) विभाजने देशस्य याहानिः सम-पद्यत सा केन वर्ण्यते। तस्याहिंसात्मक प्रयोगो भारताय स्वातन्त्र्यं व्यश्राणयत् इतितदनुपायिन प्रख्यापय-न्ति। किन्तु साम्यवादप्रसरणभियाऽहायि आङ्ग्लैः। परिस्थितिरेव परिमाति प्रयोजनम्। विभाजनावसरे संजाता यदि हत्या अहिंसा स्यात् पुनः पुरातनी हत्याऽपरिगणितास्यात् तदा तस्या व्याख्यापिनैव युज्येते। सोऽहिंसामपि व्यावृणोत् परिस्थित्यनुसा-रेण। (*विहसति*)

सुरेशः यद्भवतु। भारतीयानां हृदये जागर्तिगान्धिनाऽनायि। तत्रनाहं विप्रतिपद्ये ।

इन्दुमती किन्तु स इतिहास आर्थिकव्याख्यायां विश्वासं न ह्यादत्ते। आर्थिक परिस्थितेर्निधारणशक्तावेव विश्वासं नसमधिगच्छति। अयमेव तस्यनूत्नो रहस्यवाद इतिसंभावयामि ।

सुरेशः गान्धिमतानुसारेण समाजं संचालयितुं सुकरं नविद्यते। किञ्च यः परमेश्वरं श्रद्धधाति सोऽवश्यमेव प्रत्यूहति निर्धारण शक्तिम्।

इदुमती सर्वोत्कर्षे समानोवसरं लोकाय सर्वोदयो वितरतीति-स्वीकरोति। आदर्शे रामराज्ये नृपरङ्कयो स्थानमधिकारञ्च सुरक्षितो भवतीति मोहनो विविनक्ति। आदर्शोऽन्यो वस्तुस्थितिरन्या। आदर्शेन नप्रचलति सामाजिकोस्थितिः। कल्पनाप्रधाने राद्धान्ते नभवति सत्स्वरूपं परिस्थितेः। (*विहस्य*) परिणीयापि ब्रह्मचर्यार्थमुपदिशति। परिहासविजल्पितं वा सत्यमेवावधारितं संशये।

सुरेशः असंभवमपि भावुकोऽनुमनुते। समाजस्य स्वरूपमधीत्य वर्तितव्यमासीत्। परन्तु भारते प्रवीणो दर्शनिकः, निपुणो राजनीतिज्ञः स्वसिद्धान्ते दृढ इत्य-

स्मिन् न कस्यापि विप्रतिपत्तिः। सर्वे महात्मानं मोहनं विश्वसन्तिस्म। सिद्धान्तं केचन विश्रमन्ते निर्विद्यन्तेच। यदा शत्रवः शक्तिहीना स्ततदा दयते पुनर्यदाव लबन्तस्ते तदा संप्रहरते प्रक्रियैव तस्य विस्मेरयति।

इन्दुमती ममोपन्यास दर्शनात्तु तस्य हृदये महद्दुःखं स्यादिति-चिन्तयामि।

सुरेशः (सस्मितम्) तवगुरवोऽपि तं स्वसिद्धान्ताद्वि-चालयितुं नशक्ष्यन्तीति विचारयामि। स सर्वान वादान् याथातथ्येनाज्ञासीत्। तं स्थितप्रज्ञमूहतां भवती।

इन्दुमती (सेर्ष्यम्) अभिनिविशसे।

सुरेशः प्रिये, नाहंमोहं ब्रवीमि। तवोपन्यासे कोविषयः प्रतिपादितो वर्तते तंश्रोतुं कुतूहलिमेमनः प्रक्रमताम्। प्रकृतमनुसर।

इन्दुमती स्वमेव विदोक्य तं समालोचतु।

सुरेशः तव प्रत्ययोऽयम्। प्रतिपादितो विषयस्तु विलोकये। किञ्चाधुनानायिकास्थानं कयाऽधारि भण भद्रे।

इन्दुमती (विहस्य) अत्मनैव।

सुरेशः सत्यम् वा परिहासः।

इन्दुमती (हस्तेनहस्तं गृहीत्वा) सत्येनशपे ।

सुरेशः (सहर्षम्) भाग्यवन्तोवयम्। प्रच्छन्न रूपेणकान्ते राख्यायिकां पठामः । तवात्मकथा क्रान्तिमयी भवतीतिसदाऽन्वीक्षित एव ।

इन्दुमती प्रतनुगुणा ग्राह्याणि कुसुमानीव भवन्ति सतां मनांसि

सुरेशः (स्वगतम्) कःखलु नायकस्थाने निक्षिप्तो भवेत्। (प्रकाशम्) देवि, विज्ञप्यं किञ्चिदस्ति ।

इन्दुमती छन्दतः । तवाग्रे संगोप्यं ममाद्यापि किंविद्यते ? तव मनसिवचसिचैकरूपता चकास्ति । येनामिधीयसे, श्रूयतामप हृतास्मि तवामुना गुणगौरवेण ।

सुरेशः वासु, मयाप्यैच्छि धनिकसन्ततिः किन्तु त्वमसि तृप्तिरिव समाजस्य, रसायनमिव तारूण्यस्य मूलकोषमेवलावण्यस्य, ज्योत्स्नेव प्रणयचन्द्रोदयस्येति त्वा मनुसन्धे ।

इन्दुमती (हस्तेहस्तं निधाय) कवयितुं प्रवीणोऽसि । अणुरपि सृणिरिव, हूँकारइव क्रान्तेः ओंकारमिवशान्तेः मित्रं मृत्योः अपत्यममृतस्य भूमिरसिसमाजमनोरथाम् । प्रिय जाने त्वाम् । प्रीत्या प्रतिसरा विधेयाऽस्मिते । किंवक्तुमना असि ब्रूहि ।

सुरेशः कटाक्षमिवकालरात्रेः त्वयि कथं नसनेत पक्षपाति

हृद्यंमम । प्रीतय इवहृदयमपहरसि पदे पदे । तस्मिन् नायकः कः संजायते इतिश्रोतुमतिपरवानस्मि ।

इदुमती (*लज्जते*) किमर्थम् ?।

सुरेशः यद्यपात्रमस्मिचेत्तूष्णीमास्व ।

इन्दुमती मुधैव ताम्यसि । किमर्थ दुनोषि माम् ।

सुरेशः सखि, भवदुपकृतिं बहुमन्वानोऽयंजनः कथं भवत्या सह विमनायेत यस्या अनुकम्पया जीवनमालम्बते । वृत्ति विरहता अहर्निशं दुनोतिस्वान्तम् ।

इन्दुमती नह्याशंसे प्रशंसामस्मिन्कर्मणि, श्रद्धयादेयम् संविदादेयम् ! अहंतुवदानि मनुष्याणांकर्तव्यं विचार्य देयमेवेति निर्व्वापयामि ।

सुरेशः कर्तव्य परायणे, देवि स्वर्गनरकविषये नविश्वासिमि तस्मादेवाहंत्वांस्वर्गादवतीर्णां वक्तुं नप्रभवामि किन्तुत्वमसि समाजपङ्कादुत्पन्ना कमलिनी यद्वा भूतलाधिष्ठात्री महाशक्तिर्महादेवी (*वाष्पगद्गदं तूष्णीमास्ते*)

इन्दुमती इतः परमपि किंभवेत् ? (*साश्रुनेत्रा मुखंपिदधाति*)

सुरेशः (*धैर्यमवलम्ब्य*) प्रिये, सर्वं नयनेनिमील्य सोढव्य ममूढेन मर्त्यधर्मणा । (*द्वावेवपरस्परं मुखमवलोक्यदीर्घं निःश्वासं कुरुतः*)

इन्दुमती प्राणेश्वर, अयस्कान्तेन लोहमिवाकृष्टास्मि तव धैर्येण।

सुरेशः प्रियतमे, नाद्यैवत्वं परिचितासि। त्वमसि बन्धन निर्मुक्ता स्वतन्त्रतायाः प्रतिमा।

इन्दुमती प्रिय, आकर्ण्यताम्। अस्यां तारूण्यावस्थायामह बहुभिस्तरूणैः सार्धमधैषि तथारंसि। त्वयासाक मात्मासम्पृणक्ति। विम्बहुना, उद्धृतास्भि क्रूरसमाज पङ्कात्।

सुरेशः त्वया सर्वेलोका आनन्द्यन्ते।

इन्दुमती नसम्यगध्यवसितं प्रियेण, मानसमन्दिरे केषामन्येषां चित्रंनह्यालम्ब्यतेऽधुना।

सुरेशः (निः श्वस्थ) अनुगृहीतोऽयंजनः। निर्धने मयि तव प्रणय ग्लपयति माम।

इन्दुमती प्रणयस्तु हृदयेन समं निष्पद्यते इत्यधीतं मया, रौप्य खण्डं नाहं कल्पये।

सुरेशः बाढम्। धनिनो नहि प्रेम्णि श्रद्धां निबध्नन्ति। काम पियासाऽन्या प्रणयो ऽन्य एव।

इन्दुमती विलोकय सखे, शम्पां सर्वे परिरभन्ते किन्तु विप्रल भन्ते ते। नस्निह्यति कोऽपितां नसमीहतेच।

सुरेशः मुग्धा सो विधवा बाला विद्यते। चाटुशतैर्वचनै र्वञ्चयित्वां कामुका धूर्ताः स्वार्थरता स्ते लोककण्टकाः क्रमयः जरयन्ति दिवानिशं ताम्।

इन्दुमती मनोभवाग्निस्तांमालतीकुसुमिव म्लानिमा नयति। ममैष पिण्डितार्थो यदि साबिवद्देत् तदा केऽपि नालुञ्छन्।

सुरेशः अस्थिचर्ममयीपुत्रिका सा कथं दुर्दमनं मुनिमनोहारिणं मन्मथं वशीकर्तुं प्रभवतु। सत्यम्। सन्दीपयति यौवनं मनोभवाग्निः।

इन्दुमती (सखेदम् समाजस्य बन्धनंत्रुटित्वा स्वच्छन्दं विहर्तुमपि नैव शक्नोति वराकी। शिक्षाभावात् कर्तव्याधिकारौ नोपयुङ्क्ते भिया सदैव स्वान्तं परिप्लवते।

सुरेशः सुकुमारपाणिपल्लवं, प्रस्फुटितरोदनं, सद्योजातं शिशुं प्रसह्य कण्ठंप्रगृह्य तादृशा व्यथिता, प्रमापयन्ति यदा, तदा मातृत्वमेव मूर्च्छति। नवजात रुधिरेण रक्तां भूमिं प्रक्षालयितुं नक्षमते सागरः। बद भामिनि, कस्यदोषोऽयम्।

इन्दुमती (उच्चैः स्वरेण सरोषम्) समाजस्य। नात्रसंदेहावसरः। (सास्रम्) कानीना व्यासकर्णकाइष्ट प्रभृतयोऽद्यावधि तर्पयन्त्येव ब्रह्माण्ड मिति किमिदं विस्मृतं भवेत्।

सुरेशः द्ररिद्रति सर्वे कथं जाग्रतु विद्याः। पठित्वाऽपि सदैवाहं कि द्ररिद्रामि, कथमनया दिशो विभर्मि

प्रागान्, त्रिकालावच्छेदेनैव दरिद्रस्तु दरिद्र एव। विषीदामि लोकसंग्रहं पश्यन् ।

इन्दुमती सत्यम। साधुरदरिद्रः, द्रविणवानखलः, मुनिररोषणः सेवकः सुखो, कितवः कृतज्ञो जगति दुर्लभो भवति।

सुरेशः कष्टा च सेवा, विषमञ्चभृत्यत्वं नच तत्रमे पूर्वज प्रवर्तिता प्रीति किञ्च नीवी साध्यंच वाणिज्यं निन्द्यं च प्रयोजनं नच यत्र मे विद्यते स्वीकृतिः ।

इन्दुमती हृदयोद्भिद्यमानदर्पाङ्कुरस्त्वमसि ।

सुरेशः अवजानामि मानिनि, धनोष्मणा म्लायत्यलं लतेव मनस्विना ।

इन्दुमती गृहदाहे नहि वह्निरपराध्यति । अधीत्यार्थशास्त्रं विलोक्यार्थिकपरिस्थितिं द्वेक्षि कथमर्थम् । संपत्कणिकामपिप्राप्य तुलेवलघु प्रकृति, रेवायात्युन्नतिम्। धनस्य दुरुपयोगेन प्रमाद्यन्ति ते । विज्ञानं वित्तमित्यवधारय सखे! ।

सुरेशः आर्थिकींप्रणालिमेव मार्जितुं मीमांसे। *(सरोषं वेपित्वा)* धनश्रद्धया क्लेशानुपार्जयतः, निरूच्छ्वासं म्रियमाणस्य, जठरपरिपूरणमात्रप्रयोजनजन्मनो मांसपिण्डस्य, गर्भरोगस्य मातुः किं प्रायश्चित्तं, का प्रतिपत्तिक्रिया, कृगतस्य शान्तिः, कीदृशं जीवितं,

क: पुरूषाभिमानः किंनामानो बिलासा कीदृशी भोगश्रद्धा। प्रिये, नाहं सेवया परपीडनया वा समीहे वित्तम् (*दन्तैर्दन्तान् संघट्टयन्*) प्रवलपङ्क इव सर्वमधस्तान्नयति दारूणो दासशब्दः।

इन्दुमती (*सस्मितम्*) हृदयानुरूपो मे नायकः। (*लज्जते*)

सुरेशः सत्यं भण भामिनि, किमन्त्रयसे हृदि।

इन्दुमती अन्वीक्षताम्।

सुरेशः अभ्यर्थये संशयच्छेदि वचनम्।

इन्दुमती (*अङ्गुल्या सुरेशं निर्दिश्य*) त्वमसि हृदयबन्धो! जीवनोपन्यासे न्यस्तो नायकः। इतः परमपि किं व्याकरणीयम् विद्यते।

सुरेशः (*सगद्गदम्*) प्रेममञ्जूषाया कुञ्चिका त्वद् हस्तात् प्राप्ता मया। धन्योऽस्मि, स्वतन्त्रता देवी तत्रभवती समाश्लिष्यति माम्। यद्यपि पुस्तके प्रणयपात्रमभवं तदपि महत्पुण्य फलमेवोन्नयामि।

इन्दुमती सर्वं विलोक्य स्वचारित्र्यं संशोधयितुं प्रार्थये। हिटलरः स्वसंघर्षमघोषीत् पुस्तके, सत्यसंकल्पोऽभ्राजिष्ट बिनष्टश्च पश्चात्।

सुरेशः तथास्तु। (*पादयोः प्रणिपतति*)

इन्दुमती नमाननीयेष्यात्मानमपराधयिष्ये। (*उत्थापयति*) तस्मिन् साफल्यं निष्पद्यता मित्यभिनन्दामि।

सुरेशः निर्धने वृत्तिहीने मयि विधाय प्रेम भवत्या अऽत्याहितम्। त्वंहि तृप्ति रेव तारूण्यस्य पृथ्वीतलनिवासीनी मुक्तिरूपा (*सवाष्पकण्ठमास्ते*)

इन्दुमती त्वमप्यसि साकार इव साम्यवादस्य। प्रियतम, धीरस्यापि धार्ष्ट्यँ मारोपयति हृदयलघिम लङ्घितमति वल्लभत्वम्। किञ्च वृत्त्या नसंलक्ष्यते योग्यता। यो वैज्ञानिकसमाजवादं प्रकटीचकार तादृशो महात्मा कार्लमार्क्सो नाप्नोत् वृत्तिं लोकेऽस्मिन्। स्वार्थान्धनीचपतितानां न्याये तथैव भवती त्यनुजानोमि।

(द्वावेव वाष्पं विसृजतः)

सुरेशः (*वाष्पं प्रमृज्य*) प्रिये! ममज्योतिर्मार्गान्निः सृता वाष्पबिन्दव एते संधुक्षयन्ति संसारं, प्लुष्यन्ति समाजम।

इन्दुमती युज्यते। कालकूटमप्यतीत्य भविष्यति।

सुरेशः कालकूटं शिवः पपौ, कः पास्यति पुनरेनम्। चण्डि, शृणु सर्वम्।

इन्दुमती सावधानास्मि।

सुरेशः (*निःश्वस्य*) देवि, पितृमरणावस्थायां गर्भे एवासम्। असह्य दुःखं प्रसह्य मृता मे माता नाहमरुदं तदा,

त्रिदिनपर्यन्तमभुक्त्वा भोजनं, परीक्षां दातुमगमं तदा समाश्लिषत् मां मूर्च्छा परीक्षां दत्त्वा प्रतिनिवृत्य तदापि नारोदिषम्। किंबहुना, कति सहृदयोः सखायः कालकवलिताः कानि स्युर्दुःखानिमयानोप्तानि सर्वं श्रुत्वा "अपिग्रावारोदित्यपिदलति वज्रस्य हृदयम्" परन्तु नाहमरोदम्।

इन्दुमती (*अश्रूणि प्रमृज्य*) सत्यम्। प्रताप सहायाहि सत्त्ववन्तः।

सुरेशः तव प्रीति रुन्नयति मामुपरि तवप्रणयं प्रत्युपकर्तुं भीष्मप्रतिज्ञां करोमि। तव सिद्धान्तं हृदि निधाय सहर्षं मर्तुं शक्नुयाम्।

इन्दुमती प्रिय प्रत्युपकारे दुष्प्रवेशास्तु भवन्ति धीराणांहृदयावष्टम्भाः।

सुरेशः (*छन्दतः*) मृत्योर्बिभेषि किं बाले! न स भीतं विमुञ्चति।
अद्य वाब्दशताब्दे वा मृत्युर्वै प्राणिनां ध्रुवम्॥
मादृशास्तु निरभिलाषा भवन्ति जीवितव्ये।

इन्दुमती संवर्धिता मे प्रीतिरमुना दृढसंकल्पेन।

सुरेशः सखि, कलमोवरं क्षणमपि कृता मानवता मानवता नमतो नमत स्त्रैलोक्याधिराज्योपभोगोऽपि मनस्विनः।

इन्दुमती त्वमसि अरणि रमर्षाग्नेः, जलेऽपि ज्वलन्ति ताडितास्तेजस्विनः।

सुरेशः धनिनो न निचायन्ति सत्स्वरूपम् । श्रियो हि दोषान्धतादय कामलका विकाराः ।

इन्दुमती (वैलक्षण्यं निरूप्य) प्रतिपद्ये ।

(दूरत श्चन्द्रचूडं विलोक्य स्वविषयंविहाय सुरेश आकारयति)

चन्द्रचूडः (समागत्य उपविशति) वयस्य, कथमत्र भवान् ? ।

इन्दुमती स्वागतं भवते ।

चन्द्रचूडः (साश्चर्यम्) अहो ! भवती कथमत्र ?

इन्दुमती सखे, निरुद्देशिनावावामिति जानात्येवार्यः । पुनरपिकिं व्याकरणीयम् । किमर्थ मिहागतो भवान् ? ।

सुरेशः भद्र, अत्रावयोः समभागा मतिः । किं भवानुदासीन इव लक्ष्यते ।

चन्द्रचूडः देवि, विमानावरोहणस्थानं द्रष्टुं समागतोऽस्मि । (सुरेशंप्रति) मित्र, नाहं भवन्तमपि प्रसन्नं मन्ये । (स्वगतम्) अद्य वेदनां वेदयतेऽस्याः व्यवहारः। (प्रकाशम्) श्रीमति, भवत्तुल्य एवायंजनोऽवधोरयतु कर्मव्यग्रो नाहमपि, शम्पायाः लक्षवर्तिनीराजनोत्सवे वयमप्यामन्त्रिताः स्मः । भुक्त्वा, पीत्वा भ्रमणार्थमितस्ततो पर्यटामि ।

सुरेशः (सस्मितम्) गोपालभगिनी सैव रण्डा शम्पा ?

चन्द्रचूडः ओम्। सैव विधवा ।

इन्दुमती: कुतः प्रचलिता स्यादेषा प्रथा, श्रमतैलकार्पासादीन् निरर्थकं प्रज्वालयन्ति कीदृशी महती क्षतिः। यदि तै स्तन्तुभिर्वस्त्रं निर्माय दीयेत दीनाय,दिने प्रज्वालित दीपादधिकतरो भवेत् समाजस्य लाभः ।

चन्द्रचूडः (*सस्मितम्*) विद्युद्दीपाभावे प्रचलिता स्यादेषा प्रणाली । तयापिघनतिमिरे पथि पथिकानां सहायता प्रदत्ता स्यादिति विन्दे । कृतेकिं न संजायेत । अस्यां निर्धनावस्थायां, वस्तुनो महार्घतायाश्च धूमपानं विधाय क्षिप्त्वा धनानि, स्वदेश माहत्य निर्दिशन्ति स्वाज्ञानोन्मादम । कर्म्मण्यस्मिन् नीराजने विद्यते पुटपाको धर्मस्य, धूमपानेन तु रोगं नहरति नभरति चोदरञ्च । धिक् कष्टम ! ।

सुरेशः मित्र, विशदस्ते तर्कः, गाढान्धतमसि यःसञ्चरति सकर्थं विस्मरिष्यति दीपदानमाहात्म्यम् । किञ्च, सर्वं विदित्वाऽपि नाहं प्रभवामि त्यक्तुधूमपानम। विद्वानपि श्राम्यति स्वभावाभ्याससमीपे ।

इन्दुमती: असक्ताऽस्मि बह्वोः कालात्।

चन्द्रचूडः नसांदृष्टिके न चोदर्के हितमावहतीदमिति भवन्तौ जानीतः।

सुरेशः बाढ़म् ।

चन्द्रचूडः आबालवृद्धवनितादयः सेवन्ते किमर्थम् ?, ग्रामे ग्रामे, नगरे नगरे धूमपानं दर्शं दर्शं स्वान्तं लुञ्छति ।

इन्दुमती नहितं निहितं तत्रेति ज्ञात्वा हातुं नोहं शक्नोमि ।

चन्द्रचूडः देवि, मनोजयति योजयति ब्रह्माण्डमिति श्रद्धातु । सत्यसंकल्पाः किं नाम न कुर्युः । सेनापतिः चूतेहः सकृदेवात्याक्षीत् अहिफेनम्, वैद्यैर्मुहुर्मुहुः भोक्तुमवाचि तथापि न स्वीकृतं तेन । तस्यासीत् ललाटपट्टे लिखितं चीनसाम्यवादस्य सेनापतित्वं दृढप्रतिज्ञः सत्यसंकल्पोऽवर्तत ।

सुरेशः महार्घतया, तथा स्वस्थाभावादपि निरस्यामि प्रसह्य । हातुं शीघ्रं प्रयते ।

इन्दुमती अनुरागोऽनुरागेण परीक्षितव्यः, त्वामभिनन्दामि प्रतिजाने प्रतिज्ञाम् ।

चन्द्रचूडः (*हस्तौ प्रसार्य*) स्वीकरोमि भिक्षां धन्यवादार्हौ युवाम्

इन्दुमति (*विमृश्य*) सखे, त्वमसि निपुणो भिक्षुकः । मात्रा मुहुर्मुहुः भर्त्सितेऽपि मया नात्याजि धूमपानं, किन्त्वधुना त्वद्वचनात्सपद्यवात्याक्षम् ।

सुरेशः (*विहस्य*) ममानुनयोऽधारि इति तर्कयामि ।

चन्द्रचूडः (*सहर्षम्*) आध्यात्मिकोन्नतिं प्राप्तुं विलासमयजी-

वनं परित्यज्य साधारणजीवननिर्वाहे यतनीयमित्य भाषत महात्मा गान्धिः ।

(सुरेशेन्दुमती परस्परं मुखं पश्यतः)

इन्दुमती महाभाग, आवश्यकवस्तु न्यूनीकरणसिद्धान्तं व्युदस्यामि । आवश्यकतैवाविष्कारजननीति शंसन्ति ।

सुरेशः *(अनुमोद्य)* विद्युत्विमानध्वनिप्रसारणयन्त्रादयः निरूपयन्त्यावश्यकस्य फलमिति ।

चन्द्रचूडः किंस्वित् विज्ञानप्रसादो ध्वंसयति विश्वम्, विषयासक्त्या बुद्धेर्विनाशो भवति । महाशनमहापाप्मानौ कामक्रोधौ व्यपनयतः सर्वम् ।

इन्दुमती *(विहस्य)* आधुनिकसमाजावलोकनेन विज्ञानं द्वेष्टुं न युज्यते । जडपदार्थाः साधनीभूताः सन्तश्चेतनैः यथोपयुज्यन्ते भवन्ति तथा न च वह्निरनुष्णः संभवति । तेषां स्वो भावः स्वभाव एव ।

चन्द्रचूडः *(मन्दं मन्दं वदति)* जडवादनिमग्नामेनां मुधैव व्यवस्यामि स्वसिद्धान्ते समानेतुम् । आङ्ग्लशिक्षादीक्षया चरमावस्थापन्ना तरुणी खल्वेषा । एतादृश्यः संपद्यन्ते बाहुल्यता चासां संभविष्यति । आर्यसंस्कृतेर्ह्रासः समीपे समागत इव संभावयामि । हूणशक-

यवनम्लेच्छादयः परिपन्थिनो भूताः किन्तु मूलमेव-निकृन्तति साम्यवादः । (स्वगतम्) जडवादग्रथित-मानसौ द्वावेवेमौ यथेच्छं विहरतः सतीत्वस्यास्तित्त्वं कथं वर्तेत । आदर्शः संस्कृतिश्च नाभिजानीतः किमपि। (प्रकाशम्)चरित्रस्य स्थानं विद्यते न वा विचारधारायां तत्रभवत्याः ।

इन्दुमती अस्मद्विज्ञानवादे तृषितोऽपि जनः न पिबति जलं-मलीनम्। स्वच्छं जलं पात्रे निधायैव पिबति । विमृशतु-व्यपदेशमाविलयितुं नाहमपीहे। अस्माकं लक्षम-न्यदेव भाग्यम ।

सुरेशः (अपवार्य)त्वमेव भण, मित्र, त्वमसि स्पष्टवादी कुत्राद्य वर्तते सतीत्वं कस्मिन् विद्यते संस्कृतेरनुरागः। संस्कृते-रपवरके साधयन्ति स्वार्थम् । त्वया ग्रामः पवता-श्चागामि नगरञ्चैक्षि ।

चन्द्रचूडः अत्यन्ताभावस्तु नास्ति।

सुरेशः सखे, सर्वमचिरेण भविष्यति । वैज्ञानिकार्थिक-प्रणालीं विधाय समाजस्य निर्माणस्त्ववश्यंभावी तथात्वे जीर्णशीर्णसंस्कृतेर्नामापि नैव ग्रहीष्यति। वैज्ञानिकसाम्यवादवज्रप्रहारेण भस्मीभवति रूढि-वादः ।

इन्दुमती (*विहस्य*) प्राच्यसभ्यतायां वर्धिता पोषिता, पाश्चात्य-भाषाप्यनभिज्ञा शम्पा किं सतीधर्मं विश्वसिति । भणतु भद्र ! ।

चन्द्रचूडः न सा सती, तां सतीं कथित्वा वादं जेतुं जिह्रेति मे जिह्वा ।

सुरेशः तथात्वे किमर्थमाचरति सा धर्मम् । कः प्रभवति धर्मस्य रहस्यं ज्ञातुम् ।

चन्द्रचूडः एषा वराकी पापं प्रच्छादयितुं कल्पयति धर्माडम्बरम् । आवृणोति धर्मं स्पर्धा, लोकैषणां हातुं महात्मानोऽपि न पारयन्ति । नियंन्त्रयति पण्डितानपि लोकैषणादिः ।

इन्दुमती निराकुर्वे प्रच्छन्नपापम् । (*वैलक्षण्यं दर्शयित्वा*) कीदृशोऽयमत्याचारः ।

चन्द्रचूडः (*सस्मितम्*) न कोऽपि जनः समर्थयति प्रप्रच्छन्नपापम् । अस्य बीजमित्थं वितर्कयामि । यौवनोष्मणा दन्दह्यमाने हृदये स्वकामपिपासां तर्पयितुं चेक्रीयते प्रच्छन्नपापम् । दुर्मनोरथ आत्मानमेव निगिरति । यदाऽधर्मः स्वान्तं ज्वालयति तदा यतन्ते कठोरतपसि । अर्थवादवाक्यश्रवणान्निश्चितार्थास्ता विस्रम्भन्ते तस्मिन् । यदि वेश्यादयोऽपि भगवन्नामकीर्तनप्रभावात्परमं पदं प्रापुश्चेत्

वयं जारनिरता तत्पदं नाप्नुम; इत्येवं मनसि निधाय प्रक्रमन्ते धर्मम् । (स्वगतम्) "यन्मे माता" इति-मन्त्रदर्शनात् प्रागपि स्त्रियः स्वैरिण्य आसन्निति कल्पितुं शक्यते ।

सुरेशः मुरारिस्त्वधुनाऽन्तरङ्गः संजात इति श्रूयते ।

चन्द्रचूडः तद्वारेणैवाहं निमन्त्रितोऽभवम् । सो विवदितुं प्रारभत, नाहं स्पृहयामि वेदान्तस्य शुष्कविवादाय न मह्यं रोचते परप्रतारणम् ।

इन्दुमती सत्यम्, त्वमसि समाजधुरंधरोऽग्रगामी भटः ।

चन्द्रचूडः कथमहं स्यामग्रगामी तव सिद्धान्ते, नाहं स्वैरं चरामि । एतादृशोऽहं कथमुन्नयेयं समाजम् ।

सुरेशः (सादरम्) किमर्थमभिनिविशसे, त्वमर्हतां प्राग्रसरः स्मृतोऽसि ।

चन्द्रचूडः सुखमनुभवामि सेवायाम् । समास्वादितं तत्र धर्म-रहस्यम् । सत्यं परामृशामि "परोपकारः पुण्याय पापाय परपीडनमिति । आदर्शस्तु सङ्केतयति मामभीक्ष्णम् । स्वध्येये नक्तंदिवं धावितुं प्रयस्यामि किन्तु ग्लपयति परिस्थितिः

इन्दुमती भावनया पूर्यते नोदरदरी । दिवानिशं परोपकाराय धावित्वा कथं बिभर्षि प्राणान् । तव परिवाराणां कः

किलार्थिकक्षतिपूरणं कामयते कथमाशास्ते भवाने-ताद्दश्यां परिस्थिताविदं सम्भविष्यतीति।

चन्द्रचूडः "काकोऽपि जीवति चिरंञ्च वलिञ्च भुङ्क्ते" इति न विस्मरामि किञ्च नोद्वहामि च।

सुरेशः मित्र, प्रकृतिमेव निन्दितुमीहसे। अर्धाङ्गहीनो जनो भारं वोढुं कथं प्रभवेत् समाजस्य। यदि रमा त्वामातुरावस्थायां न शेश्रोयेत तदा काः गति स्यात्। विचारय सखे, अगामि दुःखं वा सुखं हृदयमेव समर्थीकरोति।

चन्द्रचूडः *(संस्मृत्य, शिरो नमयित्वा)* परमेश्वर एव पालयति, स सर्वेषां प्रभुः। संज्ञायमानदुःखचिन्तया नोपरमामि मरणात् प्राक्।

इन्दुमती *(विहस्य)* कल्पनामयं, विषमकारकं, साम्राज्यवाद-पोषकं शोषकं परेशं वदितुं न त्रपते महोदयः। सत्यं शृणु, न त्रायते कमपि सः।

चन्द्रचूडः तत्र किं प्रमाणम?

सुरेशः यतो न दृश्यते सः, नाप्तं केनाप्यद्यावधि।

चन्द्रचूडः बाढम्। तथात्वे परमाणुविध्वंसकयन्त्रेण विश्लिष्टं परमाणुं त्वं न विस्रम्भसे, किम्?। किञ्च रोग-कीटाणून्नपि चाप्रत्यक्षत्वान्न प्रत्येषि।

इन्दुमती यन्त्रसाहाय्यमवाप्य वयं तान् पश्यामः ।

चन्द्रचूडः ध्यानावस्थिततद्गतेन मनसा योगिनोऽपि तं पश्यन्ति। अवाङ्मनसगोचरमतर्क्यं तं वदन्ति तज्ज्ञाः ।

इन्दुमती ईश्वराणामेव कृते परमार्थतो भवेदीश्वरो यदि दरिद्राणामपि स स्यात् प्रभुः तदा न म्रियेरन् ते सदाशनवसनाभावात् । तथात्वेऽपि कथं निर्लज्जा व्याहरन्ति तं विश्वंभरमिति (*हसति*)

चन्द्रचूडः जडपदार्थाश्चेतनाधीना इति नात्रसंदेहः । येषां गतिषु प्रेरणा समागच्छति, परिस्थितिर्विदधाति दरिद्रान् तत्र नेश्वरस्य दोषः ।

सुरेशः पुरापि प्रचलितो विवादः । अस्तीत्येके नायमस्तीति चैक इत्यन्वीक्षन्ते । स्वसिद्धान्तानुसारेण व्याक्रियते।

इन्दुमती धिक् कष्टम एतादृशा विद्वांसोऽन्धविश्वासं समधिगच्छन्ति चेत् का कथा मूर्खाणाम् । नियन्त्रयति धर्मः स्वातन्त्र्यम्, धार्मिकभावनया शृङ्खलितोऽयं समाजः कदोन्मुक्तो भवेत् । (*निर्विद्यते*)

सुरेशः विद्वांसोऽपि यूरोपीयाः समधिगच्छन्ति विश्वासं परमेश्वरे, वास्तु, नीरीश्वरवादे च धार्मिकी भावना पुनः प्रक्रमत इव ।

चन्द्रचूडः अवलीयान् बलीयांसमाशंसते धर्मेणेति निवृत्तिं

समधिगच्छत्वार्या। परिवर्तिनि संसारे सर्वे भावाः स्थायिरूपेण न निविशन्ते। समाजः कदा कं सिद्धान्त माद्रियते, कदा कं समाश्लिष्यति, कदा कं परिष्वजते कदा त्वन्यदेव संभावयति। बन्धनं निरस्य निर्गलोभूत्वोच्छृङ्खलत्वं समधिगम्य तमपि निराकृत्य पुनः परिरभतेऽनुशासनम्। यथा कालचक्रं चंक्रमीति तथैव सञ्चरति समाजः।

सुरेशः सनातनधर्मं निरूपयति श्रीमान्।

चन्द्रचूडः आम्। न खलु धीमतां कश्चिदविषयो नाम। 'शस्यमिव मर्त्यः पच्यते शस्यमिवोजायते पुनः, इदमेव सिद्धान्त मभीप्सामि। किन्तु यथा धान्यमुप्त्वा तस्य विनाशे सत्येव कृषकाः धान्यं समधिगच्छन्ति। न हि तस्य प्रवाहो विनश्यति तथैव वाऽस्माकमपीति याथातथ्येन नोपलभे।

सुरेशः तथाहि, यथा बीजादङ्कुरोऽङ्कुरात्काण्डं काण्डान्नालो नालाद्गर्भस्ततः पुष्पं ततः फलम्। न चात्र वाह्ये समुदाये कारणं बीजादिकार्यमङ्कुरादि वा चेतयते, अहमङ्कुरं निर्वर्तयामि, अहं बीजेन निर्वर्तित इति। न चात्र कश्चिच्चेत नोधिष्ठातोपलभ्यते। एवमाध्यात्मिकेष्वप्यवगन्तव्यम्।

इन्दुमती श्रुतमधरोत्तरम्। उक्त्वालम्। मुरारिः श्रावयति पुराणं

शम्पायै इत्याकर्णयामि । सत्यमेतत् ?

चन्द्रचूडः पाञ्चाल्याः पञ्चपतित्वेऽपि सतीत्वं न हीयते चेत्कथं द्वित्रपतिकाः स्वैरिण्यो भवेयुरिति तस्य विवाद-श्रवणान्मुरारिः व्यरंसीत् ततः । (द्वावेव विहसतः)

इन्दुमती सखे, युक्तं भणति सा दुर्जयो हि मदनः ।

सुरेशः उत्पथे नयति मत्सरिसमाजस्ताः ।

चन्द्रचूडः स्त्रीष्वविश्वास एव प्रहिणोति कुत्सिते कर्मणि ।

इन्दुमती विश्वसो नैव कर्तव्यः स्त्रीषु इति भारतीयाचार्या व्यचीचरन् । किं कुर्मो वयम् ।

सुरेशः (विहस्य) सुष्ठु भणति भवती । नार्य्यो हि महति पङ्के वर्तन्ते । परन्तु स्वपक्षावसादशङ्कयाऽलम् ।

इन्दुमती (उद्दिश्य) समुद्रपल्वलयोरिवान्तरमावयोः किन्तु मां विमृशति प्रयोगे ।

चन्द्रचूडः (सहासम्) भद्रे ! मामभिभवसि किमर्थम् ? (अग्रतोऽवलोक्य) मुरारिर्मामन्विष्यति । आह्वयामि (आक्रोशति, ।

(दिशोऽवलोक्य मुरारि रुपसर्पति)

इन्दुमती कस्मात् ?

सुरेशः (जनान्तिकम्) खलूक्त्वा (प्रकाशम्) स्वागतं भवते ।

मुरारिः परिभ्रम्य समागतोऽस्मि ।

सुरेशः संजाता च संध्या।

इन्दुमती दीपश्च नास्ति द्विचक्रयाने। साधयामो वयम्।

मुरारिः यद् रोचते भवद्भ्यः। चन्द्रचूड, त्वं प्रतीक्षसे इति धियैवाहं समागाम्।

चन्द्रचूडः बाढम्। सत्यसंधोऽसि। न विद्यते यानमावयोः, क्षणं विश्राम्यतु ज्योतिष्मती च रजनी।

(द्वावेवनास्येनोत्थाय मन्दं मन्दं परिक्रम्य यानंसमधिरूह्यविसर्पतः)

इन्दुमती वन्दे वाम्। (एकं हस्तं समुत्थापयति)

सुरेशः (एकहस्तेन) नमो वाम्। (गच्छतः)

चन्द्रचूडः एकान्तस्थलं मत्वा समागाम्। अमूभ्यां साकमत्रापि विवादः समजनि मुक्तो ऽस्मि तवागमनेन।

मुरारिः (सस्मितम्) स्यादनयोर्विहारभूमिरेषा।

चन्द्रचूडः वादे जातस्ते तत्त्वाववोधः ?

मुरारि ज्ञातमद्यप्रभृति सत्वस्वरूपं सन्यासिनाम्। न ते सत्यान्वेषणपराः सदा स्वस्वरूपमन्तरयन्ति। नाहं परामृशामि तैः सार्धम्।

चन्द्रचूदः नास्तिकोपाधिरूपेण महास्त्रेण ते विजयन्ते तार्किकान्। समाजस्य विनिपातेन साकं योद्धुमसमर्थाः क्लीव-तुल्यास्ते प्रमाद्यन्ति। क्लैव्यं हृदयदौर्वल्यं त्यक्तु-

माादिक्षत् श्रीकृष्णः।

मुरारिः धृतराष्ट्रप्रयोगरहस्यमुदजीघटत् भगवान् कृष्णः। महाभारतमेव सुरेशः समशयिष्ट। पाञ्चालकौरवाणां युद्धं प्रतिख्यातुं यतते। तत्तु स्वाज्ञानप्रख्यापनमेव।

चन्द्रचूडः संजातेन्दुमती सुरेशादप्युग्रतरा। नानयोः रुचिरं चारित्र्यम्। गिरिशोऽधुना स्वीकुर्यात् स्वदोषमिति विभावयामि।

मुरारिः *(सखेदम)* किं क्रियते ? नार्य्यो यदि न भवेयुः शिक्षिता निमज्जेयुः यदि स्युः शिक्षितास्तदापि समस्येयुः। विद्यते चात्रोभयतः पाशारज्जु शम्पामिन्दुमतीञ्च विलोक्येत्थमनुमन्ये।

चन्द्रचूडः पतिव्रताप्रथामेव गर्हयतीन्दुमती सा कथं परिहरेत परपुरुषसंसर्गम्।

मुरारिः शिक्षापादपस्य पुष्पमुद्भिन्नं फलमप्यचिरेण द्रक्ष्यसि।

चन्द्रचूडः *(सनिर्वेदम्)* धिक् कष्टम्। त्रिकोसवादम वधारयन्त्यन्ये, कलयाम्यहन्तु ह्रासवादम्। प्रतिदिनं प्रवर्तते हिन्दुसंस्कृत्या ह्रासः।

मुरारिः *(आकाशं विलोक्य)* अलं बहु विकत्थ्य,गन्तव्योऽस्ति दूरे साधयामः *(निष्क्रान्तौ)*

इति तृतीयोऽङ्कः

चतुर्थोऽङ्कः

(शम्पायाः सुसज्जीकृतेऽन्तर्वासागारे स्थिताः प्रमदाः)

रमा — सखि, कस्य वान्यस्य कथयिस्यामि। सत्यं, त्वमसि मनस्विनी।

शम्पा — हला रमे, नाहं पुण्यशीला।

माया — (स्वगतम्) उपपद्यते। (प्रकाशम्) तव पुण्यकर्मणि प्रष्ठः कः खलु स युवकः।

शम्पा — (स्वगतम्) कथमिव तं निवेदयामि, कथं वा चारित्र्यं निगूहामि। भवतु। एवं तावदभिधास्ये। (प्रकाशम्) यो मया नियुक्तस्तस्मिन् कर्मणि सोऽविघ्नक्रियोपालम्भाय समायातो मदन नामधेय इति भवती जानातु।

माया — संवादे प्रवीणो धृष्टो जनः स प्रतिभाति।

शम्पा — सोऽतीव भक्तिमान् कर्मठो जनः।

माया — (अन्तर्विहस्य स्वगतम्) भक्तेरधुनैतादृशी व्याख्या समजनि (प्रकाशम्) युज्यते।

रमा — कामी संलक्षये तं धूर्तम्। यत्र तु युवत्यो विद्यन्ते

समागत्य तत्रैव ताभिः साकं समाचरति परिहासम्।

माया किं त्वां न्यगकार्षीत् ।

रमा (सेर्ष्यम्) आचारं प्रतिपद्यस्व । कः खलु मां धर्षयितुं प्रभवति । साहासकारिणं महेन्द्रमपि सत्यं गलहस्तयोमि, का कथान्येषाम् ।

शम्पा किंस्वित् भगिनी धिया ताभिः सार्धमाक्रिडते वा, आल्हादयति परिहासैः सर्वाः ।

रमा न मह्यं रोचते तादृशो पद्धतिः। परोपकारधृतव्रतो धर्मनिरतश्चन्द्रचूडः सदैवापनयति स्त्रीजनं चेत् वेषविलुप्तमति मण्डनप्रियः कर्तव्यविमूढोऽन्य कः शक्नुयात् मातृभावेन स्त्रियं सेवितुमिति विस्रंभेय ।

माया (स्वगतम्) मुग्धा सती शुद्धा रमा प्रतारणं कथं श्रद्ध-ते। (प्रकाशम्) चन्द्रचूडस्तु विश्वसिति "बलवानिन्द्रियग्रामो विद्वांसमपि कर्षतीति ।

रमा चन्द्रचूडो ग्रामणीः आदर्शवादी तरूणः ।

माया (स्वगतम्) आरभेऽन्यदेव । (प्रकाशम्) या, हीरकोभरणा, मुक्ताहार समुद्भासिताङ्गी परमसुन्दरी षोडशीका सीत् सा विधवा? ।

शम्पा (संस्मृत्य) सा महेश्वरस्य स्नुषा जानकी, या सप्तवर्षे विधवा संजाता, पितृभ्यां धर्मशास्त्रजनितमाहात्म्ये-

नोद्वाहितेति श्रूयते ।

मायो — (सखेदम्) धिक्कष्टम् । कीदृशोऽयं धर्मः यइहैव मिश्रयति वेदनाम । जीवनं यातनायां श्रपयित्वा वेदनायां कर्तव्यं यन्त्रयति कथं धर्मः ?

रमा — ततस्ततः ।

शम्पा — तत एव सा भागवते धर्मे लीना दिवानिशमध्यास्ते ।

माया — किन्तु भागवतधर्मेणाऽपि विमृशामि वज्रयानरूपं गृह्णन इव ।

रमा — पाखण्डाः देशं विशसन्ति लोकमपि विनाशयन्ति ।

माया — बङ्गो यवनमयः संजातोऽनेन धर्मेण, ये पुरा हिन्दव एवासन् तेऽधुना यवनीभूताः परस्परं संप्रहरन्तेऽधुना भारते ।

शम्पा — पुरा यदि ब्राह्मणैस्ते शुद्धीकृता भवेयुः प्रसह्य ते, ये यवना जाता आसन्, तथात्वे तेषां संख्या चैतादृशी न भवेत् ।

माया — (सस्मितम्) दोषस्तु क्षिप्यते ब्राह्मणानां शिरसि, किन्तु तदा तादृशी नासीत् परिस्थितिर्यादृशी विद्यतेऽधुना । किञ्च राजाज्ञया निर्मितं यवनं कः पावितं तदा शक्नुयात् । अन्यैः किं विलोकितं तदा । ब्राह्मणैर्महदुपकृतं वर्तते ।

रमा (परावृत्य) दोषापगमोपाय एषः । परन्तु ते, न व्यतर्कयन्निमां दुरवस्थाम् ।

शम्पा अधुनापि न चेतयन्ते ते, विधवा विवाहं कुत्सयन्ते ।

माया यादृशा उदारा भारतेऽधुना ब्राह्मणा वर्तन्ते न तथान्ये वर्णा इति राजेन्द्रस्वात्मकथायामलेखीत्, ।

रमा भवतु । कीर्तनसमये वह्यः कम्पन्त इति शृणोमि । देवानामपि पिशाचानामिवावेशः संजायते किमु? ।

माया (विहस्य) युक्तं भणति भवती । हला शम्पे, किमर्थं जोषमास्यते ।

शम्पा भक्तिरसनिमाग्नाः संभावयामि । बिसंवदन्ति संस्कृतज्ञा एव ।

माया के के समागच्छन्ति प्रार्थना स्थले, निगूह्य स्व स्वरूपं लिप्सन्ते ते प्रतिष्ठाम् ।

शम्पो मुधैव त्वं तादृशीं संस्थां पर्य्यभूः यां विद्वांसोऽपि समाश्रयन्ति ।

रमा (विहस्य) सत्यमाह भवती, अविचार्योपक्रमन्ते कथं विद्वांसः ।

माया (निरूप्य) पिशाचानामिवनीचात्मनां चरितानि छिद्रप्रहारीणि प्रायशो भवन्ति ।

रमा व्याकरोत्वार्या सर्वम् ।

माया व्य करणीयं किं विद्यते, विलोकय परितः। कुक्कुट्टाण्डं समास्वाद्य, मदिरामाचम्य, पराङ्गनां समाश्लिष्य, संभाव्यधनं, विधाय परवञ्चनं, समादाय परद्रव्यं यौवनं ये ऽत्यशयिषत तेऽधुनास्मान् स्व स्वरूपमपवार्य विप्रलभन्ते।

रमा तत्तु निर्व्वर्ण्णयामि सर्वम।

माया स्वपुत्रादीनाङ्गलभाषायां दीक्षयित्वाऽन्येभ्यः प्राच्य संस्कृतविद्या माहात्म्यमुपदिशन्ति बुध्यन्ते ते वञ्चनकलाम्।

रमा सस्कृतविद्यासुप्रवीणाः पण्डिता अपि पाठयन्त्याङ्गल भाषां चेत्तैः किमपराद्धम्।

शम्पा (*सरोषम*) किमर्थं विप्रतिपद्यसे सज्जनान् परगुणाव मानिनो त्वं, नविभर्त्ति नास्तिक्यमाङ्गलभाषा।

रमा कः स्पृहयति संस्कृत्यै, स्त्रियोऽपि पाश्चात्य विद्या मेवाधिजिगांसन्ते यदा।

माया एकः पण्डितः प्रत्यवोचत "किमस्माभिरेवगृह्यते संस्कृयाः सर्वस्वं केन हेतुना वयमेव दोषिण इति। तमभिवदितुं नासीन्मे वाग्विभवः।

रमा (*निःश्वस्य*) कीदृशीस्थिति रेतदीये राष्ट्रे यत्रस्वहित कारिणी विद्या नवन्द्यते। अहोपरिभवो पहारिणो

विनिपाताः। किञ्च "यद्यदा चरति श्रेष्ठस्तत्तदेवेतरोजन" इति प्रामाणीकरोति लोकः।

माया — धनोपार्जनसाधनं शास्त्रं यदा प्रतिजानीते, यदा च जीविकार्थं विद्यां मभ्युपैतिलोक स्तदा व्यवोहति कर्तव्यम्। जीविकायै यदा समीहते ज्ञानंतदापरिहरति मानवताम्।

शम्पा — पठनादेव धनमर्जयन्तीति भणितुं लज्जे, मम श्वशुरो विद्यते मूर्खस्तथापिबहून्यार्जितानि वित्तानि तेन। भ्रातापि निपुणो धनोपार्जनकर्मणि सोऽपि विद्यते निरक्षरभट्टाचार्यः।

माया — (*सस्मितम्*) धनेन नहिमनुष्यं सम्मन्यते लोकः, धनार्जनमन्यदेव मनुष्यत्वमन्यदेव। प्रधोनमन्त्री नंतथा धनमर्जयति यथैका नर्तकी।

रमा — त्वद्भ्राताऽधिकरणे व्यवहर्तुं चातीवपटुर्वाक्कील स्तस्मादेवार्जितं भवेत वित्तम्।

शम्पा — वादि प्रतिवादिनः प्रतिदिनं वहवः परामर्ष्टुं समधिगच्छन्ति। भ्रात्रा स्वीकृतो व्यवहारः प्रायशोनविनश्यति।

रमा — (*संस्मृत्य*) मम भ्रातरो व्यवहारे पराजयं लब्ध्वा, समाप्य सर्वस्व मुक्तो चे ऽत्रस्थातुमेवा समर्थाः ब्रह्म-

देशमगच्छन । (*निःश्वस्य*) मृता जीविता किमप्यहं नजाने । अधिकरणे धनबलादसत्यमेवजयति । (*अश्रूणि विसृजति*)

माया (*रमां विलोक्य*) हला, त्वमतीवकृशासि संजाता, रुग्णाऽसिवा, समागच्छ मद्गृहं, निवेदयामि पित्रे, स सर्वं निरूप्य निर्दिशत्यौषधम् ।

रमा सखि, केवलमौषधवार्तया नशाम्यति रोगः । क्रीत्वा चौषधं नाहं पारयामि सेवितुम् । नास्ति क्षुधा, स्विद्यति शरीरं, श्लिष्यतिकासः ग्रसते ज्वरः कस्य वान्यस्य कथयामि प्रतिदिनं शिथिलीभवन्त्यङ्गानि सर्वं विदित्वापि तितिक्षे ।

माया आसूर्योदयादर्धरात्रपर्यन्तं सदैव कषसि कर्मणि स्वदेहम् । दिवानिशं गार्हस्थ्यं यो जयसि तथापि... (*स्वगतम्*) क्षुत्क्षामकण्ठा पर्याप्तं भक्षयितुं नाप्नोति । (*प्रकाशम्*) कीदृशोयं समाजः प्रचलति, धिक् कष्टम् ।

शम्भो अवितथमाह रमा ।

माया पौष्टिकपदार्थाऽभावा ज्जीर्यति यौवने पि शरीरमित्यभ्यधान्मांपिता ।

शम्भो किन्तु रक्तवर्धनादपि संजायते पक्षाघात इति व्याहार्षी च्चिकित्सक श्वसुराय । अतिपौष्टिकभोजन

मपि रोगकारक मित्यालपन् मां गिरिशः

माया — गरिशं कथं प्रतिपद्यसे ?

शम्पा — व्यवहार निमग्नोजन कोऽत्र नसमायाति ।

रमा — (जनान्तिकम्) गिरिश स्तादृशो विट एषा मन्मथ पीडिता विधवा कथमनयो मर्यादां मनोजो नलुण्ठेत् । नजाने प्रतिकारगुरुकां वेदनां कियन्तं कालं मदन एनां नेष्यतीति । (सम्मुखीभूयः) वादि प्रतिवादिनौ द्वावेऽभिसंदधाति तवभ्राता ।

शम्पा — (सस्मितम्) नास्ति वचनस्यान्य स्यावकाशोऽत्र ।

माया — (आत्मगतम्) पृच्छाम्येनाम् । (प्रकाशम्) अभि-जातो गिरिश इतिश्रूयते ।

शम्पा — उदार खलु सः । रिक्तपाणिः कदापि नायाति सः सदा नवं नवं श्रृङ्गारसाधनं गृहीत्वा समायाति । स स्निह्यति मामतीव ।

माया — एषोर्मिकापि तेनैव समर्पिता स्यादिति विन्दे । किं सत्यं लक्षयामि ।

शम्पा — (सस्मितम्) विदुषि, विशद स्ते विचारः, भोज्यपेयञ्चादात् प्रायशो माम् । अतीवास्ति स्वादुः ।

माया — (स्वगतम्) अत्याहितम्, मदिरां पाययतिधूर्तः । इन्दुमत्याः सतोत्वं धर्षितमनेनेनैवक्रमेण । (प्रकाशम)

कांचकूपिकायां निहित भवेत् पेयमिति तर्कयामि।

शम्पा आहोस्वित्! पीतं भवेत् अविदतं नाम किमपिनास्ति विद्वज्जना नामग्रे। सत्यँ तथैव भवति। अव जानासिचेत् वदसखि, क्रेतु कुत्र प्राप्यते? तेन विना निद्रामेव नालभे।

रमा (जनान्तिकम्) प्रपाय यथेच्छं विहरेत्।

माया (सस्मितम्) क्रीत्वा ऽऽनयामि तवार्थे। विस्रब्धं भणभद्रे, गिरिशः कथमेति चात्र विवृणु।

रमा मुग्धे! सखीना मग्रेऽपि व्यवदधासि किम् रहस्यम्?।

शम्पा गिरिशं स्वकोष्ठे नीत्वास्थापयेतिभ्रात्रा नियुक्ताऽस्मि सखि, बहवो व्यवहारिणः समागच्छन्ति परस्पर मनयोः संयोगो माभूदिति तस्याशयः।

रमा प्रजावती बाला वर्तते स्वकोष्ठे स्थापयितुं तव भ्राता विशङ्केत। (निःश्वस्य) मम पवनमपिपातुमभूदभिलाषः शुष्यत् तालुसंतापात्।

शम्पा तर्कं विद्येत, आनयामि वसतः। (गच्छति)

माया रमे, पश्याज्ञानफलम्। स्वपत्नीं रक्षितुं भगिनीं जुहोति धनाग्नौ कतिदिनं सङ्गोपयति व्यभिचारम्।

रमा स्वैरिणीभार्यां स्वयमेव विदधाति, तत्फलमचिरेण निरूपयिष्यति एतस्य दुर्विपाको भवेत्कीदृशो नाहंजाने।

माया पतिप्रेम्णि त्यक्तसौहार्द्रा, परवञ्चन प्रवीणा वासनां तर्पयितुं कृतबाह्यधर्मारम्भा शम्पा जाग्रतींमामपि प्रसुप्तां करोति ।

रमा (सखेदम्) एषा समीहते तं, सोपि स्पृहयत्येतस्यै। स्त्रीणां स्वभावः कीदृशो वर्तते याथार्थ्येन वर्णयितुं नाहं प्रभावमि। विलोकय सखि, पदेपदे शम्पाया भावो व्यवदधाति कृत्यम्। बिभेति पदेपदे जहाति-भयमपि । विरोधो निवर्तते चैनाम्। वैधव्यं परि-ष्वजते किञ्च विलासमपि परिरभते। वियोगस्यापि स्वरूपमिव विलापस्यापि सहधर्मिणीव वर्ततेऽस्या प्रक्रिया। भवतु। प्रेरयतीन्दुमती समागत्यास्या रहस्या-न्वेषणाय। किं क्रियते समाजस्य विलोक्य विन्यासं? कस्य नदुनोति मानसम्।

माया रमे, सर्वमिन्दुमत्यै निवेदयिष्यसि, पूर्णस्तस्या मनोरथः। सखि, इन्दुमती मुक्तिरिव लज्जायाः, शम्पा प्रीति रिव वासनाया विद्यते। द्वे एव प्रयत्न प्रयोगयो भिन्नतया भिन्नतां समवलम्ब्य पश्चात पश्चात्तापं निर्विशतः।

रमा सत्यम्। "न कामवृत्तिर्वचनीयमीक्षते"।

माया समाजो व्यतिरिच्यतेऽचिरेण ।

(तक्रपात्रहस्ता प्रविशति शम्पा)

शम्पा गृह्यतां तक्रम् ।

(द्वे गृह्णीतः पात्रे, पीत्वा तक्रं पानपात्रे यथा स्थानं स्थापयतः)

रमा अतीवस्वादु वर्तते । धन्यवादार्हा भवती । अस्मद्गृहे तक्रं शक्रस्य दुर्लभं" विद्यते । (विहसति)

माया खाद्यपदार्थानांमहार्घतया प्रति दिनं विशीर्य्यते स्वास्थ्यम् ।

रमा सखि, (कर्णे किमपि मन्त्रयते) गच्छावः ।

माया हला शम्पे, साधयावः

शम्पा आगमनादनुगृहीतास्मि नचविस्मरणीयोऽयं जनः ।

माया (विहस्य) कथं भवती विस्मरणीया भवति ।

(द्वे एव निष्क्रान्ते)

(तत उत्थाय शम्पा दर्पणे मुखं विलोक्य सत्वरं सत्वरं शृङ्गारे प्रक्रमते । गिरिशोऽपि शनै प्रविश्य तस्या लोचनेऽपिदधाति । दर्पणे प्रतिविम्बं विलोक्य ज्ञात्वापि स्वाज्ञानं प्रख्याप हस्तौ प्रसार्य तस्य कपोलं नासिकां लोचनञ्चालभते । ततः सशिरः कम्पं विहसति ।)

शम्पा ज्ञातं मया ज्ञातम् । चौरोऽसि ।

गिरिशः कुसुममिव लोभनीयं यौवनं कस्तव मुष्णाति वद, भामिनि कः किल साहसिको वर्तते ममाग्रे (हसति)

शम्पा (सानुरागं सरोमाञ्चम्) पलायितोऽधुना ।

गिरिशः (नयनाभ्यां हस्तौ निष्काश्य) शृङ्गाररसेन प्लावसि जीवलोकम् । तव शिरासु वहति सदानन्द मन्दाकिनी (आकृष्य) त्वमसि सर्ग समाप्तिरेव यौवनस्य ।(निर्दिश्य) तवाधरः किसलयरागः कोमल विटपानुकारिणौ बाहू, कुसुम मिव लोभनीयं यौवनं दर्शं स्पर्शं त्वां कल्पयापि कल्पलताम् । (अन्योऽन्यं गाढमालिङ्गतः)

शम्पा लता तरूमाश्लिष्यति (निमीलिताक्षी हर्ष गद्गदाक्षरम्) जातं निरुत्कण्ठं मानसं निवृत्तिसुखस्य । (मन्दं मन्दं विहसतः)

गिरिशः कोकिला इव मदकलकाकली कोमलालापिनी त्वमसि प्रिये !

शम्पा जानेऽहं प्रतिनिधिरिव चन्द्रलोकस्य भवन्तम् । अमृतमयस्य भवतो बचसां माधुर्य कार्यमेव । (सकटाक्षपातं लज्जां नाटयति)

गिरिशः (आकृष्य अङ्क उपवेशयति) भीरु,अलं गुरुजन भयेन ।

शम्पा प्रियतम, भ्रातुरागमन बेला संजाता मुञ्च माम् ।

गिरिशः (घटीयन्त्रं विलोक्य) मुहूर्तांत पश्चात्समागमिष्यति। ज्ञानात्येव प्रेम्णो हेतून् । अविज्ञाय माने जनेऽस्मिन् परिचितिं वध्नाति सौहार्दम् ।

शम्पा दर्शनात् प्रभृति गुरुगुणगणहृतेन हृदयेनपरवन्तोक्यम्। भवतु मुञ्च माम् । नखल्वात्मनोऽस्मिन् समये प्रभवामि । (*अन्यतः सहसोपसृत्य वसति*)

गिरिशः त्वयि, विना कारणेनदृष्टैऽपि प्रत्यासन्नेव बद्ध पक्षपातं किमपि स्निह्यति मे मानसम्। हृदयंतेहृदयेन संदृग्रामि, मन चितेतत्र चित्तमस्तु। (*बलादेवा मालिङ्गति*)

शम्पा प्रिये सीमाल्हादः ।

गिरिशः अहं त्वां बरिवस्यामि प्रिये, त्वं प्रतिजार्नाषे ।

शम्पा त्वमेवं वद ।

गिरिशः त्वमेव वद ।

शम्पा कीदृश श्चतुरः ।

गिरिशः कीदृशो चतुरा, (*विहस्य*) प्रेयसि, त्वया विनाक्षणमपि कल्पायते । सत्यम् । तवाधीनामे प्राणाः ।

शम्पा प्राणेश्वर, अनुगृहीताऽस्मि, नोस्तिमे वाग्विभवः स्तोतुं, प्रस्तुत्य नाहं पारयामि मानसमन्दिरं समुद्घाट्य त्वां दर्शयितुम् ।

गिरिशः प्रिये, हृदय द्वारि स्थितयोः कुचकुम्भयो र्द्वयोर्निपतन्ति शरा इव लक्ष्ययो र्यूनांदृष्टयः। धन्योऽस्मि द्वारि पूर्ण कलशौ विलोक्य तव मानसमन्दिरं प्रविशामि ।

शम्पा अहमपि धन्यास्मि, यां विभर्त्ति भवान्। सत्यम् कृतकृत्यास्मि भवद् विरहेण त्रुटिः युगायते, लोला भवन्ति मनांसि ।

गिरिशः (*सस्मितम्*) उत्तीर्णासि प्रिय वचन परीक्षायाम् गृहाणोपहारम् ।

(*निष्काश्य मुक्ताहारं परिधापयाति*)

शम्पा स्वीकरोमि (*सस्मितम्*) नानीतोऽसि सुधा समर्पये

गिरिशः (*स्वगतम्*) सुरया मेवशवर्तिनी संजाता। भव (निष्काश्यददाति) गृहाण भूयोऽपि पारितोषिकम्।

शम्पा (*सहर्षं गृहीत्वा*) आतृप्तेः पिवामि ।

गिरिशः यथेच्छं पीत्वा दिवा वहिर्न गन्तव्यम्। (*स्वगतम्*) अहो! मदिरयाः परवानयं जनः।

शम्पा सर्वस्वमवशिष्ट मिष्टातिथ्याय । (*कट्याः निष्का दिनारपोटिकां तस्य हस्ते निक्षिपति*)

गिरिशः तदलम्। नाहं विक्रीणामि प्रणयम्। (*अपसारयति*)

शम्पा नाह मन्या (*वलात्तस्य कञ्चुके धारयति कञ्चु दन्य दलङ्करणं निष्काश्य विस्मिता*) कुत एतत्।

गिरिशः त्वत्प्रणय प्रभावात्। आज्ञापय, भूषयामित्वाम्।

शम्पा अवसरमपास्यतिकः सावधानात्मि । (*पुराण मल स्थाने भूषणं नूतनं धारयति चिराय*)

गिरिशः (स्वगतम्) नीवी मोक्षान् नीवो हस्तगतामे । (प्रकाशम्) भ्रात्रा ज्ञातञ्चेद् ?

शम्पा (विहस्य) कातरस्य कुतो-द्धि त्रिरात्र मपि निश्छला लक्ष्मीः। व्यवदधामि सर्वम्।

गिरिशः (स्वगतम्) ममतु संजायते सदैवाथादल्पतरोव्ययः। मूलकोशमेवप्राप्तं यौवनस्य धनस्यच। (प्रकाशम) पुनरपि वक्तुकामेवात्र भवती भीरु, नहि सङ्गोपयन्ति प्रियेषु प्रियतमाः।

शम्पा प्रिय, (अर्धोक्ते सहसातूष्णीमास्ते)

गिरिशः प्रिये, अलंविचार्य, स्वामिनि निवेद्य दुःखं सुखी भव। मां तेमलिनं वदनम् व्यथयति ।

शम्पा पञ्चत्रिंशद्दिनान्यतिक्रान्तानि ।

गिरिशः परस्ताज्ज्ञायत एव । रजोवतो भवती संजाता नो चेदपि माखिद्यस्व सखि, औषधेन स्खलति गर्भः। अलं भयेन भीरु; परीक्षे औषध मेकवारम्। मायायाः पिता जानाति गर्भपातौषधम्।

शम्पा यदि विपर्य्यसतिचेत् ?

गिरिशः किं तेन, कालिकातां गत्वा निस्काशयामोगर्भाशयमेव।

शम्पा (सस्मितम) अर्थिजनेच किमिव नातिसृजन्ति प्रणयिनः। भवतु, पूर्णामे मनोरथाः।

गिरिशः विहरावो यथेच्छम् । ततो नालम्बनीया प्रेम बिलो-मता । किञ्च प्रिये, नोपयोगं प्रीतिर्विचारयति ।

शम्पा (सहर्षम्) हृदयेन स्निह्यति मयि । श्रुत्वैवं केन प्रियमाचरामीति पारिप्लवं चेतो दास्याः ।

गिरिशः प्रिये, प्रिये, सर्वगोपनीयं प्रयत्नतः ।

शम्पा स्वहितं कथं नाचरेयम् । उदरशूल व्याजेन प्रतारमा सर्वान् ।

गिरिशः (शम्पायाश्चिबुकंस्पृशन्) त्वमसिप्रवीणा प्रतारणकर्मणि (हसति)

शम्पा (सकटाक्षपातम्) समागमनाय किमर्थं सदैव बिल म्बसे ? । प्रियतम, श्वः प्रभृतितत्तथा यतेथाः यथा नचिर मिय मस्मान् क्लेशयति दर्शनोत्कण्ठा । त्रुटि र्युगायते त्वयाविना ।

गिरिशः प्रिये ! अनुग्रह इवेवमभ्यर्थना । किञ्च श्रुतमेव भवे भक्त्या "ग्लपयति यथा शशाङ्क नतथा कुमुद्वती दिवसः" ।

शम्पा (सस्मितम्) लघयति परदुःखं लोकः । प्रविश्यहृदि को वबुध्यते ।

गिरिशः हृदय सान्निध्यात् कठिनौ कुचौ भवतो बालायाः । तस्मादेव मरीमृद्यते युवत्याः कुचकुड्मलौ द्रावयितुम् ।

शम्पा (लज्जते) नाहं वदानि, व्रीडयति मां पदे पदे।

गिरिशः भवतु। संमेलयामि हृदयं हृदयेन। येन भवेत् ममापि दर्शनोत्कण्ठा। (समाकृष्य गाढमालिङ्गति)

शम्पा (सलज्जम्) मुञ्चतावन् माम्।

गिरिशः तव हृदि विद्यते हालाहलं वा पीयूषं नाहं जाने। विलोकय, मामाच्छादयति किलाह्लादमूर्च्छा।

शम्पा शठ, परिहससि माम्, मुञ्च कोऽपि समागच्छेत्।

गिरिशः मोक्ष्यामि।

शम्पा कदा ?

गिरिशः सुन्दरि, तवाधर संपोत्वा। (मुखमस्याः समुन्नमयितुमिच्छति सोपानेऽवरोहण शब्दं श्रुत्वा शम्पां निरस्य सहसा वातायनाभिमूखोभूत्वा गिरिश उद्यानस्थितं पुष्पं विलोक्य प्रतारति। शम्पाऽपि श्रमविन्दून् प्रमृज्य सत्वरमुत्थाय वस्त्राणिविन्यस्य द्वारसमीपे तिष्ठति। ततो हस्ते धूम्रपान पात्रं गृहीत्वा गोपालः प्रविशति)

गोपालः (प्रविश्योपविश्यासने) महाभाग,

गिरिशः (परावर्त्य ससंभ्रमम्) आर्य वन्दे। (प्रणमति)

शम्पा गिरिशोवहिर वलोक्य चिराय सनिर्वेदंनिः श्वस्यावात्सीत्। किमर्थ मार्यः सत्वरं नसम्पादयति कार्यमस्य।

गोपालः वत्स, अलं विचार्य। संजायते विजयो भवतः

सर्वथैवाधिकरणे ।

शम्पा मम भ्राता जल्पति यदीत्थं तदा किमित्युद्विजसे ?

गिरिशः (सस्मितम) प्राड्विवाक सदृशोजनो व्यवहारेऽस्मिन् परिकरं बध्नातिचेत्सर्वथा जेष्यामि ।

शम्पा नात्र शङ्कावसरः

गिरिशः किन्त्वधिकरणेऽभिलषन्ति प्रतारयितुम् । पुनः सर्वे उत्कोच मभ्यर्थयन्ते ।

शम्पा (विहस्य) विदितं भीतेः कारणम् ।

गिरिशः प्रिये, (अर्धोक्ते, संस्मृत्य) भगिनि, नाहं विभेमिभो ! तैःसाकं सदैव त्रिवदे ।

गोपालः (सस्मितम्) विद्यते सोदर्ययोरिव स्पृहणीया प्रीतिर्युवयोः ।

गिरिशः वाढम् । सुशीला साध्वी चैषा ।

शम्पा किञ्च, परसन्तापहारको धर्मनिष्ठो भवानपि ।

गोपालः युज्यते । अधिकरणे वहिस्तु पक्षपात स्त्याज्यः सर्वते संयोजयन्ति ।

गिरिशः तत्रत्याः परिचारका अपिनृपायन्ते । तेषा मनादरं, व्यवहारं मनोरथ मभिमानञ्च दृष्ट्वा मनस्विनो नसमीहन्ते क्षणार्धमपिस्थातुम् ।

शम्पा तत्त्वाभियोगे किमर्थं विलम्बः क्रियते ?

गोपाल सम्भूयसमुत्थानेस्थितो व्यवहारो बहुकालपर्यन्तं प्रचलत्येव सर्वत्र ।

गिरिशः स्यात्कुत्रैषा प्रणालिः ? दशवादनसमये गताय जनाय चतुर्वादनसमयपर्यन्तं स्थापयित्वा दीयते पश्चादाह्वानः।

शम्पा आर्य, अध्यक्षं किमर्थं नसूचयति ।

गिरिशः (सखेदम्) सर्वे तत्र तस्करप्रायाः कस्मै निवेदनीयमिदम्। अरण्यरोदनं भवति।

गोपाल वेतनस्य न्यूनतया तथा वस्तुनो महार्घतया चापेक्षन्ते सर्वेऽप्युत्कोचम् ।

गिरिशः सत्यमाह भवान्। मया चिन्तितानि मन्त्रयते ।

गोपालः भद्र, नकिमप्याहितं भवता पुनश्चैकवारमादौ साक्षिणः समाकर्षेयुरिति देयमेव निवेदनपत्रम् । तत्रोत्कोचंदत्त्वापि स्वपक्षे बहुजनान् युनक्तु इतिपित्रे संलेख्यं पत्रम् ।

गिरिशः (निःश्वस्य) किञ्च श्रूयते पुनः क्षेत्रेऽपि समजनि सीमा विवाद इति ।

गोपालः (विचार्य) संनिवेशः, प्रमाणं, क्षेत्रनाथ, अधिवासश्च लिखितं प्रामाणिकं नविद्यते किमु ? ।

गिरिशः सर्वं विद्यते, तथापि विवदितु मिच्छन्ति तत्रत्या धूर्ताः। लक्षयामि संजायत अत्रापि बहुव्ययः ।

गोपालः सर्वं याथातथ्येन ज्ञात्वैव प्रेष्यतां तदपि लिखतु पत्रे महाभागः ।

गिरिशः भवद्वचनं शिरसा बिभर्मि । पित्रेऽपि निःसंदेहेन भाव्यमित्यङ्कयामि ।

गोपालः भवतु, भवतु, नभेतव्यम् ।

शम्पा श्रुतं श्रोतव्यं भवता भ्रातुः संशयच्छेदिवचनम् ।

गिरिशः अनुग्रहोऽयम् । अतः परं निशङ्कं विचरामि ।

शम्पा अनुग्राह्योऽयंजनो ऽपि ।

गोपालः रमणीयं युवयोः सौहार्दम् । वद, किंवक्तु कामासि ?

शम्पा अहं पठितुमिच्छामि भ्रात्रासह ।

गोपालः (विहस्य) वृद्धः शुकोऽपि पाठ्यते ।

गिरिशः षष्टिवर्षा वृद्धा विदेशे कुर्वन्त्यक्षरारम्भम् । साक्षरकरणे सर्वैर्यतनीयं देशोपरि विद्यते महान् भारो निरक्षतायाः ।

गोपालः युज्यते । मुरारिः समागत्य द्वू एव पाठयिष्यति संस्कृतम् । कथयिष्यामि तस्मै ।

शम्पा अहंत्वाङ्ग्लभाषामेवाधीये, संस्कृतंपठित्वा किं क्रियते ? सर्वत्र स्त्रियोऽधीयते तामेवविद्याम् ।

गिरिशः सत्यं प्रतिपादयति भवती । आङ्ग्लभाषा विश्वभाषाऽधुनासंजाता ।

गोपालः (विहस्य) भारते, चीने, रूसे, जर्मन्यां, जापाने, फ्रान्से, अफ्रिकायां, किंबहुना सर्वत्रांग्लभाषया एव व्यवहरन्ति ? नोचेत् कथं संजातासा विश्वभाषा। किंस्वित् आङ्ग्लामेरिकीयाः विंशकोटिसंख्याजना यां भाषां ब्रुवन्ति सैव संजायते विश्वभाषाचेत् किमपराद्धं भारत भारत्या।

गिरिशः आङ्ग्ल भाषाभिज्ञाः सर्वत्र संचालयन्ति स्वकृत्यमित्येषोममाशयः।

गोपालः फ्रेञ्चज्ञा अपि संचालयन्ति सर्वत्र स्वकृत्यमित्याशयोऽस्म। किञ्चाङ्ग्लभाषाध्ययननिरता स्त्रियः स्वैरिण्यो दृष्टा मया तस्मान्नाध्यापयामि ताः।

गिरिशः नचात्र भाषा ऽपराध्यति।

गोपालः भद्र, यद्यन्यथा नमनुतेचेत विशदीकरोमि।

गिरिशः (अञ्जलिं बध्द्वा) मां स्वतनयमेव विमृशतु भवान्। नाहं कृतघ्नो जनः।

गोपालः यदितथा चेच्छृणोतु।

द्वौ- सज्जीभूतौ वाम्।

गोपालः सत्यम्। "जनापवादः खलु दुर्निवारः। जनापवाद भयात् रामः सीतां जहौ। भवद् भगिन्याः दुश्चारित्र्यं सर्वत्रप्रचरति। युवकेन साकमेकान्ते कान्तारे पर्य-

टयितुं गच्छतीति श्रूयते।

गिरिशः सत्यमेवैतत् । पतिता सा कर्तव्यमार्गात् ।

गोपालः विमृशतु श्रीमान् कुशिक्षायाः फलमिदम् ।

शम्पा (कर्णौपिधाय) शान्तंपापम् । किमिन्दुमती नाभिजानाति स्वकुलं, धिक् तद्दाशी विद्यते।

गिरिशः (सविषादम्) आम, निराकृतेन तेन हृदयमेवापहारितं भगिन्याः। दिवानिशं तेन साकं परिभ्रमति कदाचित्तु रात्रावपि स्वपिति तत्रैव।

गोपालः संसर्गजा दोष गुणान्भजन्ते। श्रुतं भवत्या।

शम्पा (मुहुर्मुहुःकर्णौ पिधाय) शान्तं पापम्। शान्तं पापम्।

गिरिशः (स्वगतम्) प्रवीणास्ति प्रिया वाह्यजनं बञ्चितुम्। (प्रकाशम्) नहि सर्वाः पुण्यशीला धर्मरतास्त्वच्छदृशाः।

गोपालः तत एवाङ्ग्लभाषाया उपरि ममविद्यते जुगुप्सा, स्वसंस्कृतिं निर्मूलयति सा।

गिरिशः नैष विद्याया दोषः, यदि विद्यायाः स्याद्दोषो मायापि तादृशी संजायेत। सातु साध्वी पर पुरुष मुखमपि नैवावलोकयति।

गोपालः भवान् विद्वान् वरीवर्ति तस्मान्नाहं शक्ष्यामि विवदितुम्।

गिरिशः (सस्मितम्) भवदग्रे स्तनन्धया वयम्।

शम्पा अवसाययतु विवादम्। सतीत्वं विनाश्य पठित्वा कोलाभः। भवतु, नाहं पठामि किमपि।

गोपालः (स्वगतम्) प्रतारसि माम्। सर्वं जानामि धूर्तायास्ते चारित्र्यम्। (प्रकाशाम्) संस्कृतं पठितुं पारयसि, पठ।

गिरिशः किं संस्कृतज्ञाः सर्वे साधवो भवन्तीति वितर्कयत्यार्यः। तेऽपि व्यभिचरन्ति।

शम्पा श्रूयते। कीर्तन मण्डले गता विधवाः परपुरुषान्-भावावेश छलेन ... ... (अर्धोक्ते लज्जते)

गोपालः अत्याहितम्। निवारय ततः प्रजावतीम्। धर्माडम्वरेण प्रतारयन्ति तेऽपि।

गिरिशः नच कुलशैलनिवहवाहिनो वायवः संनह्यन्ति तरल तूलराशौ। किञ्च वागुरायां कुररीमिव मुग्धांयुवतिं विधवां विप्रलभन्ते ते।

गोपालः कारणमेव कलिकालस्य कलौ कीर्तनं संजातम्। प्रतिदिनमनन्यकृत्यैं क्रियते यत्नः। भवतु! निरस्याम्य चिरेण सर्वम्।

शम्पा भ्राता व्यवस्यति चेत् सम्भवत्येव।

गिरिशः (विचार्य) इन्दुमत्यास्त्वत्याहितमाचष्टामार्यः किंकरोमि।

गोपाल सुरेशः किलात्र हेतुः ।

गिरिशः तंतु निरुणध्मि । परन्त्वधुना सैव गच्छति तत्र चोरयित्वावस्तु जातं नयति तस्यावसथे ।

शम्पा सर्वंदर्शदर्शमार्यः कथं नयने निमीलयति ।

गिरिशः (निःश्वस्य) किंव्याहरामि, दैवयोगाद् बभार गर्भमपि ।

गोपालः (सस्मितम्) तथाचेत् जात्या एव भ्रंशयित्वा पित्रादत्तं रिक्थं सर्वमपहरणीयम् ।

शम्पा (अधोमुखीभूत्वा सशङ्कं पृच्छतिं) किंतयाकर्तुं न्यायात् पार्यते । कन्याकाधनं दायञ्च ग्रहित्वा कथं प्राणिति वराकी ।

गोपालः नखलु जानासि लोक वृत्तं त्वम् ।

गिरिशः सुरेशो दण्ड्यो भविष्यतिकथं, मुख्यमेतदेव भवता विचारणीयम् ।

गोपाल श्वः प्रभाते विचार्य यथा वस्थितमावेदयितास्मि । (स्वगतम्) प्राप्तोवसरः पातयितुम् (परावर्त्य) शम्पे चियामानय भ्रात्रे सुस्वादुर्भवेत् किञ्चाहमपि विस्मृतो नभवेयम् ।

(शम्पामन्दं परिक्रम्योत्थाय निष्क्रामति)

गिरिशः निर्मक्षिकं कृतं भवता ।

गोपालः बाढ़म्। भद्र, कतिदिनान्याच्छादयाम्यस्या दुश्चारित्र्यम्। गृहे विधवा भगिनी विद्यते, भर्त्सिते सति लोकोऽन्यथैव मनुते स्वल्पेऽपि कर्मणि रोदिति।

गिरिशः वहिर्गन्तुमद्यापि नजहाति किं शम्पा ?

गोपालः गृहेऽपि प्रतिदिनं कलहो जायते भवानस्ति मम परमाप्तो जनः भवदग्रे किमपि गुप्तं गृहकृत्यं नविद्यते, शृणोतु, धान्य विक्रयणादागताद्र्व्यकाद्दीनारा नक्रैषम्। मञ्जुषायां स्थापयित्वा कार्यवशाद् वहिः सत्वर मगच्छम्। विस्मृत्य ससंभ्रमात् कुञ्चिका तत्रैवत्यक्ताभूत। प्रतिनिबृत्य विलोकितेतु बहवः दीनाराः ततः निष्काशितासन् केन हस्तगता कृता नजाने। अवश्यमेव द्वयोर्ननन्दृभ्रातृजाययोः स्योत्कृत्यमित्यवैमि। *(दीर्घंनिः श्वसिति)*

गिरिशः अज्ञानस्य फलमिति प्रत्येमि।

गोपालः वत्स, वरमज्ञानं नाशिष्ट जनसेवया विद्या। किंते नामृतेन यत्रास्ति विष संसर्गः। स्त्रीपुरुषयोःलिङ्ग भेद मेवकारणं तेनैव हेतुना नपरवन्तो महिलाजना भवन्तीति भवद्भगिनी सदैवाभिनिविशतो एतेतु त्रस्यतः।

गिरिशः सुरेशमेव हस्ते करिष्यति वा नजाने।

गोपालः तस्यास्तु कार्यं सर्वमहं सम्पादयामि। निर्वाणनिर्माण

योर्महदन्तरं भवति । मद्भगिनीपक्षे विद्यते निर्माण प्रक्रिया । दोलायते मेमनः ।

गिरिशः नेभेतव्यम् ! ।

गोपालः कथमहं नविभेमि, गर्भवती शम्पा, किंव्यवद्यामि भवता सार्धम । सुवासिनी मामवोचत् ननान्दुः मासिको धर्मोव्यतिययाविति । सा सर्वेभ्यो व्यहरिष्यतीति परिप्लवते चेतः ।

गिरिशः अनुकम्पा भूमयः प्रकृत्यैव युवतयः कि पुनर्विपदभिभूताः ।

गोपालः प्रायेण प्रथमे वयसि सर्वस्यैव चापलैः शैशव मपराधीति । भगिन्या दायं पिपर्तु भद्रः । इद मेव प्रोर्थयेत्वां सर्वं वेत्ति भवोन् । पाययित्वौषधमपि पातयतु तस्या भ्रूणम् ।

गिरिशः सर्वथैव यतिष्ये तां समुद्धर्तुम् ।

गोपालः (सहर्षम्) रक्षिता भगिनी लोकापवोदात् । हस्तगतं दायं तस्य भवतीति निश्चिनोमि । (संस्मृत्य) यदि तथेन्दुमती करोतिचेन्निशेषयति कृत्यम् ।

गिरिशः नानुजानाति गर्भपातं किन्तु सा कानीनं समुत्पाद्य समाजेन सार्धं योद्धुमिच्छति । अनयोर्महदन्तरं विद्यते ।

गोपालः सत्यम् । सावीराङ्गना, किञ्च विनाश काले विपरीता

बुद्धिर्भवति। सुरेशं साधयामि । नकदापि विस्मरामि वद् भवने यो मां सभायामुपाहसत्।

गिरिशः भोक्ष्यति तस्य फलमचिरेण सः। भवद् कोपानले शलभायते।

गोपालः (*सरोषं सुरेश मुद्दिश्य*) ओपाप, त्वमसि फलमिव पापस्य।

गिरिशः अचिरेण द्रक्ष्यति प्रत्यक्षम्। कीदृशी क्रूरा लोकस्य प्रकृतिः।

गोपालः पत्न्या सदैवो द्विजितोऽस्मि, ध्येयं संवृणोति, पर गेहं गन्तुं सदैव रमते, यात्रायां निवारितापियात्येव। आर्येविदथोतु विनीतां ताम्।

गिरिशः यदाज्ञापयत्वार्य। (*स्वगतम्*) सर्वं स्वायत्ती कृत मत्रागतेनमयास्य। तरुणी कथं वृद्धं व्यथयति (*प्रकाशम*) सर्वं सम्यक् सम्पादयामि।

गोपालः ननान्द्र भ्रातृजाययोः कलहेन गृहमपि विघटते।

गिरिशः शम्पां बोधयामि।

गोपालः अवश्यमेव त्यजति साकलहं भवद्वचनेनेति विमृशामि।

(*शम्पा पेय मानयति द्वावेव नाट्येन पिवतः, शनैः शनैः जवनिका पतति*)

॥ इति चतुर्थोऽङ्कः ॥

॥ पञ्चमोऽङ्कः ॥

(नगरोपकण्ठे वनेभ्रान्त्वा विश्रान्तौ द्ववेव तरुच्छायायां तिष्ठतः)

इन्दुमती सुरेश, भ्रमित्वा श्रान्ताऽस्मि ।

सुरेशः उपपद्यते । (मन्दं नाट्येन निषीदतः)

इन्दुमती (शिलायामुपविश्य) तव कोष्ठे लघुनी वर्तेते द्वे वातायने । नगरस्यान्तर्गर्भेऽस्ति गेहं नप्रविशति प्रकाशः नापि स्वच्छोवातः । तत्रत्या मार्गमसत्कुर्वते, नरक परिवृतं स्थल मिव कलयामि ।

सुरेशः बहुवारं मयाऽवाचि किन्तूपेक्षन्ते ते ।

इन्दुमती (विहस्य) परोपदेशे पाण्डित्यं सुकरं विद्यते । त्वत्कोष्ठेऽपि सैवदशाऽऽलोकिमया । मलिनं धूलिधूसरं स्थलं, पुस्तकानि परितः क्षिप्तानि वस्त्राणि समन्तादुज्झितानि । नसन्ति कान्यपि वस्तूनि नियमित रूपेण स्थापितानि । कदापि कोष्ठं नहि संमार्जयसि यद्वा लज्जसे विद्वन्, संमार्जनीं ग्रहीतुम ।

सुरेशः (सहासम्) समालोचयितुमतीव प्रवीणासि । सदैव जनावृतं वर्तते कोष्ठमवकाश एव नहिलभ्यते

संमार्जयितुम् ।

इन्दुमती स्वच्छं विधायैव कोष्ठं निःश्वसिति चन्द्रचूडः। तस्यापि विद्यन्ते बहूनि मित्राणि । स्वभाव एव प्रेरयति कृत्ये ।

सुरेशः (*विहस्य*) सत्यम् । ममाप्युपानहौ निर्मले दर्पणतुल्ये बिम्बदर्शके विलोक्य को भणिष्यति निर्धन एष इति। पुनश्चक, संशेतेऽस्य वास स्थानमीदृशं स्यादिति। सर्वान् विस्मेरयामि प्रिये !।

इन्दुमती अभिनिविशसे व्यर्थमेव । सर्वदैव परिहससि, तवार्धाङ्गिनी वर्तते समीपे। कंप्रतारयसि त्वरितं समुद्धर स्वात्मानम् ।

सुरेशः (*ऊर्ध्वमवलोक्य सनिर्वेदं निःश्वस्य*) प्रिये ! त्वमेव जानासि याथातथ्येन ममदुरवस्थाम् । क्षणमपि कालं नकलयामि। राजनीतिशास्त्रे एम् ए. पर्यन्तं समधीत्य सर्वप्राथम्येनचोतीर्य चैतादृशीदशासं-जायते चेत् कथमहं क्रान्तिमविधाय तस्मिन् कोष्ठे शान्तिं समालम्बे ।

इन्दुमती अन्यदभिहितं श्रुतमन्यदेव। क्षणार्धमपि यदि वसेत् स्वच्छं कोष्ठं विधायैवचन्द्रचूडः संविसति ।

सुरेशः तादृशि कर्मणि मनोनलगति किंकरोमि । स्वीकरोमि

दोषोऽयमिति ।

इन्दुमती महान्तः स्वीकुर्वन्तिदोषम्। प्रियतम, इलिनेन कल्पितायोनगरनिर्माणवस्थाया वर्ततेऽतिदूरेऽस्माकं नगरम् । विलोक्येदंपुरं नयने निमीलयामि । तथापितस्य भविष्यद् वाणी नच गगनकुसुमायते इतिसंभाव्यामि । परिपूर्णा भविष्यति इत्याशासे ।

सुरेशः रोमस्थिताः पोपा, (धर्मगुरवः) स्त्रीष्वात्मनोऽभावमेव यदास्वतर्कैः प्रतिपादयामासु स्तदातैर्नविचारितंभवेत्, महिला व्योमयानं संचालयन्ति तथा स्वज्ञान महिम्ना विज्ञानेषु प्रतिष्ठां प्राप्नुवन्ति ।

इन्दुमती सर्वत्र स्त्रीषु दृश्यतेऽत्याचारः ।

सुरेशः तदाकिंकल्पितमपिस्या देषावस्था समायास्यतीति ।

इन्दुमती अत्रत्या विद्वांसोऽपिस्त्रीशूद्रौ नाधीयातामिति निरूपयामासुः ।

सुरेशः उपनिषदि गार्ग्यादयो विदुष्योबभूवुः । जावाला यौवने विचरन्ती स्वपुत्रं सत्यकामाख्यमसविष्ट ।

इन्दुमती यवन्यो जवनिकयायदाऽऽपादमस्तकमाछाद्य गृहे जीवनं यापयन्तिस्म तदा विश्वभ्रमणमेकाकिन्येव नारी विभ्रमिषतिचे ति कल्पितमेवनस्यात् ।

सुरेशः कालः करोति सर्वम्। संस्कृत्या मोहे यदि स्थितः

स्यात् कमोलपाशामहोदयः कथंस्योत् तदैष परिणामः । संस्कृतिः समाज मग्रे नेतुं निरूणद्धि पूर्वावस्थां समालिङ्ग्य ।

इन्दुमती राष्ट्रियभावं विलङ्घ्य वयमुच्छृङ्खलिता इत्याक्षिपन्ति ।

सुरेश धिक्कष्टम । (सखेदम्) किं तेविमृशन्ति, वयंप्रगतिं रूद्ध्वा पिष्मः स्वभाग्यमिति । प्रिये, राष्ट्रियताया ध्वंसो नास्ति साम्यवादे ।

इन्दुमती विदेशादागतं विज्ञानमितिकिंतेस्रष्टुं प्रभवन्ति ? तदाकुत्रगता तेषां राष्ट्रियता । तथात्वे वैदेशिक शल्यचिकित्सा प्रणालिं विघटयन्त्वेकवदे ।

सुरेशः संकोच्य राष्ट्रियत्वं नहि त्यज्यते साम्यवादः । यत्रकुत्रापिनिष्पद्यतां विज्ञानं किंतेन, लोकोनिषेवते ।

इन्दुमती राष्ट्रियतां क्रोडीकरोति कलैव ।

सुरेशः कति व्ययीकृत्य निर्मितानि मन्दिराणि निर्दिश्य भग्नावशेषेण स्वरूप मुपहसति कला: ।

इन्दुमती इतिहासंस्मृत्वा कलायाः दुःखं नवत्वं याति । यदि दासानामस्थीनि नस्युः पिष्टानि तदा नभवेदाविर्भावः पिरामिडस्य ।

सुरेशः (सस्मितम्) समर्थयामि ।

इन्दुमती (*निः श्वस्य*) विनाश्यावुर्द रूप्यकाणि, विंशतिवर्ष-

पर्यन्तंकृतेन परिश्रमेण निर्मितं स्मृतिमन्दिरं मुमताज-महलम्। तादृश श्रमार्थिकव्ययसाधितेन लोकस्यको लाभः समजनि। सा सुन्दरी सम्राजः प्रासादस्य प्रकाशमयो भवेत् किन्तु देशमेवोज्ज्वलयन्त्योऽन्या-बह्व्यः कुत्र चेक्षिप्यन्ते।

सुरेशः वस्तुतस्तु कुत्रविद्यते स्वसंस्कृत्यनुरागः केवलंमौखिक सहानुभूत्या किमपि नसम्पद्यते। विलोकय सखि, सर्वत्राधुना हर्म्याणि पाश्चात्य शिल्प शास्त्र दिशा निर्मिमते। किञ्च पुरापि तथैवासीत् यवन देशादागताः शिल्पिनस्ताजमहलं निरपीदद्न्।

इन्दुमती कलाया इतिहास मधीत्यतांगवेषयितु समीहे। सत्य-माह भवभूतिः तेश्रोत्रियास्तत्वविनिश्चयाय, भूरि-श्रुतंशाश्वतमोद्रियन्ते, इति। प्रियतम, जानासिचेद्‌ वद।

सुरेशः (संस्मृत्य) पुरा कलाया इतिहासस्त्रेधाविभज्य व्यमृक्षन्। कलाया उद्भवस्तू दगात् पूर्वदिशि। किन्तु कृते पूर्णतायां ध्यानमेवात्रनासीत्।

इन्दुमती सत्यम्। मन्दिरनिर्माणेविशदी क्रियतेकलो परन्तु मूर्ति विषये कलाकारा विमनायन्ते किम्?। अन्यथोजगन्नाथ रामेश्वरादीनां मन्दिरान्तः स्तादृश्योः न स्युः प्रतिमाः।

सुरेशः (विहस्य) बाढ़म् । सत्यमभिदधासि सुन्दरि ! ।

इन्दुमती भारतेऽस्मिन्सर्वेऽ प्रमेयाऽ परिछिन्नं समर्थयन्ति। तत्रैकाकारा मतिः संजातेव सक्ष्यते ।

सुरेशः सौन्दर्यमयीकलायाः साकोराविर्भावस्तु यवनदेशेऽ (यूनाने) भूत् । अद्यावधियत्र चकास्तिः मूर्तेः सौन्दर्यमतुलित मनुपमेयश्च । यत्र भौतिक सौन्दर्यस्य प्रकाशते प्राधान्यम् । प्रशंसनीयं तेषां कृत्यम् ।

इन्दुमती पुरस्तादीश्वरस्या गण्या आसन् मानवाश्चात्र, तस्मादेवानन्तस्य पूजा प्रचलिता । तत्रतु पुरस्तात् मानवानामीश्वरोऽगण्य आसीदतः सान्तस्यपूजा संजाता ।

सुरेशः राजनीतावपि राज्ञश्चाग्रे प्रजा दाससदृशा पूर्वदेशे, पश्चिमेतद्विपरीतं विभाव्यते ।

इन्दुमती ईश्वरवादिनं राजतन्त्र समर्थकं, निरीश्वरमतानुयायिनं गणतन्त्रप्रतिपादकमिति समभ्युपैमि ।

सुरेशः हैगेलः धर्मस्यसारांशमेव साकारवादं व्यतर्कयत् । सत्यम् । मूर्तिपूजा रहिते धर्मेऽपि परमेश्वरं ध्यातुमुपदिशति चित्ते तदानयनमेव साकारकरणमिति मुरारिरशंसत् ।

इन्दुमती भवेत् । इटलयां चित्रकला पराकाष्ठमापद्यतेति तद्विदो भणन्ति ।

सुरेशः तत्र शारीरिक सौन्दर्य स्थानं धार्मिक सौन्दर्य मगृहणात्।

इन्दुमती राजनीतिं विचारयतुं यत्रत्योः स्वतन्त्राजना प्रभवन्ति तत्रैव विकसति विकास जातं सत्यमाह देवव्रतः "सर्वेधर्माः राजधर्मे प्रविष्टाः" इति।

सुरेशः प्रिये, दार्शनिका एव राजशास्त्रिणः समभवन्। दर्शनेनालेखि राजधर्मः। आबालब्रम्हचारिणो नित्से दर्शनशास्त्रं द्वितीयविश्वयुद्धकारणमुपपद्यते। तस्य पुरूषोत्तम निर्माणं (Super men) संसारस्योद्देश्यमिति सिद्धान्तं समभ्युपागमत् नाजीहिटलरः।

इन्दुमती तथाहि, फ्रॉन्सस्य राज्यक्रान्तेः कारणं रुसोमहाशयं-प्रतिपादयन्ति। सोऽपिदार्शनिक एव।

सुरेशः अधुना संसारे सिद्धान्तयो रेवद्वन्द्वः प्रचलति। तथाहि मार्क्सस्य वैज्ञानिक समाजवादस्यरुसो मतस्यच युद्धं प्रभवति। अधिनायकतन्त्रे लोकतन्त्रेच समाजस्य लाभः कुत्र वर्तते तत्रैव सिद्धान्तो विवदते।

इन्दुमती किञ्च नित्सेमहोदयः दया हृदयस्य दौर्बल्यं व्याजहार किंसत्यं भवेत्।?

सुरेशः तस्माद् हिटलरो हिमलरसदृसान् हृदयविहीनान् निष्ठुरान् सहचरान् प्राप्नोत्। (*हसति*)

इन्दुमती तदैवाऽहिंसाया स्वरूपमिव गान्धिनं निरमास्त

देशोऽयम्। विचित्रा सृष्टिपद्धतिः।

सुरेशः हिटलरः सर्वातिशायी वर्बरो निष्ठुरः क्रूरः पुरुषोऽभूच्चिरेण ।

इन्दुमती स्वसिद्धान्तानुसारेण सर्वोत्कृष्टं वैज्ञानिकं आइन्स्टाइनं विवासयामास।

सुरेशः किस्वित्, तस्याऽसाफल्यमपि तत्रैव निहितमासीत्।

इन्दुमती यहुदी जातौ प्रलयकालेऽपि नघटिता भवेत् तादृशी विपत्तिः।

सुरेशः तस्य प्रभावादेवेजराइलदेशस्यास्तित्त्वमभूत् । तथाहि कस्यदोषः । सिद्धान्तवादिनोऽहिसायाः प्रतीकं गान्धिनमवधीत। का कथाऽन्येषाम्।

इन्दुमती नीवीवाद प्रणाल्यां प्रचलत्येवद्वन्द्वः। सत्यं, स्पर्धयाच संजायते विग्रहः समराग्नौ हुत्वासर्वं लभ्यते कष्टं, दुःखं, भयमकालमृत्युश्च। सैनिक वस्तूनिचात्रा धुनाह महमिकया समुत्पाद्य यन्त्रयन्ति यन्त्रमेव। (निःश्वस्य) धिक्कष्टम्।

सुरेशः धनमेव नहि जनमपि हृत्वा जिहीर्षन्ति। जन्ये तादृशी महती शक्तिर्हीयते। समरः समाज शक्ते र्नाशहेतुः। किञ्चैष नीवीवादप्रणालयाः परिणामः । युवतेः प्रसूतिरिव राष्ट्रस्यतारुण्यफलं युद्धमित्यवादीन्-

मुसोलिनी । किञ्च परमाण्वस्त्र निर्माणादेव समाप्तं युद्धमिति वदितुं न प्रभवन्ति । अनयादिशा कथं समाप्यते युद्धं कथञ्च संजायते शान्तिः ।

इन्दुमती (विचार्य) यथा साम्राज्यवादो नीवीवाद दशायां व्यशीर्य्यति तथैव नीवीवादोऽपि समाजवादावस्थायां विरंस्यति समागतो वैज्ञानिकसमाजवादः समय एव तादृशः समायातो, युद्धे सत्यपि नीवीवादो निवर्त्तते, युद्धाभावेऽपि तस्यनाशोऽवश्यंभावी । पाश्चात्यैः विधायचातुर्यं यदलेखिपुरावृत्ते स्वौदार्यं तदेव प्रत्येति मेभ्राता ।

सुरेशः तदेव विशदीकृत्य तवभ्रात्रा लिखितं पुस्तकं समाप्तं नवा ?

इन्दुमती (विहस्य) भ्रातुः प्रबन्धस्तु अन्तरा आस्ते । युद्धे विजयं समधिगम्यैव भटानां स्वंप्रति सहानुभूतिर्विद्यते इति भ्राता व्यमृक्षत् । तत्तु सत्यापलापमेव, तत्रोदाहरणानि वय मेवेतिप्रत्येतु भवान् इत्यवोचम् ।

सुरेशः (संस्मृत्य स्वगतम्) अस्याः शिरसि विस्रंसतेऽशनिः । तथाप्येषा प्रसन्नानना चिन्तारहिता वर्तते । परिस्थिति विघटयति भाग्यं तथापि व्यवस्यति वराकी ।

इन्दुमती (विमृश्य) किमर्थं ग्लापयति मुखमधुनाते । ताम्यसि

त्वं किमिति ? ।

सुरेशः प्रियतमे, प्रणयस्ते प्रेङ्खति माम् । स्वभाग्यस्य स्वरूपं हृत्वा कल्पनायां वहसि, वाऽऽयतिमपि चिन्तयसि तरलयसि हृदयं मे । मर्त्यलोकः खलु सर्वलोकानामुपरि वर्तते वक्तुं प्रत्यादिशन्ति व्यर्थमेवाधुना रूढिवादिनः ।

इन्दुमती (विमृश्य) बाढम् । जानामि सखे ! तवतात्पर्यम् । मच्चारित्र्यं निन्दितुं कोऽपि नपारयति उपेक्षे सर्वान् । गान्धर्वविवाहेनवृतोऽसि नलोकात् विभेमि, परिभवामि वृथाऽपवादम् । भवेयमहं जावाला, मत्पुत्रो-जायेत सत्यकामः ।

सुरेशः (सदयम्) सत्यकामा भव । किञ्च वैदिककालिको लोको ऽपक्षीयते तस्मात् भ्राम्यति मे मनः । अनुरङ्क्तुं नाहमभ्युपैमि तव वाचम् ।

इन्दुमती धीरस्यापिधाष्टर्यमारोपयति हृदय लघिमलङ्घित-मतिवल्लभत्वम् । भीत्वा नाहमुपरमामि स्वकृत्यात्, नच विप्रतिपद्ये ।

सुरेशः नाहमुपदिशामि भेतुं मा विभीयाः । किन्तु लोकापवादं खण्डयितुं किमर्थं नक्रियते प्रयत्नः । किमर्थमवलिप्यसे भद्रे ? ।

इन्दुमती (सरोषम्) ज्ञातंमया त्वमसि कातर इति किमर्थं-

त्र्यस्यसि नाहं तवशिरसि विस्रंसे वज्रं, कोऽपि यदि मां पृच्छेत् तदा यौवने विचरन्त्यामया कस्माद् गर्भो ऽधारि इति वदामि । यदि समागत्य बालोमे पृच्छेत् पितृनाम तदा तवमाताचाहं नविन्दे तवपितर-मित्यभिवक्ष्यामि । दायार्थमेवगृह्णीते पितृनाम, य स्वबाहु बलेन जीवनं यापयिष्यति निरस्यति स दायप्रथाम् । (*क्षणं तूष्णीं भूत्वा निःश्वस्य सास्रम्*) उन्मत्तसमाजभयान्नाहं व्यापादयामि गर्भस्थं सुकुमारं कुमारम् । मातृशब्दमेव कलङ्कयितुं नचक्षमे जानाम्यहं गर्भपातस्य साधनानि किन्तु कोपराध स्तस्य किञ्च स्वस्यापराधमपि नाभ्युपैमि । प्रणयः खलुस्त्रीणां जन्मसिद्धाधिकारोभवतिचेत् तस्य फलमवश्यमेव स्वीकर्तव्यमिति मे राद्धान्तः । किमर्थं बिभेमि नचतवोपरि निक्षिपामि भारम् । भ्रातामे नयति मामधिकरणे इदमपि जानामि, प्राड्विवाकः कस्य गर्भमिति पृच्छति तदपि जानामि । भवतु अधिकरणे गत्वा ब्रुवे सर्वं वक्तव्यजातम् । (*वाष्पनिरुद्ध कण्ठी भवति*)

सुरेशः (*सवास्पगद्गदम्*) अन्यदेवाभिहित मन्यदेवाऽश्रावि । त्वांपरिष्वज्य, अधरामृतमाचम्य, हृदयकपाटं समु-

द्वाढ्य नाहं मोहं ब्रवीमि प्रिये !। वीरप्रसविनी भूयाः। अभिमन्यते समाजस्त्वा मवाप्य।

इन्दुमती सखे ! वरः खल्वेष नाशीः।

सुरेशः (*उपहसति*) मयानोभ्युपगम्यते तदाकिं स्यात् ?

इन्दुमती जात्याः भ्रंशे इत्यत्र नमनागपि मेभीतिः। कीदृशी साजातिर्यस्यामपक्षीयते मानवता यत्रापचीयते वन्धुत्वं, यस्यामल्पीभवति सौहार्दम्। स्पृष्ट्वा नरं नरः कथं भ्रश्योजात्याः।

सुरेशः "सत्यमेव जयते" इत्यत्र ममास्ति विश्वासः। किञ्च कुत्र वर्तते स्पर्शा स्पर्श विचारः।

इन्दुमती यदि मूढोलोकोमा मस्पृश्यवर्गं गणयति तदातु मुदसादद्रे। प्रायशः सहाशनादिभिर्जन्यते भृशमा श्वासः। किस्विच्चाण्डालवर्गे विदुषी भूत्वा तेषांजोती-यलाञ्छनमपमार्ष्टुं प्रक्रमे। (*अश्रूणिमार्ष्टि*)

सुरेशः (*सास्त्रमञ्जलिं वद्ध्वा*) हृदयेश्वरि, खलूक्त्वा, एष दासो वरिवष्यति भवतीम। अभिनन्द्य त्वच्छिद्धान्तं परिणीतासि मासम्भावयत्वन्यथा विस्रम्भतांमयि।

इन्दुमती (*सनिर्वेदम्*) प्रिय, श्रद्धधामित्वाम्। यद्यपाकरोषि तथापि नाहमनुतप्ये। कानीना बह्व्योऽराजन्त। कन्यायाः जन्म समाद्य बुद्धेर्विकासो नरुध्यते।

कानीनो वादरायणोऽर्हतां प्रागसरोऽभ्राजिष्ट। कानीनः कर्णो वीराग्रणीः समजायत। कानीनः प्रेममूर्त्तिः ईशामशीहो ऽपि महात्माऽभूत।

सुरेशः (*विचार्य*) प्रिये, मानवता मुल्लङ्घ्य क्षणमपि जीवितुं नाह मुत्सहे। नाहं नृशंसोगिरिशस्तुल्यः पिशाचोयोविलङ्घते कर्तव्यम्। किमर्थं विभेषि वाले विस्मरिष्यसिवा परिणीतपूर्वा मयाचात्र भवती।

इन्दुमती (*अङ्गुल्यास्वोदरं निर्दिश्य*) अत्रत्यो डिम्भः समाजं वन्धनादुन्मोचयितुं प्रयस्यति वा कोनु जानीते। सङ्ग्रामये स्रष्टु मेनम्।

सुरेशः तथास्तु। रक्षैनंभ्रूणं। यःकिलाधिशेते तव गर्भाशये स तव मनोरथात् पूरयतु निष्पद्यतां सर्वम्।

इन्दुमती सखे! भुक्त्वा यातनां, भङ्क्त्वा शरीरं भर्जित्वा सुखं, भित्त्वा हृदयं भ्रंशित्वा चात्मानमपि विभरिषामि सुकुमारमर्भकम्। हिनस्मि नाहं हृदयांशहरं मनोहरं सुकुमारं कुमारम्। मातृत्व कलङ्ककारिणी कुल कलङ्का शम्पासदृशा वात्सल्यामृतमयं स्वभ्रूणंप्रति बद्धमत्सरा नाहं सर्पी। (*शून्यमवलोक्य तूष्णीमास्ते*)

सुरेशः नाहं व्यभावयं स्वप्नावस्थायामपि गिरिश एतादृश आततायी भविष्यतींति। रजत खण्डेन जना स्वरूप

मपि कदर्थयन्ति । (दन्तान् पिष्ट्वा) सत्यम् । नातता-यिवधे दोषः ।

इन्दुमती प्रमादस्य बीजंनिहितं नीवीवादे, यत्र स्पर्धा स्पर्धते धनिम् ।

सुरेशः विशेषणाधिक्षिप्तासि देवि । अर्थवान् खलु मे भविष्यति कूटनीतिज्ञः शब्दः । ततः सोऽभिज्ञास्यतिमाम् । प्रिये यद्यधिकरणे नीताचेन्मन्नाम ग्रहणेनानुग्राह्योऽयं जनः । तदा तवाराधयिता जनस्तवसमीपेवर्तेत । हृदयेश्वरि, नैतत्परिहार्यम ।

इन्दुमती (सानुरागम्) यदाज्ञापयति प्रियबन्धुः । असाधारणोऽयंप्रणयः । सर्वथा नुगृहीतास्मि ।

सुरेशः (हुंकृत्य) तुत्रुटिषामि बन्धनशृङ्खलां समाजस्य, विघटयामि लोकस्य कुप्रथायाः परिपाटीम् । आत-तायिन स्तस्यरुधिरेण तर्पयामि पृथिवीम । अश्रुधा-रया सिञ्चामि प्रणयाङ्कुरम् ।

इन्दुमती (साञ्जलिः) महाभाग, भ्रातरंप्रतिद्वेषंमुञ्चतु । सोन-सत्कुरुते मामित्यभिजानमि परन्तु पितुः प्रेम्णा ननि-र्य्यातयामि । प्रसीदतु सखा ।

सुरेशः (सगम्भीरम्) अतः परमलमुक्त्वा ।

इन्दुमती (निःश्वस्य) वयस्य, महद्वैचित्र्यंवर्तते । पुरुषा धर्षयन्ति

नारीम् । व्यभिचारेणपतनं संजायते तासामिति तेऽवमानयितुं पुनः प्रयतन्ते । विहस्याधिकरणे प्रत्युत्तरयितुं शक्नुयामित्येव शक्तिरायातु मयि । (वाष्पनिरूद्धस्वना स्वाञ्चलेन मुखं प्रावृणोति)

सुरेशः (सास्रम् मुखं परावृत्य) प्रिये, अलमलमायासेन ।

इन्दुमती अशरणास्मि ।

सुरेशः (सास्रमभिमुखीभूय) कथ मशरणासि ? मृत्यु मुखादपि व्युदस्यामि त्वाम् । तव हृदयैकबन्धुर्यः स तव समीपे सदा वर्तते ।

इन्दुमती बहुवित्तव्ययेन व्यवहारे विद्वान् वादी स्थापितो विद्यत इति श्रूयते ।

सुरेशः प्रिये, मुक्तसाध्वसा सत्वस्था भव ।

इन्दुमती सखे, किं सर्वमक्षिणी निमील्य सोढ़व्यंमया ।

सुरेशः वासु, समाने व्यवहारे न्यायोऽपि संजायते समानः । उपदेश-विशुद्धात्वमधिकरणे प्राड्विवाकाग्रे यातुमर्हसि ।

इन्दुमती पित्रादत्तं धनमाहर्तुं यतते भ्राता, शम्पायाश्च धन मपहर्तुं वाञ्छति अहो ! आश्चर्यम् । स्वस्वरूपं ननिभालयति, भवतु स मे सर्वस्वमादत्ताम् । तृप्यतु तस्य कामपिपासा । सत्यम्, नवित्तेन तर्पणीयो

मनुष्यः ।

सुरेशः सिद्धान्तानुसारेण निर्धारितं भवतिन्याय स्वरूप मिति विस्मरति भवती। गोपाल एव प्रच्छन्नोनोरिपुः । भगिन्या सर्वस्वमभिलषितुमुत्पथे नयति ताम्। गर्भ-पातने सहकारी गिरिशस्य स एवेति जानामि।

इन्दुमती लोकः ज्ञात्वापि नयने निमीलति, किंतेन।

सुरेशः किन्तु सुरेशस्तु जागर्ति। अरेरे समाजमेवाभिसन्द-धाति कथम्। किंवा सर्वानवधीरयति। सुरेशोऽपि जानीते तं नरापशदं पिशाचं प्रतारयितुम्। पश्य प्रिये! सर्वम्। (दन्तै र्दन्तान् संघट्टयति)

इन्दुमती लक्ष्यमन्यदेवास्माकं वर्तीवर्ति तदपि विचारणीयं त्वया।

सुरेशः प्रिये, नहिजानासि लोक वृत्तित्वम्। सर्वत्रनैवभा-व्यमृजुना। कण्टकेनैवकण्टकमिति नीतिं ननिचायसि।

इन्दुमती स्पर्धया व्याकुलास्मि। संरक्ष्य स्वस्याऽस्तित्त्वं नसं-भवति सफलाऽऽयतिः पतित्वा प्रयोगसाफल्यं कल्प-यामि। तथाहि, उज्ज्वलप्रयोगः परिणामं शङ्कयत्येव।

सुरेशः सुभगे, आशावादिनोवयं स्मः। किञ्च यौवनारम्भे जीवनमेवाशामयं प्रायशो भवति। किंकल्पितमपि-भवेत, मार्गे मार्गे विद्युत् प्रज्वलिष्यतीति। शक्यमा-शाबन्धेनात्मानंधारयितुम्।

इन्दुमती (*सस्मितम्*) सत्यम् । पुरा हिममानेतुं हिमालये गन्तव्यमासीत् अद्य हिमार्थ मेकपणकं पर्याप्तं भवति । किञ्च, पुरा हिमशीतलंपेय माचमिषुः सम्राज एव, रङ्का अप्यधुनोपस्पृशन्ति ।

सुरेशः प्रिये, कालः करोतिकर्म्म (*सस्मितम्*) सतीप्रथाया इव लोपः संजायते सतीत्त्वस्यापि ।

इन्दुमती किंस्यात् ?

सुरेशः प्रिये, यौवनारम्भइवसुवनस्य विद्यते ।

इन्दुमती नकेवलमयमनिन्द्यो वन्द्योऽपिप्रकाशित सत्सारः संसारः ।

सुरेशः अस्यां घटनायां विद्यते मुरारि रिति संभावयामि ।

इन्दुमती नाभ्युपैमि, तत्रकोहेतुः ।

सरेशः सदैवप्रतिबध्नाति सोऽस्मत्सिद्धान्तम् ।

इन्दुमती गणतन्त्रे सिद्धान्तानुसारेण मार्गमाश्रयन्ति विद्वांसः । किंतेन, मां दृष्ट्वा स निर्विद्यते, विनीतो, व्याकुलो विमलो विलक्षण प्रकृति र्मुरारिर्व्याकुरुते दर्शनशास्त्रम ।

सुरेशः आस्तां तस्यादर्शोदूरे । आदर्शो न त्रायते प्रमत्त समाजं, नक्तंदिवं जुगुप्सते साम्यवादं मूढः । किञ्च, मूर्खो मुरारि र्व्यक्तिगतस्वातन्त्र्यं समधिगम्य स्पृहयति रामराज्याय ।

इन्दुमती बलात्स्वसिद्धान्ते समानीय कथं संजायते प्रतिष्ठिता-
सिद्धिः ।

सुरेशः (साटोपम्) दण्डनीत्या सर्वेवशमायान्ति, पूर्वावस्था-
यां यदि शैथिल्यंविधीयते चेन्नावतिष्ठते साम्यवादः।
आतङ्के नैवोद्विग्नाः प्रजाश्चिन्तयन्ति साम्यवादमिति
कथं विस्मरसि ।

इन्दुमती मुरारये नहि रोचत आतङ्कः।

सुरेशः मह्यमपि नरोचते, किन्तुसिद्धान्त प्रसारणाय सैव
सुकरा सरणिः ।

इन्दुमती कठोर स्त्वमसीत्यभिजानामि! वज्रादपि कठोराणि
मृदूनिकुसुमादपि मनस्विनो मनांसि भवन्ति ।

सुरेशः सत्यम्, वज्रसारोऽस्मि। ममक्रोधानले बहवः शल-
भायन्ते। यातनया मया दत्ता अञ्जलिर्दयायै।

इन्दुमती निष्ठुर, तेन कोलाभः ।

सुरेशः समाजं जारयितुं प्रवृत्ताः कीटा निश्शेषा भवन्ति ।
इतः परं महाँल्लाभः को भवेत। प्रियतमे, शृणु सर्वं-
श्रोतव्यम् । स्वीकर्तुं वद्धपरिकरोऽस्मित्वां, तथापि
तव भ्रात्रा अत्याहितम्। पित्रादत्तांवित्तं देयंस्यादि-
तिधिया अन्तर्वर्तनीं त्वां विवाहविधिनादातुं नसमी-
हते। अतो ऽपिवक्तव्यं विद्यतेकिं ?। अनुजानीहि प्रिये,

ततः स्वकृत्य मुपसंहृतमिति। (*सस्मितम्*) स्फूर्जितमिव शृङ्गाररसेन, वल्गित मिव लावण्यलक्ष्म्या, विकसित मिव वसन्तमासेन, हसितमिव रूपसंपदा त्वां हातुं कथमहं प्रभवेयम्।

इन्दुमती प्रियतम, उत्पन्न कतिपय प्रियालापा प्रीतिः सतां लक्षण मेव, तेन निर्वर्तते साप्तपदीनं सख्यम्। किन्त्वा तिस्नेहः कार्यदर्शी सिद्धयति।

सुरेशः किंवक्तुकामात्रभवती।

इन्दुमती प्रत्येमि त्वयि, तितिक्षस्व।

सुरेशः स एवास्यषड्यन्त्रस्य संचालक इति ज्ञात्वा ज्ञात्वैव तूष्णीं स्थातुं नपर्य्याप्नोमि।

इन्दुमती (*सभयम्*) मुरारि रेवेतिकथं सङ्गिरसे।

सुरेशः (*सप्रणयम्*) प्रिय, गोपालमुरारी द्वावेवचात्रमध्ये पतितौ। निवर्तस्व सखि, प्रवचनात्त्वांक्षणेनैव स्पष्टीकरिष्यामि। यदि नस्यात् तथापितर्कं कथंमभिनिविशसे।

इन्दुमती विशदतु सर्वं भवान्।

सुरेशः मठे मुरारिः समागतो भवेत्। आमन्त्रितोऽस्मित्वां प्रत्येतुम्। (*घटीयन्त्रं विलोक्य*) विलम्बः संजात एव। (*दूरे नीरूप्य*) प्रिये, पश्य समागच्छनित

एवास्ते ।

इन्दुमती आम् । तथाचेद् द्य दर्शनशास्त्रं विवदे संनह्यामि तम् ।

(मुरारिः समीपे समागत्य उपविशति)

इन्दुमती (साश्चर्यम्) कस्मात् ?

सुरेशः (युगपदेव) कुतः ?

मुरारिः (सस्मितम्) स्वेनैवामन्त्र्य नपरी पृच्छ्यते ।

इन्दुमती नबुद्धं भवता, किं स्थानंपर्युत्सुकी क्रियसे ऽधुना, कुत्रविवादं विमथ्य प्रतिनिवृत्त आर्यः ।

मुरारिः किमुपहससि बाले (सुरेशं विलोक्य) मामवधीरयितुं समाह्वयत् भवान् ।

इन्दुमती नहि नहि प्रार्थयितुं; मित्र, किमर्थंमुपेक्षसे समाजम् । आह्वयति समाज स्त्वादृशमेव बुद्धिमन्तम् । कर्मत्यागिनां जडानां सिद्धान्तं समधिगम्य पर्णशालायां क्रिमर्थमात्मानं सन्दानयसि ।

मुरारिः भवन्तौ विद्येते लोकोद्धाराय बद्धपरिकरौ ।

इन्दुमती कं प्रतारसि मुधैव,

मुरारिः (सखेदम्) अधिकमलवसतिरनार्यसंगता स्त्री श्रीश्च कंनप्रतारयति ।

सुरेश आर्यानार्यलक्षणं संम्पादयितुं नशक्यते ?

इन्दुमती आर्यानार्यभेद एव भेदयति विश्वं, जातिभेदमाश्रित्य मनुष्यस्यैक्यं कलङ्कयितुं कूटनीति प्रसारिता वर्तते ।

मुरारिः बाढ़मनुमन्ये । अमेरिका प्रदेशे जातिभेदस्योग्ररूपं वर्तते दार्शनिका स्तु "शुनिचैव श्वपाके च पण्डिताः समदर्शिन;" इतिमतं समर्थयान्त ।

सुरेशः वयमपि नात्मानमवमन्येतपूर्वाभिरसमृद्धिभि, रितिसिद्धान्तं समर्थयामः ।

इन्दुमती (*सस्मितम्*) समदर्शिना दार्शनिकाः साम्यवादं किमर्थं व्युदस्यन्ति ? किञ्चात्मानामनो विषये स्वात्मानं परिभवन्ति ।

सुरेशः उपनिषदि "अस्तीत्येके नाय मस्तीति चैके" इत्यनेन निरूपयितु रसामर्थ्यं प्रकटीकरोति । तर्कस्याप्रतिष्ठान विषये किमर्थमात्मानं ग्लपयसि ।

मुरारिः (*विहस्य*) अत्रापि संदेहोभवतः, अहमस्मिनवेति प्रत्यक्षेकिमनुमानम् । "मयिविचारशक्ति र्विद्यते तस्मादहमस्मि, किमितिचे दहमस्मि तस्मादेव विचारयामि इति डेकाट महाशयो व्याचष्ट । आचार्यः शङ्करोऽपि तादृशभावसमुपवद्धं श्लोक मुपश्लो कयामास ।

तथाहि- अहमित्यस्मिन्नर्थे कस्यास्ति संशयः पुसः।
अत्रापि संशयश्चेत् संशयिताय: सएवभवसि त्वम् ॥

सुरेशः सत्यंननिर्दिशति देकार्टस्यांनुमानम्। दुष्यति हेत्वाभासोऽनुमानम् विचारोऽस्तीत्येवंपर्याप्तमासीत्, विचारात् वस्तु स्वरूपस्य, कर्तुं निर्धारणमसमीचिनमिति काण्ट स्तं Parallelism of Reason इत्यवोचत्। परीक्षात्मके वस्तुनि विश्वासमाश्रयति काण्टस्तु।

मुरारिः बाढम्। यदित्वं काण्ट सिद्धान्तं स्वीकरोषिचेद् काण्टस्तु "वाह्यपदार्थान् ज्ञेयान् तस्य प्रमातारमात्मान मज्ञेयमज्ञेययो स्तयोः संबन्धमप्यज्ञेयमित्यादिशति तदपि त्वयास्वींकार्यम्। कर्तव्यबुद्धयाकर्तव्यं कर्मफलाभिलाषां परित्यज्य कार्यमिति श्रीकृष्णस्य "कर्मण्येवाधिकारस्ते" इति सिद्धान्तं परिपुष्णाति।

इन्दुमती अपवार्य) कर्मकराः स्विद्यन्तु फलं महाजनो प्रत्यश्नस्यतु कीदृशोऽयमत्याचार पूर्णः सिद्धान्तः।

सुरेशः सत्यम् दर्शनस्थिता दमदान दयादयोधर्मा अपि यन्त्रयन्ति निर्धनान्, मधुरयागिरा शोषणनीतिं व्यवदधति।

मुरारिः (विमृश्य) सिद्धान्तमालभसे वृथैव, श्रवणानन्तरमर्जुनोऽयुध्यत।

इन्दुमती नीवीवादस्यान्तिमः परिणामः समर एव । भवतु । अर्जुनोऽयुध्यत तेनकिं ? तस्यप्रबुद्धत्त्वं ध्वन्यते ।

सुरेशः समरे यो योजति तादृशसिद्धान्तानुसरणेन समाजस्य नकोऽपि लाभः ।

मुरारि (सस्मितम्) दकारत्रयं खण्डयित्वा मकार पञ्चकं समर्थयसि । साम्यवादोऽहर्निशं यमातङ्कं कल्पयति तं कथङ्कारं लोकः समर्थयतु । किञ्च, वायुः पक्षिणं निरुणद्धि स्वातन्त्र्यात् किन्तु वायुमण्डलाद्बहिर्विहगा उड्डयितुं नशक्नुवन्ति । काण्टोऽध्यगादिममेवसिद्धान्तम् ।

इन्दुमती सिद्धान्तोऽपि सदैवादर्शानुरूपेण निर्मीयते ।

मुरारिः पूर्ण स्वतन्त्रतायै, कर्तव्यफलावाप्तये, कर्तव्यकर्मप्रवृत्तये चामरत्वस्यावश्यकं विद्यते । संपद्यते तस्मादीश्वरः । तथाहि सत्यस्यविजयाय कर्तव्यकर्मणि योजयितुमपि संजायते परमेश्वरस्यावकत्वम् । सत्यम् । ईशावास्यमिदं सर्वम् ।

सुरेशः भो ! सत्यापलापिन, दर्शं दर्शं संसारिणांमहद्दुःखं कथं प्रत्येसि कारुणिकः सर्वज्ञ ईश्वर इति ।

इन्दुमती (विहस्य) डार्विनोऽपीत्थमेव व्याहार्षीत् ।

सुरेशः संस्मराम्यहम्काण्टोऽपि स्वसिद्धान्तेऽनैकान्तिकत्व

मगादिति ।

इन्दुमती तथाहि, नास्तिकसिद्धान्तं समबलम्ब्य स्वभावसिद्धं संसारं भणितुं नाशक्नोत् । माया कल्पितंविश्वमिति वेदान्तमतं समर्थयितुं नाक्षमिष्ट। नच द्वैतवादिना-मिव बाह्यशक्त्या निर्मितमिति प्रतिपादयितुञ्च नप्रा-गल्भिष्ट। सर्वत्र विद्यतेऽनिर्वाच्योदोषः।

मुरारिः भद्रे, अत्रैवविवदन्ते दार्शनिकाः।

सुरेशः भवतु । वदतु, भवान् कंसिद्धान्तं समाश्रयति।

मुरारिः (विचार्य) कं कलयामि विद्यते सर्वत्रवितण्डावादः। भ्राम्यति मेचेतः। नाहमवलोकयामि मार्गम्।

इन्दुमती भद्र, मुधैवभ्राम्यसि । तथात्त्वे समूहयानं समाश्रय ।

मुरारिः ईश्वरस्य वैशिष्ट्यं स्वरूप दुर्बोधम्, तथापि तस्यमहा-सत्ता ज्ञायत इति हर्वटस्पेन्सरः प्रत्यपीपदत् ।

सुरेशः कथमिव ।

मुरारिः यदिबोधः सम्बन्धग्रहणे नियमितो विद्यते चेदव श्यमेव संबन्धातीतः पदार्थो वर्त्तते यत्रबोधश्च्यवते। तस्मादेवविश्वसिमि मूलशक्ति महासत्ताम्। वादस्य विवादेन नकोऽपि लोकस्य लाभः।

इन्दुमती किंस्वरूपा ? कीदृशी महासत्ता ?

मुरारिः अनिर्वचनीया खल्वेषा। नैयायिकैः प्रतिपादिता सा

जातिः। किञ्च वर्गसनस्तु यस्या मुख्यस्वरूपं परिवर्तनमेवेव्यचीचरत्। किंस्विद् नामसादृश्येऽपिताक्त्विको भेदो वर्तत इति संभावयामि।

सुरेशः बौद्धैस्तु खण्डितो जातिवादः। किञ्च, वर्गसनः परिवर्तनमेव जीवनं जीवनमेवसंसारस्यमूलतत्वमिति परामार्क्षीत् भवेत् तस्माद्भेदः।

इन्दुमती अलमुक्त्वा, प्रतिबध्नाति भवान् किमर्थं साम्यवादम्।

मुरारिः व्यक्तिगत स्वतन्त्रतायाः साम्यवादे संजायेतेऽत्यन्ताभावः।

इन्दुमती आर्थिक परिस्थितेस्तर्कशक्तिं द्वेष्टि तवाध्यात्मवादः। किं तदेवदर्शनं श्रद्दधासि, यत्र प्रारब्धभोगजनित विभेदकल्पनया जाता शोषणस्य चरमावस्था। प्रारब्धवादेन समाजस्य चैकताखण्डिता। अनर्थपरम्परया समाजशक्ते ह्रासो भवतितत्र। तस्मान्नमानयामि तवाध्यात्मवादम्।

सुरेशः (*विहस्य*) सत्यं वद, किं त्वया समासादितः परमेश्वरः। दृष्टं संसारं विहाय अदृष्टकल्पनया दुःखजालं सहसे? विभेषि मुधापरत्र कल्पनया, क्लेशयसि स्वान्तं सदैव (*सान्त्वयन्*) मित्र, त्वमसि समाजस्य

धनं तस्यहिताय जीवनं समर्पय। भद्र, त्वया नोम् शुष्क धन गर्जितायां तमिस्रायां जलपानमिच्छता चातकायितम्।

इन्दुमती (*सस्मितम्*) सत्यम्।

महतापि प्रयत्नेन तमिस्त्रायां परामृशन्।
कृष्ण शुक्ल विवेकं हि न कश्चिदधिगच्छति॥

मुरारिः श्रीमन्, सत्यं वदानि सर्वत्र हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्। किञ्च सर्वज्ञस्याप्येकाकिनो निर्णयाभ्युपगमोदोषाय भवति। (*सस्मितम्*) युवामेवोभिनन्दथः। नाहं प्रत्येमिसाम्यवादम्। विचारयथः प्रायः समानविद्याः परस्पर यशः पुरोभागा इति। किञ्च समाजस्य वैचित्र्यमेव समर्थयति प्रारब्धम्। साम्यावस्थायां नैव सृजति विश्वं प्रकृतिः। प्रारब्ध एव शोधयति दर्शन सरणि मितिज्ञात्व नाहं विमुह्यमि।

इन्दुमति (*सखेदम्*) धिक्कष्टम्। निर्धनान् क्लिश्नाति धर्मः।

सुरेशः भद्र, सत्वमाह चात्र भवती। नयुक्तं सुभाषितं प्रत्याचरितुम्।

मुरारिः बाले, असंबद्धं प्रलपसि त्वम्। अबलीयान् बलीयां-समासंशते धर्मेणेत्यौपनिषद्गाः प्रत्यपद्यन्त।

इन्दुमती मधुतिष्ठति वाचि तेषां हृदये हालहलं महद्विषम् वर्तते।

मुधा प्रतारयसि मुग्धान्। सत्यम् । बहुशाखा ह्यनन्ताश्च बुद्धयो व्यवसायिनाम्।

मुरारि (सस्मितम्) विदुषि, विचारशक्तियुतोजन्तुर्मनुष्यो नाभिलषति पुनः पशुश्रेणीं गन्तुम्। वर्तते येषामधिकोविशेषो धर्मः।

सुरेशः (सगर्वम्) जानामि सर्वं सर्वथा परद्रव्यहारिणो धूर्तास्ते धार्मिका इति।

मुरारिः (कर्णौस्पृशन्) शान्तं पापम्। सुरेश, मर्यादां मानयन्ति मयस्विनः मर्यादां प्रतिपद्यस्व। सत्यं समधिगम्य ये प्राणान् जहुर्महामान्या महापुरुषस्तान्निन्दितुं नपारयसि ममाग्रे। सत्यार्थे विषं पपौ सुकरातः शङ्कुमालम्बिष्ट क्राइष्ट अयस्पिण्डमदधिष्ट गान्धी कस्य नप्रतीक्ष्यो मुनिभावः। एषां सिद्धान्त आसीत्–(चिरायपठति)

"कलिकलुषकृतानियानिलोके
मयिनिपतन्तुविमुच्यतांतुलोकः" (निमीलिताक्षस्तूष्णी मास्ते)।

सुरेशः आम्। जानीहि, तेषां प्रतीक्ष्यो मुनिभाव इति। किञ्च तेषां सिद्धान्तं धर्मं तुल्यं विधाय स्वार्थं साधितं धूर्तैः।

इन्दुमती नाहं प्रत्येमि तान्। यदि स्युस्ते महान्तः स्त्रीणां समान

धिकारं न्यरौत्सीषुः। तेभावुकाः सन्त स्वाज्ञाना-
दपरीक्ष्यैवादर्शं वर्णयित्वा कदर्थयन्त्यहर्निशं समा-
जम्। येषां सिद्धान्तस्तुदति सदैव।

सुरेशः स्पष्टीकृतं रहस्यं भवत्या। काष्ठानुयायिभिः पोपै सोमराज्ये किमविधायि, बौद्धमतानुयायिभिः विहारे मठेच किमकारि, गान्धिनमस्त्रं विधाय किं स्वार्थं साध्यते गान्धिवादिभिः सर्वं मैतिहासिका नामग्रे वर्वर्ति।

इन्दुमती नीवीमतां पृष्ठपोषका तादृशा वैडालव्रतिनो धूर्तायद्या दरणीयाः स्युः × (मध्ये एव)

सुरेशः तदा भवेयुः के नाम वध्याः।

मुरारिः शांन्तंपापम्। उक्तञ्च—

परलोक विरुद्धानि कुर्वाणं दूरत स्त्यजेत्।
आत्मानंयोऽतिसंधन्ते सोऽन्यस्मै स्यात्कथंहितम्॥

सुरेशः (भर्त्सयन्) वर्वर्ति वडवाग्निरिव सागरे, धर्मोदरे पापगाथा। प्लुष्यति सर्वेषां दहराकाशेऽधुना। नजाने स सन्धुक्षयति कदा ब्रह्माण्डपिण्डम्।

इन्दुमती उपकरोति जडवाद एवास्मान्।

सुरेशः सत्यम्। सम्भावयामि पतनस्यकारणं दर्शनम्।

मुरारिः (विहस्य) उपर्युपर्येवोपप्लवसे वत्स! भवन्ति दूरस्था

पर्वताः रम्याः उद्गारंवमितु नप्रभवन्ति रूसस्थाः प्रजाः। नोवीवादे देहोदासो भवति अधिनायकतन्त्रे वित्तं चित्तं च पराधीनं भवति।

इन्दुमती (सरोषम्) अथास्प वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरण मिति। यद्यु ह्वा एतच्छमशानं यच्छूद्र स्तस्माच्छूद्र समीपे नाध्येतव्यमितिच किमुक्तमेतत्।

सुरेशः तस्य व्याख्याया मद्वैतवादी शङ्करो व्याजहार भवति च वेदोच्चारणे जिह्वाच्छेदो धारणे शरीरभेदइति। अत्योहितम्, तादृशं धर्मं स्थापयितुं प्रयस्यसि।

मुरारिः विद्ययैव समंकामं मर्तव्यमितितेषां सिद्धान्तो भवेत्। एतादृशी कुभावनाऽ द्यावधिजागर्ति; किञ्च परमागवस्त्रसमाधिप्रकाशनात् करायांनिक्षिप्तो जन इति पत्रिकायाभपठिषम्। किंप्रशंसनीयमेतत्।

सुरेशः विप्रकर्षसि दोषान्; कश्लाघते तस्मै।

मुरारिः (सस्मिम्) नाहमनुगच्छामि प्राच्यानामेवसिद्धान्तम्। निसर्गस्वैरिणी स्वरूच्यनुरोधिनी भवति ममभतिः।

इन्दुमती भद्र, जानामित्वाम् "नाभिनिविशसे" इति, तस्मादहं ब्रवीमि 'ईश्वरविश्वासोविदारयति परस्परं समाजमिति'।

मुरारिः व्यावृणु विवक्षितं, स्वतन्त्राऽसि । किन्तु क परमाणु परिमाणं हृदयं क समस्त ब्रह्मस्तम्भव्यापि ईश्वरस्य चरितम् । (हसति)

सुरेशः (सरोषम्) नयने निमील्य प्रलपसि ।

मुरारिः (सान्त्वयन्) भ्रातः, दीप्यते यत्रसाम्यवाद स्ताहश रूसस्य सर्वा वार्ता मया ऽध्यगायि । ते समूहयान गामिनः शर्मण्यदेशस्थितानि यन्त्राणि तस्मादुन्मूल्य नीत्वा स्वदेशे विन्यस्यन्ति तदाकगतो मानववादो जनवादः ।

सुरेशः किंते व्याकरणीयं वर्तते ? ।

मुरारिः महतः पीटरस्य राष्ट्रियत्वं सेनासु प्रति श्रावयन्ति युद्धार्थे सर्वानतीत्य क्रियते तत्र व्ययः ।

इन्दुमती कोऽभिलाषस्ते वद । किमुपदिससि ? । रूसस्यविनाशे निर्धनानामाधारो नश्यति ।

मुरारिः विश्लेषणं विधायाधीष्व तदा ज्ञास्यसिसर्वम् । प्रचारं प्रसारं श्रुत्वा नकोऽपि विद्वज्जनोविश्वसिति ।

सुरेशः तूष्णीमास्व । जानामि याथातथ्येन सर्वम् । महिष-स्याग्रे मृदङ्ग वादनमिव संजातम् ।

मुरारिः (सखेदम्) वत्स, स्वजन्मभूमि प्रणयं विहाय तमेवदेशं किमर्थं श्रद्धासि ? । राष्ट्रितायै दत्ता किमिति

जलाञ्जलिः, । प्रियोऽसीत्यमिधीयसे, देशंपर्णीकृत्य प्रवर्तसे वृथैव ।

इन्दुमती नसुदूरं तव चक्षुरीक्षते। देशप्रेम्णैव वयं संलग्ना श्चात्र।

सुरेशः प्रिये, जानात्येष कर्मत्यागिनां निष्कर्मप्रतिवादकानां संन्यासिनां न्यासम्। (परावर्तते)

मुरारिः सत्यम्। भगवती वैधेयेऽपि धर्मगृहिणी गरिमाणं संपादयति प्रवज्या किं पुनः सकल साम्यवादे विद्वज्जने।

इन्दुमती कि मुक्तं युक्तं भवता सर्वसत्वानुकम्पिनी प्रायः प्रवज्येति।

मुरारिः (विहस्य) सत्यामाह चात्रभवती।

सुरेशः मूर्ख, इत्थंप्रवर्तमानोऽनवधेय वचन तया प्रेक्षावद्भि रुन्मन्तवदुपेक्ष्येत। यदि नस्युः समरसाधनानि प्राचुर्येणतदा सर्वे नीवीमन्तो मिलित्या चूर्णयन्ति रूसदेशम्। नज्ञायसे।

इन्दुमती नच स्वानुभवापलापः प्राज्ञमानभियुक्तः कर्तुम्।

मुरारिः यथाऽयं साम्यवादसमय उपपत्तिमस्त्वाय परीक्ष्यते तथा तथा सिकताकूपवद्विदीर्यत एव, नकांचिदप्यत्रोपपत्तिं पश्याम अतश्चानुपपन्न साम्यवादतन्त्रव्यवहारः।

सुरेशः (सरोषम्) बाढ़मेवं ब्रवीषि, निरङ्कुशत्त्वात्तो तुण्डस्य,

न तु युक्त्युपेतं ब्रवीषि ।

मुरारिः- स्वसंस्कृतिमुन्मूलयितुं यतसे ? नलज्जसे थिमु स्वदेशं ध्वंसयितुम्

सुरेशः- मृष्यन्ते हि साम्यसुधामहाह्रदावगाहिनः कुशलाश्चै ताद‍ृशीं दुःखचह्निकणिकाम् ।

मुरारिः- (निःश्वस्य) स्वदेशातङ्ककारिन् ! अविनय निदान-तया स्वातन्त्र्यस्य त्वमेताद‍ृश संजातः । धिग्कष्टम् ॥

इन्दुमती (अपवार्य) सुरेश, अलंकारोहि परमार्थतः प्रभवतां प्रश्रयातिशयः । तूष्णी मास्यताम् ।

सुरेशः (सासूयम्) प्रिये, शठः खल्वेषः । भोक्ष्यत्यचिरेण स्वकृत्यफलम् । मन्ये, प्रचलितान्धपरंपरा संस्कार-स्वरूपा संस्कृतिरिति ।

मुरारिः (सखेदम्) मुग्धे ! भुजङ्गे हस्तं समर्प्य परिभ्रष्टासि ।

सुरेशः (साट्टहासम्) कीद‍ृशोऽयं पशुः, परहस्ते स्वस्त्रि य विन्यस्य सतीत्वस्य व्याख्यां विधत्ते । "नस्त्रीस्वातन्त्र्य-मर्हति" इतिमनुसिद्धान्तं विश्वस्य युवतिभार्यां पर-हस्तगतां कथं कुरूते । भवति परोपदेशे पाण्डित्यम् । अत्याहितं सर्वम् ।

मुरारिः आपाप, असंवद्धप्रलापिन्, सत्यमपलपसि । जानाति-लोकः सतीशिरोमणीभूतां रमाम् ।

इन्दुमती (सेर्ष्यम्) सतीत्वस्य परिभाषा दुःखाकरोति माम्। समानाधिकरणसिद्धान्तगम्य उपायो वर्तते तदुच्छेत्तुम्। तत्र नाहं संभावयामि दोषम्। तस्मात् रमया न चात्याहितमिति बिन्दे।

सुरेशः (विहस्य) जवनिकया स्वरूपमपवार्य आर्थिकीस्थिति व्यवधातुं कोऽपि नाध्यवस्यति।

मुरारिः मूढ, समाश्रयस्यासुरं भावम्। येऽनीश्वरमसत्यमप्रतिष्ठं जगदाहुः। ते नविदुः प्रवृतिं निवृत्तिञ्च।

इन्दुमति कीदृशी तस्य व्याख्या ?

मुरारिः गीतां विलोकय।

इन्दुमती वद, किमुक्तं तत्र ?

मुरारिः शृणु, युक्तमुक्तं तत्र। नष्टात्मानोऽल्पबुद्धय एतांदृष्टिमवष्टभ्य प्रभवन्ति क्षयाय जगत उग्रकर्माणोऽहिताः। प्रवर्तन्तेऽसद् ग्रांहान् दुष्पूरं काम माश्रित्य।

इन्दुमती ततस्ततः।

मुरारिः कामोपभोगपरमा एतावदितिनिश्चिताः प्रलयान्तामपरिमेयामुपाश्रिताः ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान्।

सुरेशः (विहस्य) सत्यं, नकोपीहतेदानार्थमर्थम्।

मुरारिः सत्यम्। ईश्वरोऽहमहं भोगीकोऽन्योस्ति सदृशोमया

इत्यज्ञान विमोहिताः काम भोगेषु प्रसक्ताः संसारं भस्मसात्कृत्वा निवर्तन्ते कृत्यात् ।

सुरेशः अलमुक्त्वा, श्रुतंश्रोतव्यम् ।

इन्दुमती तवमते किं नप्रचलति साम्यवादः ?

मुरारिः पृच्छ, सुरेशम् ।

सुरेशः रूसे, चीनदेशेऽपि पुरा त्वच्छदृशा प्रतिक्रिया वादिनो बहव आसन् परन्तु साम्यवादस्य विजयोऽवश्यंभावी, ब्रह्माण्डमेव विस्तृणोति साम्यवाद सिद्धान्तः ।

मुरारिः किन्तु गतिविधिमविचार्य समाजस्य विलक्षथो मार्गं युवाम् । पुरातनीं परिपाटीं विनाश्य अराजकतां समाश्रित्य, उत्पादन समये कार्यात् कर्मकरान्न्निवार्य, शान्तिमाहत्य, आतङ्कं प्रसार्य किं देशसेवा विधीयते यद्वा देशोच्छेदः ।

इन्दुमती यथा प्राप्यते सिद्धिः । नावजनासि भद्र ! वृथैवावधीरयसि 'क्षुरस्यधारानिशिता दुरत्यया दुर्गं पथ स्तत्कवयो वदन्ति ।"

सुरेशः चन्द्रचूडस्य समीपेऽधुनारमां संस्थाप्य नात्रविवादं समोचीनं मन्ये । वत्स ! लोकापवादो दुर्निवारः प्रचलति ।

मुरारिः (सोद्वेगम् । *किमपि हृदि मन्त्रयित्वा*) परिभवसि पदे

पदे प्रमाद्यसीव । (*उत्थायगच्छति*)

सुरेशः पश्य प्रिये, यतादृशाः सिद्धान्तानुयायिनो जनाः साम्यवादस्य परमशत्रवो भवन्ति । एष जन्म भूम्यर्थे प्राणानपि जहाति जानाम्यहमस्य राष्ट्र भक्तौ स्वार्थो-नवर्तते । सिद्धान्तादर्शाथमेव निर्व्विद्यते ।

इन्दुमती (स्वगतम्) दोलायते किमर्थं चेतः, सत्यमिवाकर्ण्णयामि मुरारेः सिद्धान्तो निस्वार्थत्वेन प्रतिपादितः, (*प्रकाशम्*) दृढप्रतिज्ञः खल्वेष जनः । एकपदमपि सिद्धान्तान्ना-पसारयति । नप्रभवाव आवां परावर्तयितुम ।

सुरेशः (विहस्य) कालेन संपद्यते ।

इन्दुमती नाहं विश्वसिमि ।

सुरेशः प्रिये, परिस्थितिरेव कर्षति कृत्ये । क्षणार्धेन जननी सुकुमारं कुमारं व्यपादयति, प्रेयसी प्राणेश्वरं पतिं घातयति पति हृदयवल्लभां पत्नीं सञ्ज्ञपयति चेत् कथं कल्पयसि "मुरारिः सिद्धान्तं नजहातीति ।

न्दुमती कासा परिस्थितिः ?

सुरेशः प्रतिक्रियां समुत्पाद्य भीषणेऽन्तद्वन्द्वे नियोजिता तस्यमतिः ।

इन्दुमती प्रसीद महाभागः त्यज तंप्रवि द्वेषम् । नात्रसंदेहः स सच्चरित्रो जन इति ।

सुरेशः (सस्मितम्) किं तेन ? प्रिये, सहृदयासि त्वम्, नाहमपि जलाञ्जलिं ददानि सिद्धान्ताय ।

इन्दुमती तथात्वे लोकस्य भग्नाः पन्थानः ।

सुरेशः सखि, समाश्वसिहि, लोकस्य मुक्तं बन्धनम् ।

इन्दुमती चक्रवाकमयीव पति प्रेम्णि विद्यते रमा, कथं मां पुरस्कृत्य साधयसि । रमायाः स्नेहः कृन्तति मे हृदयम् ।

सुरेशः भावमयि, स्त्रीहृदयं नवनीतादपि सुकोमलमिति विदितमद्य, त्वां पुरस्कृत्य सर्वं साधयामि । विस्मृतः कर्मभेदः । अतो नार्हस्यात्मानं शुचे दातुम् ।

इन्दुमती प्राक् निवारय एनम् ।

सुरेशः अन्ततोगत्वा एवं तत्कर्म करिष्यामि ।

इन्दुमती तदनुगृह्यतां चिरानुरक्तोऽयं जनः ।

सुरेशः अयि, नभेतव्यम् । तवभयेनात्मनोऽपिप्रियं नपारयामि अल मलमावेगेन, साधयावः ।

(नाट्येन परावृत्य गच्छतः)

। जवनिका पतति ।

।। इति पञ्चमोऽङ्कः ।।

षष्ठोऽङ्कः

(आतुरा रमा शय्यायां सुप्ता, समीपेस्थितोमुरारिः परिपृच्छति)

मुरारिः आर्ये. नि न्त्येष परस्तात् ।

रमा (स्वगतम्) मुहुर्मुहुः किमर्थमद्य तर्जयते माम्। (प्रकाशम्) आर्यपुत्र, भर्तृचिन्तानुवर्तिन्य श्चानुजीविनां प्रकृतयोभवन्तीति नविस्मरामि । कथ मन्यथा सम्भावयति भवान् ।

मुरारिः (आलोक्य सवितर्कम्) जानामि सर्वममार्ये, तुदसि हृदयं मे । सत्यंभण ।

रमा प्रायशः कस्याप्यग्रे नाह वितथं जल्पामि नाथ ! सत्यंवदानि, कथमार्यपुत्रस्य संविधात्मान मसत्ये पातयामि ।

मुरारिः (सवैलक्ष्यम्) मधुरया वाचा प्रतारयसि, मामार्ये !

रमा (सानुरागम्) भवन्तमपहाय कोऽधुनाविद्यते जगतिमम । हृदयैकबन्धो ! कथमभिसंदधे भवन्तम्।

मुरारिः (उपेत्य) विद्यन्ते छित्राः ।

रमा (परावृत्य सास्रम्) आस्तां बाल्येपितरौ तावपिदिवं गतौ । नजाने जीवन्ति नवा भ्रातरोऽपि ।

मुरारिः (विहस्य) व्यवदधासि सत्यम्, चन्द्रचूडस्तु जीवत्येव।

रमा (संस्मृत्य)सत्यं स जीवत्येव । एकागारमिव करुणायाः संभावयामि। किञ्च तस्य मित्रोपकरणमात्मा, सहसोपकरणम्।

मुरारिः मनसा स्निह्यति त्वाम्।

रमा पितृस्थानीयो ममैषः। विधेयी कृते सति व्याधिना दिवानिशं समागत्यात्रैव गृह बुद्धिं बध्नाति ।

मुरारिः (स्वगतम्) स्तौति तं सर्वात्मना सर्वदा सत्य, यौवनोन्मादात् परिभूयचन्द्रो गुरो धर्मपत्नीं पत्नीयन् तारा मपजहार । किञ्च प्रमत्तानां प्रमदाकृताः प्रमादाः श्रुतिविषयमागता म म। सुप्रभा पुत्र राज्यार्थं महासेनं काशिराजं जघान, कंदर्पदर्पा रत्नवती नारुथम, देवरानुरक्ता देवकी देवसेनं सौह्म, सपत्नीरुषा बल्लभा रन्तिदेवम्, विन्दुमती विदूरथम्, हंसवती वीरसेनम्, पौरवी सोमकञ्च । (निःश्वस्य) सत्यमिव प्रतिभातिमे सुरेशवाक्यम् ।

रमा आर्यपुत्र, विमानायसे किमर्थम्।

मुरारिः प्रिये, सरणि मपहाय धावसीतिको जानातिस्म। किं करोमि, अयत्नेनैव हतविधिना पृथक्कृतोऽस्मि।

रमा (सास्रम्) असाध्योऽयं मेरोगः।

मुरारिः चन्द्रचूडं परिपृच्छ ।

रमा क चन्द्रः कुतः सः कीदृशोवा चिकित्सकः किन्तु, हृदयमिव धर्मस्य, तमिति प्रत्याययामि ।

मुरारिः सत्यव्रते, त्वमसि रूग्णा, कथंते प्रियमाचरामि । यदि यदि तस्यहस्ते निक्षिप्य कुत्रापि गत्वा श्वसिमिचे पूर्यन्ते ते मनोरथाः । वद किमत्र क्रियते ।

रमा शान्तं पापम् । यदि प्राणेश इति, यदि हृदयैक बन्धुरिति यदि पतिरिति, यदि गुणवानिति, परमात्मेति सर्वथा स्थातव्यं मयातव नियोगे । महाभागस्तु भिनत्ति भाग्यमपि ।

मुरारिः (तुदन्) पितृतुल्यः खलु सते वरीवर्ति ।

रमा (सस्मितम्) यौवने पितरं परित्यज्य स्त्रियः समाश्रयन्ति पतिं, भर्तारक्षतियौवने ।

मुरारिः (स्वगतम्) कथं भवेदेतादृशी स्वैरिणी मे प्रिया । सुरेशः कथमन्यथा संभावयति, अथवा लोक एवं किमर्थं मन्यथा भणति (विचार्य) यद्वा स्त्रीणां हृदयं कोजानीते । (प्रकाशम्) ततस्ततः

रमा आर्यपुत्र, त्वमसिमे जीवनाधारः । नात्यर्थमेवार्हसि मेधाविन्, मृदुनि मनसि तमसः प्रसरं दातुम् ।

मुरारिः तथात्वे वद, किमर्थं त्वं ताम्यसि सदैव । तदातेकुत्र

गतं पाण्डित्यम् ।

रमा प्राणेश, निशित भिवशस्त्रं तक्ष्णोति मांत्वदीय स्तनिमा ।

मुरारिः जानामि तवदौरात्म्यम्. चाटुशतैर्विप्रलभसे । तेनसाकं स्थातुं स्वान्त मभिलषति ते ।

रमा (सवैलक्ष्यम्) हृदयेऽन्यथैवं कृत्वा मन्त्रयसे । स्वयं-विचाय समाश्रयन्ति सत्याऽसत्यं विदुषः । मूढ़ः पर-प्रत्ययनेयबुद्धि र्भवति ।

मुरारिः (भर्त्सयन्) रमे, परिभवसि त्वम् ।

रमा (सविस्मयम्) किमर्थमसूयसि मित्राय तस्मै चन्द्रचूडाय (उद्र्ध्वमवलोक्य) भवतु । गृह्यन्तामभी प्राणाः ।

मुरारिः नाहंपिशाचो नृशंसः ।

रमा (साञ्जलिबन्धम्) आर्यपुत्र प्राणरक्षार्थ मर्थये भवन्तम् । त्यजतु मय्यविश्वासम ।

मुरारिः (सरोषम्) कन्दर्पकण्डूकषण विनोद मात्रोपकारिण्यो नात्यन्तविश्वास योग्याः सर्वथाविश्वस्तं विश्वासमे-वनरं कुर्वन्ति स्त्रियः

रमा निर्घृण, मामैवंमंस्थाः । मातृदेवोभवेत्यौपनिषदं दर्शनं विस्मृत्य जैनमतं समाश्रयसि । सतो नारी ब्रह्माण्डं संधारयति नाधुनाऽपि भारते वर्षे तासा

मत्यन्ताभावः। गार्हस्थ्यमेव वर्णाश्रमाणां मध्ये मुख्यं प्रतिपादयन्ति।

मुरारिः मास्म मुखरा भूः। मुखरतां नशंसन्ति साधवः।

रमा (निःश्वस्य) भवतु। तूष्णीमास्ये। प्रसीदत्वार्यपुत्रः।

मुरारिः (भर्त्सयन्) शुनीमिवास्थिरतां परिहर।

रमा (सक्रोधम्) मास्म वाचालो भूः। नाहंशुनीं। कुल-कलत्र मस्मि चारित्रधना। किंकरोमि रूग्णाऽस्मि, नक्तंदिवंशिश्रयिषति चन्द्रः। नाभूत् भवान् पुरा कदाप्येतादृशः।

मुरारिः त्वमपि नाभूः पुरा कदाप्ये तादृशी प्रगल्भा, धृष्टा च। सत्यं, स्वभाव एव तस्योपरि तव प्रणयः (सखेदम्) वर्जयवैपरीत्यम्। विपरीतंशवमिवको नपरिहरति।

रमा (सवाष्पगद्गदम्) वाढम्। प्रागेक स्थानमिव स्थिती-नामासम्। रसायनमिव लावण्यस्य शरीरमप्यासीत्। रोगेणास्थिचर्ममयी पुत्रिकेवाभवमधुना। किञ्च प्राक् क्षणमपि तूष्णीं स्थातुं नाशक्नुवम् अधुना मुखेस्थिता मक्षिका निवारयितुमपि बाह्वोः शक्ति र्नविद्यते। भारभूताऽस्मि भवतः कावा व्यापृतता, येनाद्यापि निष्ठुराः प्राणा नप्रतिष्ठन्ते। (रोदिति)

मुरारिः (स्वगतम्) विकलीकृतोऽस्मि शंसयेन, अहो ! विमुह्यति

मे मतिः । चित्तंदोलायते किमेषा विवर्त्तयतिमे भ्रान्तिम । आहोस्विदनयावष्टब्ध कुरङ्ग इवान्धीभूतः कोवागुरा वञ्चनं करोति । (प्रकाशम्) उपपद्यते । (सास्र नयनो भवति)

रमा (साञ्जलि भूत्वा) आर्यपुत्र, न संभवामि स्वापराधम् । सत्यम्, शक्त्यभावाद् पूर्ववन्न परिचरामि ।

मुरारिः (सवैलक्ष्यम्) उपपद्यते ।

रमा विमनायत इवार्यपुत्रः ।

मुरारिः (सवाष्पम्) विमनायसे त्वमेव, कुत्रगतास्ते प्रियालापाः, अधुना पदेपदे ग्लाययसि माम् । (उच्चैराक्रोशति) चण्डि, उन्मनयसि, कदर्थयसि, क्लेशयसि, खेदयसि, तापयसि, दुःखयसि, पीडयसि, विव्हलयसि, व्यथयसि, किमर्थं निर्धनंमाम् । (निःश्वसति)

रमा (स्वगतम्) हृदयाधिना संतप्तः प्रमत्ततां समाश्रयति मे प्राणेशः । कथमस्य शंकां निर्मूलां करोमि । चन्द्रचूडे बद्धमत्सरोऽस्ति, अज्ञानेनावृतःसन् मोहमापद्यते भृशम् । (सवाष्पं, सप्रकाशम्) आर्यपुत्र, धीरस्यापि धाष्ट्र्यमपाकरोति हृदयलघिमलङ्घित मति वल्लभत्वम् । अहो ! प्रतिनिवृत्य स्वकृत्यात् स्वमेव पचति तण्डुलान्, श्व आरभ्य कुम्भे नभविता कणि

कैका । गृहकर्म्मकर्तुमपि शक्तिर्नास्ति विधेयी कृतास्मिव्याधिनाऽधिनाच । कन्यायाः चैलंप्रक्षालयितुं यदोत्थितेवास्मि तदा व्यमुह्यम् ।

मुरारिः समाश्वसिहि भद्रे, उष्णोदकं पातुं समये नपारयतिसखी, जानामि सर्वम्, नवर्तते शरीरेशक्ति र्नापिधनं गेहे। किंकरोमि, क्वागन्तव्यम् । (*त्रिकुटिं शिखां विधाय*) धनिनः कुक्कुरेभ्यः पर्याप्तं मांसौदनं भोजयन्ति, क्षुत्क्षामकण्ठा मानवा नयन्त्यनयादिशा कालम्। श्ववृत्याधनमर्जितुं प्रेरयति परिस्थितिः। सत्यसंकल्पोऽस्मि, प्रिये, नाहं दृप्यद्दुरीश्वरद्धाः स्थ चण्डचन्द्रार्धं सहे।

रमा सर्वथार्यपुत्रस्य दुःखस्य मूलकारण महमेवतथाऽवै।

मुरारिः प्रिये, वक्रोक्त्या वृथैव मृतंमां मारयसि। मर्मवाक्य प्रहरणाय निपुणा संजातासि। (*आकाशे*) इदमपि शिक्षयति चन्द्रचूडः।

रमा (*सखेदम्*) महामनस्विन्, त्वदाज्ञां शिरसावधार्य पर्यचरं रुग्णावस्थायां तम् नमया परिचितोऽयं पुरा। स प्रत्युपकर्तुं मां परिचरति तस्योपरि किमर्थ मतिरोषणः संजातोभवान्।

मुरारिः पश्चात्तापः शोधयति सदैव तस्मात्। तेनहतकेन

तव हृदय मपहृत्य वञ्चितो ऽस्मि।

रमा (सस्मितम्) कीदृशी भ्रान्तिस्ते, सतीहृदयमप्यपहि-यतेनाम। किमर्थं माशङ्कसे तथात्वे निवारय तम्।

मुरारिः सप्तवार मवोचम्।

रमा किमुत्तारयति तदा?

मुरारिः पादौ पतित्वा रोदिति, रमां स्वस्थां विधाय त्वदाज्ञां मानयामि मामनुगृह्णीष्वेति वदति। कथमिव निन्हुते रहस्यम।

रमा वदतितथाकिं? (मुखंपिधायाश्रूणि विसृज्य)। अह-मेवनिबारयामि तम्।

मुरारिः रमे, नाहं साधु मन्ये।

रमा (आत्मगतम्) कथं प्रसरति वाणी, किमर्थं सहस्रधा नजायते जिव्हा। (प्रकाशम्) समागत्य कन्यायाः कन्थामपि प्रक्षालयति स, तादृशमति सौजन्यनिघ्नं जनं कथमहं वदानि मागाः। तथापि प्रयतिष्ये।

मुरारिः आर्ये, स्वप्न दृष्ट नष्टेष्विव्त्र क्षणिकेषु शरीरेषु बन्धबुद्धिं प्रबुद्धा र्नानिबन्धन्ति।

रमा महाभाग, सत्यं मृत्युशय्यायां शये। प्रिततमेन हृदय-कुहरा दपनीतो ममसोहान्धकारः। नाहंबिभेमि नवा रोदिमि। किन्तु शोको वाड़वइववारिराशिं

पविरिवपर्वतं, क्षयइवक्षपाकरं राहुरिव रविं दहति, दारयति, तनू करोति कवलयतिमाम् । प्राणरक्षा न्नपरं पुण्यजातं जगति गीयते जनेनेति सदैवकथाप्रसंगे प्रक्रमते चन्द्रचूडः । कं समुपालभे !

मुरारिः क्षण मपि स्थातुं नाहं प्रभवामि । भवेन्मरणावधिश्चेयं-भेयात्रा स्वीकृतापि विवाहेन कंसा नलङ्घत चापलेनो-द्वेजयति स्त्री।

रमा धिक् धिक् आर्यपुत्रोऽपि वज्रसारः संवृत्तः । अनाथाऽस्मि । कंसमुपालभे ? एतामवस्थां समासा-दितां मांविहाय गमयितुं पतिं यः प्रेरयति । चन्द्रचूडं निवारयितुं धियो यः प्रचोदयति ।

मुरारिः किमनेन पुनः पुनर्दैवोपालम्भनेन । प्रकटीकृतंपाण्डि-त्यंत्वया ।

रमा किमर्थमर्ध मृतामाक्लिश्नासि, प्राणनाथ ! किंसमुचितं स्नेहस्येदम् ? गृह्यन्तामभी प्राणाः ।

मुरारिः प्रिये, जानामि, प्राणरक्षणान्नपरं पुण्यजातं जगतिगी-यते जनेनेति । किन्तु यदि दीपपात्रे तैलमेव नास्ति तदाकथं प्रज्वलति प्रदीपः । तव-जीवनदीपे तैलं प्रपूरयितुं यदाऽहमसमर्थोऽस्मि तदा स्नेहित्वाकिं-करोमि । तस्याधिकार एवनहि प्रेतुं यः खलु प्राणान्

रक्षितुमप्यसमर्थो भवति । प्रिये, अन्तर्द्वन्द्वे नकिंकदा वदानि ममवचने सत्यं मागाः । त्वयि प्रेम कर्तुं तस्यैव चन्द्रचूडस्यैवाधिकार इति संभावयामि । अहोरात्रं त्वां स शुश्रूषते ।

रमा (रूदित्वा) स्वकृत दैवदुर्वि पाकस्यैष परिणामः

मुरारिः (सवंलदयम्) तव तुरोदनाय नेत्रे सञ्चिता बिद्यन्तेऽश्रुविन्दवः । अहंतु रोदितुमपिं नशक्नोमि । व्याधिनाऽऽधिनाशुष्काणिमे नयनयो रश्रूणि ।

रमा प्रियतम, श्रूयते सत्यमेव जयते इति ।

मुरारिः (साट्टहासम) किंसत्यम् ? मनुष्याग्रे सत्यस्य व्याख्या कथंक्रियते । प्रिये, अस्यामावस्थयां महंविचारयामि "क्षणमप्यवतिष्ठते श्वसन्यदिजन्तु र्नंनुलाभवानसौ"

रमा औषधंविधायेवचन्द्रचूडः किंकरिष्यति, यदिदीपपात्रे तैलमेबनविद्यते तदाकथंकदापर्यन्तंवाः प्रदीपः प्रज्वलति । अस्माकं, विशेषतः सदैवमृत्युः पार्श्ववर्ती ।

मुरारिः तमेवंपृच्छ । तवभारंवोढुमसमर्थोऽयं जनः तब समीपे स्थित्वा केवलं जनमर्यादा मवहेलयति, तस्मादेवत्वां मुञ्चतोनास्तिमेव्यथा । (पत्रंनिष्कास्य) देहिपत्रमिदं चन्द्रचूडाय,

रमा जन्मान्तरे नभवेत् विप्रयोगः । वसुधे ! देहिमेविवरम्

(सहसोत्थायमुरारिर्निर्गच्छति)

ईदृशीमनाथांरूग्णांमांत्यक्त्वा गतोगतएवार्यपुत्रः।
(कारूणकाहलेन स्व रेण कतिचित्कालंरूदित्वा मूर्च्छति
कन्यकाचैकत्र रोदितुं प्रवृत्ता)

(हस्तेविद्युत्किरणचित्रं गृहीत्वाचन्द्रचूडः प्रविशति)

चन्द्रचूडः (ससंभ्रमम्) आः किमेतत्। (सभीक मुपगम्य) रमे, जाते, वत्से, (निरूप्य) मूर्च्छा ! हाधिक् !! कुत्ररोदिती बालिका (परितोविलोक्य) (कन्याकाँदृष्ट्वोपगम्य-धारयति) तादृशो विदुष एतादृश्यर्थिकी दशादृश्यते। धिक्कष्टम् । (जलपात्रमानीय रमायाः शिरसिजलं प्रक्षिपति) (शून्यमवलोक्य) अर्थोष्मणा म्लायतिकु त्रमानवता, धनाभावात् क्षुध्यतिकुत्र जनता अत्र शान्ति मूर्च्छति। (निर्दिश्य) एतादृशीं दशां दर्शं दर्शं कथं गीष्पतिरपि ब्रूतेऽन्यथो।

रमा (चिरात् संज्ञां लब्ध्वा) किंकृतानया ? (सवाष्पं नयेने निमीलयति)

चन्द्रचूडः जाते, किंसंजातम्। किमर्थंमोहमुपगता। समाश्वसिहि

रमा अलमलमावेगेन। (निमीलिताक्षावाष्पगद्गदाक्षरं तूष्णीं-मास्ते।

चन्द्रचूडः (समाश्वास्य सकरुणम्) भगिनि, माकार्षीः चिन्ताम्।

चिन्ता सजीवं दहति। अद्यावधिर्जीवत्यसौ तव भ्राता।

(रमासवाष्प कण्ठी रोदितुं प्रवृत्ता)

वत्से, धैर्यमवलम्बस्व, धैर्यंहि महतां लक्षणम्।

रमा मां भगिनीं मत्वा स्निह्यति चेदार्यः ....(*अर्धोक्ते वाष्पनिरुद्धकण्ठी विसृज्याश्रूणि मुखमावृणोति*)

चन्द्रचूडः स्निग्धजन संविभक्तं हि दुःखं सह्यवेदनं भवति, मौनमवलम्ब्य किमर्थमात्मानं व्यथयसि।

रमा इत्थं कोऽन्यो ब्रूते विहाय ...... (*रोदिति*)

चन्द्रचूडः सुकन्या कुलद्वयमेवोद्धरति। मागाः विषादम्। संग्रहरन्ते ऽकालमृत्युं वैद्याः देवि, कोहेतु वैराग्यस्य। नविदितं किन्तु भगिन्याऽकाल मृत्युं हरत्यौषधमिति।

रमा (*स्वगतम्*) अहो! एतादृशं सज्जन मन्यथैव संभावयत्योर्यपुत्रः। स्वतु पश्चाद मिधोस्ये तस्य संदेशम् (*प्रकाशम्*) आर्य, नकवलयति मृत्युर्मन्दभाग्यां केवलं ग्लपयति कति दिनानि। चित्रेण निधारितः को रोगः ?। भवतु। निरभिलाषास्मि जीवितव्ये। वृथैव मां परि वञ्चति श्रीमान्, नाहं जीवितुमुत्सहे। (*सास्रम*) त्यजतु दुराग्रह मार्यवयः। “ प्रतिकार

विधानमायुषः सतिशेषेऽहिफलायकल्पते ” इति विस्मृतं भवता।

चन्द्रचूडः (*सानुरागम्*) ज्ञातं विरक्तेः कारणम्। रूप्यकचिन्तां त्यजजाते! स्वात्मानं विक्रीयापि संपादयामि तवौषध्यर्थं मूल्यम्! (*आत्मगतम्*) कीदृशी दशा, स्वगृह चरितं स्मारं निर्विद्यते मुरारिः। एक पणकमपि नास्तिगेहे रोगोऽयमसाध्य इहि मां माचष्ट सः। किं करोतु वराकः।

रमा पुरा नापायि भवताऽपि पाश्चात्य चिकित्सकानामौषधम्। मण्डं पातु मसमर्था वयं शक्नुमः कथं पदे पदे रूप्यकाणि व्ययीकृत्य बहुमूल्य साध्यमौषधं कर्तुम्।

चन्द्रचूडः ममावस्थान्या त्वदवस्थाचान्या। अस्य रोगस्य विज्ञानेनाऽऽविष्कृतं नवीनौषधम्। अलमुक्त्वा यथा यथा वदामि तथा तथात्वं वर्त्तथाः।

रमा (*सास्रम्*) जानामि भवतो वात्सल्यम्। स्नेहान्निर्बध्नाति। यदि दीपपात्रे तैलं नवर्तते कदापर्यन्तं प्रदीपः प्रज्वलति? नहि दीपः ज्वलति ज्वलति तैलम्। यदि प्रदीपान्तः सर्पिणी ज्वाला स्नेहं न प्राप्नोति तदा सूत्रमेव भस्मसात् करोतीति नजानाति किम्? भवान्। मरणं यदि निश्चितं मे तदा

सर्वस्वं, समाप्य किमर्थं मां प्रस्थापयसि। (*सकम्पम*) मर्तुं वाञ्छति चेतः। करोषि दुराग्रहं त्वम्। (*सासूयम्*) श्रुतं सर्वं, विक्रीय भाण्डादीन् तस्मादेवरूप्यकं संपाद्य भेषजं क्रीत्वा किमर्थं पाययसि त्वम्। कथमानृण्यं भवेयम्? (*संस्मृत्य*) मया तवापि सर्वनाशोविहित, कीदृशी मन्दभागास्मि। (*उत्थाय चित्रमा कृष्य खण्डं खण्डंकृत्वा रोदिति*) भ्रातः प्रोणाधार, निष्कार णैकबन्धो! त्यज जाड्यम्।

चन्द्रचूडः (*भर्त्सयन्*) नार्हस्यात्मानं शुचेदातुम्। बालिकाया विलोक्य मुखमपि तथा न वक्तव्यंत्वया। मुग्धे, किमर्थं खिद्यसे? सत्वरं स्वस्था भवसि। औषधं सत्वरं कार्यं करोति। सर्वं संपादयाम्यहं किमर्थं बिभेषि बाले! तव जीवनदीपे तैलं प्रपूरयितुं सदैवो द्यतो विधिः। निर्वाणे सत्यपिदीपे ऽरूणोदयः संजायते जाते। भगिन्यर्थं भैषज्यानयनमपि कथं भाराय कल्पते। वत्से, नजानासि वात्सल्यम् लोके लोहेभ्यः कठिनतमा स्नेहमया बन्धनपाशा इति। सत्यं मरणं प्रकृतिः, किन्तु तस्यापि समयः निर्धारितो वर्तते। स्विजरल्याण्ड प्रदेशे सामस्त्येन मनुष्याणामायुषो मानं विद्यते सप्तषष्टिवर्षपर्यन्तम नत्याना-

मेकविंशतिवर्षमेव मानमस्ति। कारणं बिना किं कार्यं संपद्यते ? को हेतुरत्र ? सम्यग् विचार्य निराकरणीयो दोषः।

रमा पूर्वजन्म कृतक्रियाविपाको भोग इति नाहमपि वदानि। किन्तु वैचित्र्य मेव समर्थयति सर्वम्।

चन्द्रचूडः जाते, सत्यम्। रोगाविद्यादारिद्र्यादयो नप्रारब्धकर्मणो विपाकाः सामाजिकावस्थायाः फलान्ये तानि वस्तूनि। शृणु, यदि पाश्चात्य देशे शते पंचनवतिः सप्तनवति संख्या प्रजा साक्षराः शिक्षिता विद्यन्ते पुनरत्र सहस्रेष्वपि गणयितुं नप्राप्यते, तस्मात् वदामि परिस्थितेः परिणाम एष न प्रारब्धकर्मणः।

रमा अमेरिकायां श्रमिका कर्मकरा अपि प्रतिदिनं नवरूप्यक मर्जयन्ति इतिश्रूयते किंसत्यं भवेत्।

चन्द्रचूडः अथ किम् ?

रमा तथात्वे, मानवाएव समाजं विघटयन्ति संघटयन्तिच। मर्त्यलोकस्य व्यवस्था मानवहस्ते समर्पयति विधिः। अस्यां व्यवस्थायां मनुष्याणां कर्तव्यं मनुष्यैरेवनिर्धारणीयं विद्यते। किन्तु समाजं परित्यज्य सर्वे स्वस्वार्थे बद्धपरिकरा विद्यन्ते ऽत्रजनाः। (संस्मृत्य) अद्य भवानपि सुरेशस्य सिद्धान्तं परिष्करोति।

चन्द्रचूडः रमे, नाहं सुरेशमनुगच्छामि। आवयोर्भिन्नः सिद्धान्तः।

रमा किन्तु परिस्थिति स्त्वा माकर्षति।

चन्द्रचूडः सत्यम्। आकर्षतीव त्वदर्थे, स्नेहमयि!

रमा (साञ्जलि) स्वसिद्धान्ते भवतु वज्रसारो भवान्। याचे मृत्युम्। समोपितं मयाकृत्यम्। मयिमृतेसतिबालिका चैषा ...... (अर्धोक्ते चैलाञ्चलेनमुखमावृत्यरोदिति)

चन्द्रचूडः (सस्नेहंहस्तेनशिरःसंस्पृश्य) जीव जाते, जीवन्नरो भद्र-शतानि पश्यति। अनभिज्ञासि वत्से, मृतेऽपि मयि, जीवितव्यं त्वया।

रमा कथमिव किमर्थं वा?

चन्द्रचूडः सहसा, समन्तात् परिवर्तमानं परिणामं विलोकयितुं संसारस्य।

रमा (पत्युः सर्वं संदेशंसंस्मृत्य मुहुर्निश्वसिति) धिक्कष्टम्!

चन्द्रचूडः (स्वगतम्) प्रतिक्रियया ताम्यत्येषा (प्रकाशम्) किं निमित्तं ते तापः।

रमा गमनोद्यतान् जनान् प्राक् गमय। दरिद्राणां दुःखं यदा समाप्तं भवति पुनः जजन्मि।

चन्द्रचूडः वत्से, अनर्थस्य दिनानि समाप्तानि, उन्मिषति पवित्रः प्रकाशः। बहुजनहिताय, बहुजन सुखाय प्रयस्यति एशिया। (आवेशेन रक्तं मुखं जायते)

रमा बहु जनान् कदर्थयितु मेकोजनोऽसमर्थतमो भवति किं गणतन्त्रे ?

चन्द्रचूडः आम्। सिद्धान्तस्तु तादृशो वर्तते ।

रमा केवल कल्पनयाऽनेन क्रमेण नक्तं दिव मतिवाहयसि।

चन्द्रचूडः (*सस्मितम्*) कल्पनाऽपि साकारा संजायते। पुरा विसूचिकादयो महामार्यः प्रसृता आसन्। उपचारादधुना ऽपक्षीयन्ते।

रमा किंतेन। प्रसरत्येव राजयक्ष्मा सर्वत्र।

चन्द्रचूडः (*निरूप्य*) व्यभिचोरा दशिक्षया पौष्टिकखाद्यान्नाभावात् प्रति दिनं चात्र तादृशो रोगोवर्धते। महार्घतया पदार्थस्य क्रेतुमेव नशक्नुवन्ति स्वास्थ्यकारकाणि वस्तूनि मध्याः कथं निर्विशन्तु। किञ्च, पञ्चविंशति वेतन रूप्यकेण पारिवारिको जीवनयात्रा संचाल्यते कथम्। शतरूप्यकवेतनभुजः कर्मकराः क्षुत्क्षामकण्ठा रात्रौ जलमाकण्ठं पीत्वा स्वपन्तीति श्रूयते।

रमा पञ्चरूप्यकवेतनमपि नप्राप्यते सर्वैः। यद्वा, पूर्वजन्मनि तैर्नकृतं भवेत सुकृतम्।

चन्द्रचूडः मा मा वद एवम्। नहि चास्मिन्नेवदेशे पूर्व जन्मनि कृता पराधाः समुत्पद्यन्ते।

रमा (*निः श्वस्य*) दुः खे मित्राणि नभवन्तितिसत्यमाहेन्दुमती

चन्द्रचूड: (सखेदम्) दुः खे मित्राणि नभवन्तीति सत्यमिवप्रति भाति, इतोऽधमणर्थि देवदत्तस्यगृहमगमम्। लाभार्थं विभर्ति रूप्यकं नीव्या अभावात् नार्प्पयतिसः।

रमा (सशङ्कम्) किमर्थं गृह्यते ऋणम् ?

चन्द्रचूड: औषधंक्रेतुम्। बहुधनसाध्योऽयंरोगः।

रमा (जिव्हां दष्ट्वा) निवर्तय साहसात्। कुत्रप्राप्नोषि धनं पश्चात्दातुं, क्षेत्रगृहविहीना वयमितिनजानासि वा ? आः समाजस्य भारभूताया मम जीवनरक्षणान्नकोऽपि लाभः। ऋणं गृहीत्वाकिमर्थमुपचरसि माम्। वृथैवौषधं पीतं मया।

चन्द्रचूड: (अपवार्य) मृत्यवे त्वां नददामि। शृणु, ततोगोपालगृहमगच्छम्। सोऽप्यासीत् दुःखसागरे निमग्नः।

रमा (सविस्मयम्) किं धनिनोऽपि दुः खैः परिभूयन्ते ?

चन्द्रचूड: शम्पा भ्रूणहत्याञ्चकारेति तत्रैवनिवासिन्यादास्या स्वमेवाधिकरणं गत्वाऽवादि इति ते विप्रवदन्ते परिदेवन्तेच।

रमा कथं सा पतिता कर्तव्यात् ? शम्पागिरिशयोः प्रणयस्य परिणामोऽनेन रूपेण प्रकटीभूतः।

चन्द्रचूड: दासी तथैव घोषयति, विवदन्ते परस्परम्।

रमा भ्रष्टा वरकी, प्राड्विवाकः किं निरूपयति ?

चन्द्रचूडः स्वाधिकारात् प्रमत्त उत्को चार्थी न्याय मपवदते ।

रमा धिक्कष्टम् । कुत्र धनाभावात् प्रमीयन्ते कुत्र तु धनेनैव पर्य्यवस्यन्ति । धनमेवतापहेतु र्निर्वापयिता पुनस्तदेव ।

चन्द्रचूडः अर्थस्य दुरूपयोगात् भवतीत्थम् । धनिनां हर्म्याणि भ्रान्त्वा मयाकुत्रापि नासादितं सुखम् । पितृपुत्रयो र्विवादः, श्वश्रूवध्वो र्विरोधः पति पत्न्योः कलहश्च तत्र वर्वर्ति ।

रमा पत्युः प्रणयात् परिभ्रंशनं स्त्रीणां कृते महद्दौर्भाग्यम् । (रोदिति)

चन्द्रचूडः वत्से,'''आर्थिकीं व्यव्यस्थामन्यामेव कर्तुं प्रयतते समाजः । सा पुरातनीव्यवस्थापरिपाटी जीर्णा शीर्णा संजाता ।

रमा मनुष्यस्य विश्वासं नाहमधिगच्छामि, क्रूरात् क्रूरतरः नरपशुः ।

चन्द्रचूडः जाते, अद्य तववाणी हृदयान्निसरतीव । सत्यं भवति हृदयान्निसृतं वाक्यम् । शृणु, गिरिश मपि ताडयित्वा रुधिरमयं विधाय रात्रावपरिचितोजन पलायतेस्म इतिश्रूयते ।

रमा सोदरां भगिनीं जात्यापरिभ्रंशितुं यथाऽकल्पयत् तस्यैव पापस्यफलं भुङ्क्ते पोपः ।

चन्द्रचूडः बाढम्। गिरिशः सुरेशस्य, वागुरायां पतितः। द्वावेव धूर्तौ स्तः। शम्पोया गोपालस्यच तादृशोविवादभारो विद्यते तमपनेतुं तावसमर्थतरौ वर्तेते। क्षिप्त्वा तयोः शिरसि कलङ्कं सुरेशः कूटस्थोऽस्ति। अनयोः ललाटतटे निकटे विकटं दुःखं नटति।

रमा (अन्यमनस्की भूत्वा) अनर्थ परम्परा चैतादृशी वर्तते। भवतु। तापयति हृदय मलमनेन।

चन्द्रचूडः (स्वगतम्) अन्तः प्रविष्ट तारका मेनां दृष्ट्वा कथंमर्षयामि दुष्कृत्यं समाजस्य। (प्रकाशम्) किमपिवक्तुकामा संलक्षसे। वद, सर्वं। स्निग्धजनसंविभक्तं दुःखं सह्य वेदनं भवतीति नजानासि वत्से?

रमा आर्य, अशुभशुभावेशविवशाविशरारवः शरीरनिर्माणपरमाणवः।

चन्द्रचूडः आम्।

रमा (संस्मृत्य) भ्रात भवता + + + + + (अर्धोक्तेवाष्प निरूद्धकण्ठी मौनमालम्बते)

चन्द्रचूडः विदुषि, किं वक्तुकामासि, कथय किं निमित्तं तेतापः। किमर्थमाधिहेतुं नवक्ष्यसि।

रमा नास्तिमत्समा दुःखभागिनी सीमन्तिनी। नास्मात्परं (रोदिति) सिञ्चनेतिलोदकम्।

चन्द्रचूडः (समाश्वास्य) वत्से, शोकोहि नाम पर्यायः पिशाचस्य रूपातरमाक्षेपस्य, तारूण्यं तमसो विशेषणमिति ज्ञात्वापि रुद्यते ।

रमा तात, अतिनम्रतैव तेकथयन्ति गुणानां गौरवं, सकल संपत् पात्रमसि ।

चन्द्रचूडः (स्मितं कृत्वा) भैक्षरक्षिताः सन्ति प्राणाः ।

रमा किंतेन । भवादृशा एव भाजनं भूतेः समाजस्य ।

चन्द्रचूडः जाते, क्व विभवः, कच वयं वनवर्धिताः, किञ्च तव पक्ष्म विलग्न मश्रुकणं प्रमृज्य कदाऽऽनृण्यं भवेयम । एतादृशी चिन्ता मामतीव विह्वलयति ।

(रमाऽतिचिरं रोदिति)

रमा (अश्रूणिप्रमृज्य) मरणा सन्नांमां विहाय गत आर्य पुत्रः

चन्द्रचूड दृष्ट्वा समाजं, दृष्ट्वाचेदृशी त्वां समस्फुटदिव तस्य सहस्रधा हृदयम् ।

रमा हादेव, हन्त ! व्यवसितायामे संदीपन मिव संवृत्तम् । अहो ! !परावृत्त भागधेयानां दुः खं दुःखानुबन्धि ।

चन्द्रचूडः पुनरपि मौनमेवास्ते । किमपि वक्तु कामात्रभवती ।

रमा कथं नामाकृतेस्तादृश्या युक्तः परिणामोऽपीदृशः ।

चन्द्रचूडः देवि, समाश्वसिहि । नीवी वादस्य संमूताचरमावस्था । मुरारिः स्वदुः खं प्रसह्यापि वैचित्र्यं प्रारब्ध कर्मणो

भोगादेवेत्युदाहार्षीत् । तादृशं जनमपि लोकः-पर्य्यभूत् । (निश्वसिति)

रमा कथं चास्याः मे हतहृदयाया आर्यपुत्रविरहे सकृदपि युक्त मुच्छ्वसितुम् । इयं सा प्रीति भक्ति रनुवृतिर्वा । (संस्मृत्य) चन्द्रमया इव जगदाल्हादिनो गुणा अपि मामार्य पुत्रस्य विरहे दहन्ति । वालिशो ऽपि कः संभावयेदार्यपुत्रविरहे मज्जीवितम् (गद्गदाक्षरातूष्णी मास्ते)

चन्द्रचूडः सती ललामभूताऽसि रमे, पूता त्वया वसुन्धरा । आदर्शोऽन्यो वस्तुस्थिति रन्या इति नप्रत्यपद्यत मुरारिः ।

रमा यद् भवतु । व्यवदधाति स्वपटान्तेन मां मृत्युः (वक्षसिहस्तं निधाय महतायासेनक्षौति) आर्य, कास समये हृदय स्फुटतीव (श्लेष्माणं पात्रे निष्ठीवति)

चन्द्रचूडः (कफे रुधिरं विलोक्य) (स्वगतम्) रक्तंप्रतिदिनं वर्धते ।

रमा (निःश्वस्य) प्रतिदिनं ग्लायति शरीरं, ताम्यति हृदये, शिथिली भवन्ति चेन्द्रियाणि । किमर्थं नाद्यापि निष्ठुराः प्राणाः प्रतिष्ठन्ते । (मुखमाच्छाद्यनिः शव्द मतिचिरं रोदिति)

चन्द्रचूडः (स्वगतम्) अहो ! अस्या दृष्ट्वे दृशीं दशां चलितोऽस्मि धैर्यात् शून्य इवास्मि हृदयेन, पूरितोऽस्मि दुःखेन,

धिक्। देवि, दूरी कृतासि भर्त्रा सुखेन च, विरेचिता सि भ्रमणेनायुषाच। (दीर्घंनिःश्वसिति माया प्रविशति)

माया (प्रविश्य, चन्द्रचूडंप्रणम्य, रमाया शयनीयप्रदेशे उपविसति) सखि, कीदृशी ते ऽवस्था !

चद्रन्चूडः (मन्दंवदति) शौणितमद्यविद्यते कफेबहु। रमे, समाग ता त्वां द्रष्टुं माया, जानास्येव माया त्वां भगिनीमि वस्निह्यतीति।

रमा (प्रावरणात् मुखं निस्कास्य) आर्य, जानामि। नखलु बहिरु पाधीन् प्रीतयः संश्रयन्ते इति सत्यमाह कवि

माया भेषजमानीतं नवा ?

चन्द्रचूडः जीवन मरणकारकेऽस्मिन्वस्तुन्यपि गृध्यन्ति व्यवसा- यिनो धनोपार्जनाय।

माया कतिरूप्यकाणि गृहीतानि तैरवसरानुयायिभिः पापैः।

चन्द्रचूडः (सस्मितम्) सर्वं सम्पद्यते, किमर्थं पृच्छसि।

माया (जनोन्तिके) मृण्मयीवनिश्चेतनतया, मरुन्मयीमिव निःश्वाससंपदा पावकमयीमिव संतापसंतापेन, सली- लमयीमिवा स्त्रप्रस्त्रवणेन, वियन्मयीमिवनिरवलम्बन तया शयनीये निलीनां रमां प्रत्येमि।

चन्द्रचूडः विदुषि, तथैवाहमद्यावधारयामि।

माया अहोरात्रं सेवायै प्रयत्नसे, धारयसि प्राणान्।

मद्गेहे सुसम्पन्नमद्य भोजनम् । सिद्धान्तवन्ति सिद्धान्ता अपिते येषामसिपरिणामः ।

चन्द्रचूडः अलंप्रशसया, नमह्यं रोचते श्लाघा ।

माया भवतु (निरूप्य) अद्य तवमणिबन्धे नविलोक्यते-घटीयन्त्रम् ।

रमा तदेवविक्रीय किस्विदानीतं भवेदौषधम् ।

चन्द्रचूडः (सस्मितम्) नाहं चिकित्सकोयद्नाडीघटीयन्त्राभावात् शल्यकर्म रुद्धं स्यात् ।

माया रमे, भाग्यवती त्वमसि । परोपकार धृतव्रतोमहापुरुष एष उपास्ते त्वाम् ।

रमा पितुः प्रसादरूपंवस्तु विक्रीयापि मा मुपास्ते । (संस्मृत्य पत्युः संदेशम् रुदित्वा) त्यजमयिस्नेहमेतादृशम् ।

चन्द्रचूडः जाते, नयुक्तं नामते तथापुरारुग्णावस्थायां स्थितमिमंजनं संसेव्य सांप्रतमीदृशैर्वचनैः प्रत्याख्यातुम् । शृणु, वत्से नकोऽपिप्रभुः मांस्वकर्तव्यात् रोद्धुम् ।

रमा (संस्मृत्य) हाधिक् ! सास्मृतिः पुनरद्याऽभिनवा संजाता, संस्मृत्य हृदयं सहस्रधोभवति ।

चन्द्रचूडः (सनिर्वेदम्) भगिनि, नचिक्रतव्रणमिव खिद्यसे किमिति

रमा अहो ! हृदयैक .... (वक्तुमशक्ता तिष्ठति)

चन्द्रचूडः माये, भगिनी रमा बहुवारंकिमपि वक्त कामा, किञ्च

कथयितुमसमर्था प्रतिभाति। विस्माययति सा माम्।

माया (समाश्वास्य) स्वैरं स्वैरं भणतु भवती माम्।

चन्द्रचूड; उदारः कल्पः। अहं गच्छामिवहिः।

रमा अवश्य मेवकथयिष्ये भवन्तम् परन्तु मरणसमय एव

माया (कर्णौपिधाय) शान्तं पापम्। आतुराणां मरणचिन्ता पदे पदे विचिकित्सतीति पितामामवोचत्।

चन्द्रचूडः तवपिता कति वादन समयेऽद्य समागच्छति।

मोया (परावृत्य) हुं! नजाने।

चन्द्रचूडः (सस्मितम्) पित्रासाधं विवादसमजनिकिं? वदकस्यहेतोः

माया रात्रा वेकवादन समये समागत्य द्वारि करुण काहलेन स्वरेण कश्चित् रुरोद। किन्तु स गन्तु नैच्छत् चिकित्सकानामालस्यादातुराणां जीवनहापनं नसमिचीनमित्यगादिषम्।

रमा रोगः कः?

माया आसीत् प्रसूति व्यथा। अधुनापित्वमेवगच्छेतिमां प्राहिणोत्।

चन्द्रचूडः परिचितोरोगो विद्यते।

रमो व्यर्थं किमर्थं क्लेशयतः नाहं जीवितु मिच्छामि।

मायो शिरायां भेषजं देयमित्यब्रवीत्। गृहीत्वायन्त्रं

समागाम् । (*जनान्तिकम्*) असाध्योऽयं रोग इत्यभ्यधात् ।

रमा किमपि हृदयेकृत्वा मन्त्रयेथे ।

चन्द्रचूडः सत्वरं निरामया प्रिय सखी भविष्यतीति वदत्येषा ।

रमा ज्ञाने वां नैपुण्यम ।

माया यदा मुरारिः समागमिष्यति तदैवौषधं दास्ये ।

रमा (*शीघ्रं शीघ्रं निःश्वस्य*) भ्रातः, ऊर्ध्वं समागच्छन्ति प्राणाः जाने मरणवेला संजातेति ।(*रूदित्वा*)शप्ताऽस्मि मन्द भाग्याऽऽर्य पुत्रेण, भवतु भजेय मानृण्यम् ।

चन्द्रचूडः (*आकाशे*) मनोरथानां निखिलीं भूतानि भूति-स्थानानि ।

माया (*अबुध्वा*) किमाह प्रिय सखी ।

रमा (*सास्रम्*) आर्यपुत्रोनपुनरावर्तते, मम मरणावधिश्चेयंयात्रा ।

द्वौ (*युगपदेव ससंभ्रमम्*) किं प्रलपसि । एतादृशींत्वां विहाय कुत्रगतो निर्घृणः ।

रमा (*सास्रं मायाया हस्ते पत्रं ददाति*) न्यासं गृहाण ।

माया (*मन्दं मन्दं पत्रं पठित्वा स्वगतम्*) अतत्वदर्शिनी भवति मतिस्तादृशांहाधिक् ! नपरिचितोऽयं महा-पुरुषो मुरारिणा । (*अश्रूणि विसृजति*)

चन्द्रचूडः कस्मिन् कर्मणि नियुक्तोऽस्मिमित्रेण । सत्यम् । बज्रमपि विलापयति दारिद्रयम् । (हस्तौ प्रसार्य) देहि पत्रम् ।

(माया पत्रं संवृणोति)

रमा (सवाष्पगद्गदम्) मरणाच्चमे जीवितमे वास्मिन्समये साहसम् । आर्यपुत्रस्य वचनं सन्धुक्षयति । नाहमन्यथा करोमि तस्यवाक्यम् देहि देवि, ममाग्रे तत्पत्रम् । (शयनीये भ्रश्यति)

माया आचान्त इव चिन्तया, तुलित इव तापेन, च्युत इव सत्वेन । (सास्रा भवति)

चन्द्रचूडः कथय संदेशम् । किमाज्ञापयति मां मित्रम् ।

रमा वहुवार मेतदेव दातुं प्रायतिष्ट । आः! कि कथयामि, शृणु स तुभ्यं शपते, संरंभते, छिन्ते, भिन्ते, अवमन्यते ...(परावृत्यमुखमाच्छाद्य उच्चैः रोदिति)

माया (प्रावरण मपसार्य) पश्य,

रमा सञ्जीभूताऽस्मि ।

माया भवतु, धन्वनीवाङ्गार बृष्टिः (पत्रं ददाति)

(चन्द्रचूडः पत्रं गृहीत्वापठति, पठित्वा स्वात्मानं धारयितुव्यवस्यति च)

रमा (चन्द्रचूडस्याकारं विलोक्य रोदितुं प्रवृत्ता) क्षमस्व ।

माया आर्ये, यथाकथयसि तथा । आर्य यदयमादिशति

तदेवानुष्ठेयम् ।

रमा पत्युः प्रसादरूपं मृत्युं समाश्लिष्य सुखं वा दुःख-
मादद्दे । (रोदिति)

माया आर्य, महत्करुणं वर्तते । संभावयतु ताम् ।

(चन्द्रचूडोहस्तात्पतितं पत्रं गृहीत्वाः पुनः स्वैरं स्वैरं पठति)

चन्द्रचूडः धिक्, धिक्, पिशाचोऽपि क इदमाचरेत् । अहो !
अन्यथै व मनुते मुरारिः (सर्वं संस्मरति ततो मूर्च्छति)

रमा (सगद्गदं भीतभीतं प्रणम्य) अयमन्त्यःप्रणामः (रुधिरं
वमति) शप्ताऽस्मि क्षम... ... ...(मूर्च्छति)

माया सखि, प्रिये रसे र···मे र······मे (पटान्तेन वीजयति)
महाभाग, श्रूयताम । अरे चन्द्रचूड, दयस्व । (तस्य
शिरसि जलंनिक्षिप्य) संभावयतु तामप्रोषितप्राणाम् ।
अभ्युपपद्यतां समुचितैः समाश्वासनैः ।

चन्द्रचूडः (कथमपि चेतनां लब्ध्वा) भगिनि, प्रियं ते समाचरामि ।
तव किंकरेण मया भ्रात्रा वद किंकरणीयम् ।

(रमा बलात् नयने उन्मील्य कन्यकांदृशा दर्शयति)

तव प्रतिनिधिं कृत्वा परिचरामि (हस्तौ समाकृष्य)
त्यज जाते चिन्ताम । (रमा पुनरपुनरुन्मीलनाय
लोचनेनिमिमील निभाल्य अश्रूणि विसृजति) मृता
सत्यं मृतैव मे प्रिया भगिनी ।

माया (रुदित्वा) मारयित्वा स्वां प्रियां सतीं दयितां मुरारिः सुखेन पर्य्यवस्यति ।

चन्द्रचूडः मृत्वा दुःखं नविजयते । भवतु सर्वथा करोमि तथा यथा जानाति मामयं कालेन ।

माया मृतोनस्याद्यदि ?

चन्द्रचूडः दार्शनिक स कथमात्महत्यां करिष्यति ।

माया सुरेशस्यैव कुटिलानीति सफलीभूता

चन्द्रचूडः कथमिव ?

माया सर्वं विशदेन जानामि । कथमिव भवतो मुख मपवित्रयन्त्यश्रुविन्दवः । समास्वसिहि, स्त्रियो हि विषयः शुचाम् ।

चन्द्रचूडः छिद्र प्रहारिणी नीचानां मति भवति । अथवा, अह वास्या मरणहेतुः संजातः । अहो ! (*निःश्वस्य*) कं विप्रतिपद्ये । यद्भवतु क्वपुनः प्राप्स्यति तादृशान् महासतीनिर्माणपरमाणून् परमेष्ठी । (*रमाया ललाटं निरूप्य वाष्पैस्तस्याः ललाटं परिषिञ्चति*) अहो निष्ठुरः प्रेतभावः । (*मोहं गच्छति*)

इतिषष्ठोऽङ्कः

सप्तमोऽङ्कः

(चिकित्सालये खट्वायां सुप्ता बालिका, तस्याः समीपे स्थितौ मायाचन्द्रचूडौ)

माया आर्यवर्य, अस्या अपि रोगस्तु संलक्ष्यतेऽसाध्य इव ।

चन्द्रचूडः (रूपयित्वा) यत्नः सर्वात्मना कार्य एव ।

माया बाढम् । यत्नेकृते यदि नसिध्यति कोत्रदोषः । रमा पतिता दहने दग्धास्तु वयम् । सतीमपि तां कथमन्यथैव विशङ्कतेस्म सुरारिः । पतिप्रेम्णि चक्रवोकमयीवासीत् ।

चन्द्रचूडः अहो ! दुरतिक्रमणीया दैवस्य वामावृत्तयः प्रेमपाशेनोद्बन्धनं कृत्वा कलेवरं व्यसाक्षीत् । सखि, किंकथये एकत्र प्रणय एतादृशोऽन्यत्र तादृशी प्रीतिः । विन्देऽहं सर्वथा लूतातन्तुच्छटाच्छिद्रुरास्तुच्छाः प्रीतयः प्राणिनाम् ।

माया अत्रैव नहि । ओथेलो कथं दुःसाहस मकार्षीत् । हेम्लेटे कीदृशीपरिस्थितिः समुपगता । सर्वत्रैव दृश्यते तुच्छः प्रणयोऽविदग्धानाम् । अथवा मनोमालिन्याय

स्वल्पं कारणमपि पर्याप्तं भवति। यथा स्वल्पंबीजं कालेन महत् भवति।

चन्द्रचूडः आस्ताम्। गतं नशोचावः। दुग्धंपातुमभिलषति बालिका भवतु। (दुग्धकटोरीं विलोक्य) क्षीरे नीरं मिश्रयित्वाऽत्याहितम्। किञ्च, तदपि समाप्तं विद्यते किं करोमि।

माया सर्वजनीनां सेवावृत्तिं स्वीकृत्य परिचारिकाभिः स्वकर्तव्य मुल्लङ्घितम्। (सखेदम्) आतुरैः सार्धमेता मधुरयागिराऽपि नसंभाषन्ते। पदेपदे भर्त्सयित्वा प्रत्युत्तरं ददति। नचात्र प्राप्नुमः नाइटिङ्गेलतुल्यमहिलाः

चन्द्रचूडः सम्यगुपलक्षितं भवत्या। अत्रोत्कोचादृते नवर्तते शरणमन्यत। दृष्टं द्रष्टव्यम, श्रुतं श्रोतव्यम्। किंबहुना आतुराःक्रन्दन्ति न का अपि समाश्वासयन्ति प्रत्युत किमप्यश्रुत्वैव भर्त्सयन्ति यद्वा वधिरायन्ते। बहुवार मवादिषं किमपिनोच्चारयन्ति ताः। व्रणप्रक्षालनसमये कृतं नैष्ठुर्य्यं विलोक्य को नामसचेताः शक्नोति तूष्णीं स्थातुम्। पीडया व्याधिताः क्रन्दन्ति, तान्तास्तुदन्ति मर्मवाक्यैः। (बालिकायै किञ्चिदवशिष्टं दुग्धं पाययति)

माया (परितो विलोक्य) आर्तक्रन्दनेन चीत्कारेणच नरक

तुल्यं मन्ये। परिचारिका यमकिङ्करीतुल्या स्थानमपि हाहाकार संकुलम्। भवतु, पापस्यफलमिदं भवेत्। खाद्यंच व्याधितेभ्यो दत्तं स्वे एव खादन्तीति श्रूयते ।

चन्द्रचूडः सत्यमेवैतत्। मांसं प्लोषित्वा लुञ्छन्ति, दुग्धेन स्वात्मान तर्पयन्ति, भेषज मपहृत्य धनमर्जयन्ति। किञ्च वहिर्गत्वा कुर्वन्त्येताः टीकाटिप्पणीं चिकित्सालयस्य। अध्यक्षं जुगुप्सन्ते, प्रबन्धंतिरस्कुर्वन्ति। स्वोत्तरदायित्वा भावेन शिथिली भवति समाजस्य बन्धनशृङ्खला। (सस्मितम्) नीचा अनयारीत्याऽऽच्छादयन्ति स्वदोषान्।

माया सर्वेऽन्धाइति संभावयन्ति किं वा ? हाधिक्! विप्रलसन्ते स्वोत्मानमेव। दुग्धौषधीनामपूर्णतां जलेन पूरयन्तिच। भवतु। ददातु जनस्तेनैव जलेनाञ्जलिं मानवतायै।

चन्द्रचूडः भद्रे, सर्वं पित्रे निवेदय। स समीहते वोढतुम्।

मायो (सकटाक्षपातम्) मामंस्त भवान् पितुरग्रे सर्वं संवृतमिति। किञ्चाभोप्सति प्रबन्धंसुन्दरं कर्तुं, परिस्थितेः परवसतयोच्चारयितुमपि नशक्नोति।

चन्द्रचूडः ज्ञात्वापि किं स तूष्णी मास्ते ? तथात्वे दोषी सः।

माया धनिनस्तु गृहेचिकित्सकानाहूयापि भिषज्यन्ति। चिकित्सालयो निर्धनांकृते निर्मीयते । मृतप्रायाः सर्वत्र दरिद्रा एवेतिमन्ये। किंशास्त्रे चिकित्सकानां-कर्तव्यानुशासनं समुल्लिखितं नवर्तते ?

चन्द्रचूडः भद्रे, भगवान् काश्यपोविमानस्थाने विवृत्यव्याहार्षीत् तथाहि "अधीत्यानुज्ञातः प्रचरेच्छुक्लवासाः संयत-केशोऽनुद्भ्रान्तो युगमात्रावलोकी पूर्वाभिभाषी सुमुखः। नचातुरकुलमनाहूतः प्रविशेत् । नचातुरकुलेषु-स्त्रीभिः प्रेष्याभिरपि सहोपहासं गच्छेत् ।

माया (सस्मितम्) आदेशं स्वीकृत्य स्थीरीकृतः सिद्धान्तो भवता। पूजितोऽसि दुर्बलैः, पुष्टोऽसि दरिद्रैः ततस्ततः—

चन्द्रचूडः नचासामपूजापुरस्कृतं नामगृह्णीयात् । मान्यस्थाने नैवतुब्रूयात् नचताभिःसंव्यवहारमतिप्रणयं वाकुर्यात्, नचभर्तु रविदितं स्त्रीभ्यः किञ्चिदाददात् ।

मोया (स्वगतम्) एष एव स्वेदः स्वभावस्य, विजयो, विचारस्य। (प्रकाशम्) शिष्टो वैद्यस्त्वां समाजस्य विमृशामि। संस्कारस्य सन्देश इव, रोमाञ्चइवसिद्धान्तस्य त्वं प्रतिभासि । ततः

चन्द्रचूडः नचावेदितः प्रविशेत्, नचभर्तुरविदितं स्त्रियासह

ब्रूयादासीत वा नचैनां विवृतां प्रेक्षेत विहसेद्वा, प्रणयन्ती चोपेक्षेत नच प्रकाशयेत्।

माया (साश्चर्यम्) किनु सत्यमेवैतल्लिखितंविद्यते। यदि तथाचेत्तद्विपरीताः संजाताकिमर्थमेते।

चन्द्रचूडः (सस्मितम्) तै नाध्यगायि संस्कृतम्। किञ्च, संस्कृताऽज्ञानात्जिह्रेमि। तथापि भाषाटीकां विलोक्य किमपि संदधे।

माया प्रक्रमतामन्यदपि

चन्द्रचूडः नचातुरकुलगुह्यं वहिः प्रकाशयेत्, नातुरकुलदोषान् प्रथयेत्। दृष्टारिष्टमपि चातुरंनतत्त्वंब्रूयात्। नित्यमाश्वसयेत् शरीरौषधव्याधिवयसां चावस्थान्तरज्ञः स्यात्। मृदूपनयनद्ग्राहकमविरूद्धं धर्म्यं सदा ब्रूयात्। प्रजानां हि स्वस्तिकामो भिषगिह चामुत्रच नन्दत" इति।

माया सत्यम्। मनः शास्त्रमधिगच्छन्तिमहर्षयः। स्वार्थकामोधनलोलुप श्चाधीतेवैद्यशास्त्र मधुना केन चाध्येय इतिमहर्षिरभ्यधात।

चन्द्रचूडः वासु, यूरोपीयाः नधनलोभेनकार्यमारमन्ते, दासीभूता एशियानिवासिन एवैतादृशाः संजाताः। यदा भारतस्य स्वर्णकालोऽभूत् तदा भारतीयाः जगद्गुरव,

आसन् । "ब्राम्हण क्षत्रियवैश्यशूद्रै रायुर्वेदोध्येयः । तत्रार्थपरिज्ञानार्थंपुण्यार्थंचात्मनः प्रजानुग्रहार्थं ब्राम्हणैः प्रजासंरक्षणार्थं क्षत्रियैः बृत्यर्थं वैश्यैः सुश्रूषार्थमितरै धर्मार्थंचसर्वैः" इति ।

माया (सस्मितम्) प्रपूरण महंकरिष्ये, धनार्जनार्थं सर्वै, रिति ।

चन्द्रचूडः मैवंवद । तथाहभगवान् "सुखजीवितदानंहि सर्वधर्म स्याधिकं ब्रुवते, ततश्च पुण्य एवायुर्वेदः । सुखजीविदानतुष्टाश्च देहिनः कृतज्ञाय संविभजन्ति पुरः स्तुवन्तिच" ।

माया किन्त्वाधुनिकाभिषजोवैपरित्यं समाश्रयन्ते ।

चन्द्रचूडः नभवन्ति तादृशाः सर्वे, केचन दयालवोविद्यन्ते परोपकारिणः । ध्रियते तेनैववसुन्धरा ।

माया बाढम् । पुर स्त्वमेवासि ।

चन्द्रचूडः विकत्थसे । श्लाघया व्यर्थंकिमर्थंकदर्थयसि ।

माया नाहं सत्यमपलापमि । वज्रपञ्जरमसित्वं शरणागतानाम् । किञ्च, ब्रिटेन फ्रांस जर्मनी प्रभृतिषु स्थिताः जनाः परोपकारं कर्तुं धृतव्रता इव स्वात्मानं मन्वते । आरण्यकान् सुशासितुं कदाचित् प्रसह्य गौराङ्गाः शस्त्रास्त्रैरपि पाठयन्तिसभ्यताम् । राष्ट्रपति विल-

सनस्यनीति श्चैतादृशी पुराऽभूत्, मेक्सिको देशे स्वायत्त शासनं शिक्षयितुं शस्त्रास्त्राणां प्रयोग मकरोत्। यदि स्यात्तादृशी परोपकारिता तव तदा भवेत् चिकत्थनंमपि।

चन्द्रचूडः परोपकारार्थं धृतव्रता स्तादृशा साम्राज्यवाद समर्थका भवन्तीत्यत्रकिमाश्चर्यम्।

मायो भवतु। सावार्ता किंभूता ?

चन्द्रचूडः (संस्मृत्य) नसंस्मरामि ?

माया कथंविस्मरति भवान्। काचित् बाला दुःखोदधौ निमग्नासीत्। समुद्धतुं तांभवान् बद्धपरिकरः प्रयस्यतीति श्रूयते।

चन्द्रचूडः आम्, ज्ञातम्। नेयंकल्पना सत्यघटनैवैषा। प्रथित धनवतः कर्तव्यमिति विभावय।

माया नाधिकरणमुपगता वराकी।

चन्द्रचूडः गत्वा किं क्रियते ? तत्र कलियुगस्य दायादमुत्कोचं स्मर। उत्कोचमधिगम्य सत्यापयन्त्यधिकारिणः।

माया (सखेदम्) आः कीलितं मनुष्यत्वमेव किंकुर्मः। सर्वे दोषाः काञ्चनमाश्रयन्ति।

चन्द्रचूडः किञ्च, मनुष्य स्वभावात्सज्जनोभवतीतिन्यवीविदत मो क. गान्धिमहोदयः। प्रतिक्रियया धने वद्धमत्सरास्ते

परिस्थितिं पिण्डयन्ति, यन्त्रयन्ति व्रणयन्तिच।
इतिहासावलोकनेन ज्ञायते, धनिनः प्राक् स्वार्थं
विहाय समाजमुद्धर्तुं बद्धपरिकरा नासन्निति।

माया मुरारिरपि वयममृतस्य पुत्रा इत्यशंसत् (*निःस्वस्य*) जात्याः परिभ्रष्टेतिश्रूयते।

चन्द्रचूडः (*ससंभ्रमम्*) का ?

माया (*सखेदम्*) शम्पा।

चन्द्रचूडः (*संस्मृत्य*) रण्डा, सैव शम्पा। कोनिर्णयोऽभूत् ?

माया गर्भस्रावं निराकार्षीत्प्राड्विवाकः, किन्तु तामक्षतयोनिं साधयितुं नाक्षमिष्ट।

चन्द्रचूडः केनधर्षितेतिनिर्णीतम् ?

माया प्राक् देवरादिभिः × × × × × × ×
(*अर्धोक्ते लज्जते*)

चन्द्रचूडः तथात्वेगिरिशं निवारयति दोषात्।

माया दोषोगिरिशस्य मस्तकेनिक्षिप्तोवर्तते, सवराकः कथं पारयति प्रात्याख्यातुम्।

चन्द्रचूडः कथमिव ज्ञातं भवत्या।

माया संमुखेस्थितंवस्तुजातमपि समस्तंपरमुखादेव श्रोतुं प्रेरयन्ति सिद्धा श्चतुराः।

चन्द्रचूडः सखि, बाल्यमतीत्य स्पन्दितं यौवनं, लावण्येन भाषा

मपि संस्करोति। पण्डितासि भावाववोधने।

माया (विहस्य) प्रणमामि स्वाधीनायतुभ्यम्। सत्यं किमपि नज्ञातमिव। किं न श्रुतं भवता गर्भस्रावक एव चिकित्सको मत्पितेति।

चन्द्रचूडः (अपवार्य) शान्तंपापम्। सोऽपिकथमिदमाचरेत्।

माया (विहस्य) मिथ्यैव तस्योपरिसंस्थाप्य दोषजातमधि करणे ध्याऽह्वयत्।

चन्द्रचूडः (सहर्षम्) ततस्ततः—

माया तस्यहस्ताक्षराणिलिखिते भेषजपत्रेऽङ्कितानि नासन् तस्मादेवामुञ्चत।

चन्द्रचूडः (स्वगतम्) संदिग्धोऽस्मि। (प्रकाशम्) सत्यंकिं तदेव भण। अधिकरणे नहि स्थितास्ति भवती।

माया (सस्मितम्) त्वदग्रे नविद्यते मे गोप्यम्। प्रियोऽसि नाख्येयं किमपिनास्ति। शृणु याथातथ्यम्।

चन्द्रचूडः अवहितोऽस्मि

माया (सस्मितम्) एकदागिरिशः समागत्य पित्रे गर्भस्रा- वकौषधमपृच्छत्। सोऽपिशुद्धहृदयेनैवाभ्यधात्। पश्चात्पत्रं निष्काश्य लिख्यतामस्मिन्निति तं सुरेशोऽ प्रार्थयत्। तदा पिताऽवेदीत् धूर्तः सस्वार्थं साधयितुं वयति वागुरामिति। अथच संशय्य पित्रा नालेखि।

चन्द्रचूडः आर्ये, जानामि तव पितुः स्वभावम्। तेनैवाधुना मुक्तः किल सः। ज्ञातम्। गोपालं प्रति महती समस्या समापतिता।

माया (*साश्चर्यम्*) कथमिव ?

चन्द्रचूडः पतिताया संसर्गात् सोऽपि संजायते पतितः। तत्संसर्गी चाप्यपराध्यतीति निर्णीतमासीत्। किन्तु स धूर्तः प्रवञ्चनपटुर्गोपालः भगिन्या सार्धंसमागम एव नासीत् द्वित्रहायनादिति व्यवृणोत्। तस्मिन्समयेग्राम एवासमितिव्याचष्ट। परन्तु भगिन्याः स्वहस्तगतंधनंतु विनष्टमेव।

माया आः, दिनसपिरजनीं विदधाति। (जिह्वां दशति)

चन्द्रचूडः तस्मादेव न्यायस्य स्वरूपं विभज्यते नवधा। प्रसादे विजयतेवादी तेनैवप्रमाणेन, रूष्टे पराजयते तेनैव चप्रतिवादी।

माया साबाला बाल्यत्प्रभृति कथं मुनिमनोहारिणं मन्मथं दत्रयतु। शम्पां जात्या भ्रष्टेति वक्तुं नाहं प्रभवामि।

चन्द्रचूडः (*विहस्य*) का सा जातिः कुत्रवर्तते। सत्यमाह

"नयाति नचतत्रासीन्नास्ति पूर्वं नचांशवत्।
जहातिपूर्वं नाधारं महोव्यसनसन्ततिः॥"

किञ्च, म्लेच्छैर्निर्मितमांस्सौदनं भुक्त्वा कदावर्वेति ?

कदा रजक हस्ताद् गृहीत्वा पीतं गाङ्गं जलमपि जातिं विनाशयति। अहो! वर्णाश्रमिणामाधुनिकानां जातिरहस्यं को वा व्याख्यातुं शक्नोति। धिक् कष्टम्।

माया (साश्चर्य मुद्रया) महदाश्चर्यम। किमर्थं पुरा प्रचलिता जाति पद्धतिः। वृत्तिसांकर्य्यं माभूदितिधिया वर्णाश्रमधर्मं स्वीकुर्वन्तिस्म इति मुरारिर्व्याकरोत।

चन्द्रचूडः सत्यम्। किञ्च, सिद्धान्त भेदेन नैयायिकैः सामान्यमुररीकृतं, पुनश्च बौद्धादिभिर्नाङ्गीकृतम्। विदुषि, यदा महासत्ताख्यस्य सामान्यस्यैवास्तित्वं ननिर्णीतं तदा वान्तरजाते ब्राह्मणत्वादेः कथैव दूरापास्ता। दर्शने विवादो प्रचलत्येवास्मिन् विषयेऽद्यावधिः।

माया (सस्मितम्) तथात्वे दार्शनिका एव जातिवादस्य जनका इत्यत्र नास्तिविप्रतिपत्तिः।

चन्द्रचूडः अथकिम्। प्राक् बुद्धवैलक्षण्यात स्फुरति हृदि दार्शनिकानां सिद्धान्तः। ते तपस्विनः सिद्धान्तरूपेण हृदयोद्गारं दिशन्ति व्याप्रियते चान्यैः।

माया (सोपहासम्) कन्यकामिव परार्थं परिपुष्णन्ति तेऽपि।

चन्द्रचूडः (सस्मितम्) सत्यम् स्वदृष्टान्ते नानुमाति चात्र भवति। वास्तु, दार्शनिकाः परि चालयन्ति सिद्धान्ता

नुसारेण संसार मित्यत्रांत्युक्तिं वाहं निरूपयामि। तथाहि– रूसो महोदयस्य प्रभावात् समजनि फ्रान्से क्रान्तिः; नित्से महाशयस्य सिद्धान्त मवलम्बनात् जर्मनी देशे प्रादुरभूत हिटलरः। गान्धि महात्मनो दर्शनेन भारते वर्षे त्रुटिता दासशृङ्खला। कार्लमार्क्स महोद्यमस्य स्वप्ना साकारी भवति रूसदेशे।

माया (विहस्य) खपुष्प सदृशी जातिः।

चन्द्रचूडः वैयाकरणा अकृतिर्गहणा जाति रिति ग्रन्थन्ति सिद्धान्तम् सत्यमिव प्रतिभाति। जातिवादं याथार्थ्यं नानधिगम्य सर्वे ऽन्धेनैवनीयमाना यथान्धा वर्तन्ते। ओदने सीमिता कुत्रजातिः कुत्र सूपेस्थिता ज़ातिः कुत्रमांसे समुपयुज्यते जातिः। ओचार खल्वेषः भिण्डितार्थस्तु शास्त्रेऽन्य एव।

माया भारते वर्षे यादृशी स्पर्शास्पर्श विषया जातिप्रथा पुरा सीत् साधुना नियमनिर्माणादेवोन्मूलितो। कोऽपिक- मपि तिरस्कर्तुं नपारयति। तथा च जात्याः कलङ्क मेव नष्टं मन्ये। सांप्रादायिकतया पाश्चात्यैर्वञ्चिताः स्मः।

चन्द्रचूडः (विहस्य) अर्धजरत्या नसमासाद्यते लक्ष्यम्। आर्थिकीं समानतां संस्थाप्य चैकत्र स्पर्शास्पर्श विधेयकेननोन्नतिर्भवति जातेः।

माया कथमिव, नाहं युनज्मि संगतिम्।

चन्द्रचूडः यत्राऽस्पृश्यताया नामापि नविद्यते तत्राफ्रिकाया ममेरिकोयांश्चकिमिति कदर्थयन्ति पदे पदे निग्रोजातिम् निग्रोभिर्भोजनालये सर्वत्र भोक्तुं नपार्य्यते, रथ्यायां स्वेच्छया गन्तुं नप्राप्यते, गौराङ्गनाभिः सार्धं परिणेतुमपि नलभ्यते। हन्त! ते पुनःमानवता संरक्षक विधेयक निर्णायका इति घोष्यते।

माया सर्वथा ऽन्याय्याम्। तत्र कृष्णगौरयोर्भेदः संप्रदाय वाद मुलङ्घ्या जागर्ति।

चन्द्रचूडः (निःश्वस्य) देवि, स्वतन्त्रते, मर्त्यलोकस्य ॰॰ोर्ननिर्सिताऽसिविधिना, केवलं कल्पनया कल्पितासि। ते सत्य-स्वरूपं हिरण्मयेन पोत्रेण पिहितं वर्तते।

माया कथं स्यात् समाजस्योद्धारः।

चन्द्रचूडः अस्पृश्यवर्गे यदि संस्कृतं पठ्यते तदा रहस्यं ज्ञायते च। वर्णाश्रमिणां जाति भ्रंशकराणि बहूनि कर्माणि विद्यन्ते। तानि कृत्वपि सर्वे ते मोदमानास्तिष्ठन्ति। एकोऽपि जनो नोस्ति यो वर्णाश्रमनियमं विश्वसिति। यदिकोऽपिस्यात् ममाग्रे दर्शयन्तु। गतः स कालो यत्र रघु प्रभृतयो राजानो वर्णधर्मस्याश्रम धर्मञ्च पालयांचक्रुः।

माया (संस्मृत्य) अज्ञासीत् परिस्थितिं मुरारिः। सोऽपितथैव सममंस्त। सत्यम्–

"दारिद्र्यं जनतापकारकमिदं केनापि दृष्टं नहि"

अहो! कस्य कुचक्रे भ्राम्यति सः।

चन्द्रचूडः (सवैलक्ष्यम्) संसार श्चैतादृशः––

"क्वचिद्विद्वद्गोष्ठी क्वचिदपि सुरामत्तकलहः
क्वचिद्वीणावादः क्वचिदपिच हाहेतिरुदितम्
क्वचिद्रम्यारामा क्वचिदपि जराजर्जरतनु
र्न जाने संसारः किममृतमयः किं विषमयः॥"

माया (सास्रम्) आर्य, भवद्वचनश्रवणादन्तरङ्गं द्रवति। भाग्येनोपनीतं स्वाभोविकं मित्र रत्नं भवादृशं नाबोधीत् सः।

चन्द्रचूडः (विचार्य) अथवा, ईश्वरः सर्वभूतानि भ्रामयन् हृद्देशे तिष्ठति।

माया (उद्धर्वमवलोक्य) कीदृशोऽयमीश्वरो यः सर्वान् व्यथयति, पिण्डयति, नियन्त्रयति, तापयति, पीडयति, दुःखयति, चूर्णयति।

चन्द्रचूडः (सस्मितम्) भद्रे क्लेशकर्मविपाकाशयैरपरामृष्टो य ईश्वरः स सर्वेषामपि गुरुः कालेनावच्छेदात्। दुःखोदधिमग्नात् संसारिणः स एव सान्त्वयति,

तर्पयति, कल्पयति मर्षयति, चोदयति पारयति च ।

माया भवतु । द्वौ वादौ सदैव प्रचलतः । नाहं वृथाविवदे । जानामि त्वमीश्वरं प्रत्येषीति । किञ्च, मुरारिः सुरेशस्य छलं नावेदीत ।

चन्द्रचूडः (सवितर्कम्) आयुस्मति, जानासिचेद्भण विस्रब्धम् ।

माया यज्ज्ञातं नसंवृणोमि भवदग्रे, परन्तु स्वल्पं जानामि सर्वं तौ निगूहतः । इन्दुमत्युपन्यासं निरमिमीतेति-स्मरिष्यति भवान् ।

चन्द्रचूडः आम् स्मरामि । नायिकायाश्चरित्रनिर्माणे स्वात्मकथा-मेवनिरमासिषमिति साचष्ट ।

माया अथकिम् ।

चन्द्रचूडः ततस्ततः ।

माया तदाहं रमाच शम्पाया गेहंगत्वा तस्याश्चरित्रं तस्यै सर्वमशंसम ।

चन्द्रचूडः उपन्यासे तस्याः किं स्थानमासीत ?

माया अथकिम् ? ज्ञात्वैव विशदेन लिखितुं सैच्छत । आवां सूचयावः ।

चन्द्रचूडः तस्मादेव शश्वत्तत्रागच्छः । रमाचानुयायिन्यभूत् । गत्वाकिमकार्षीः ? (सवितर्कम्) आः स्मृत्त्वाविदी-र्यते हृदयम् ।

माया एकदा द्वित्राणि पत्राणि यदापठिषम् । तदादर्शम् तत्रैकस्य दार्शनिकस्य चरित्रचित्रणम् । बहुधा पृष्ठेऽपिसानाभ्यधात् सदैवाप्यधात ।

चन्द्रचूडः (मायांनिरूप्य) किंस्वित्! रमा भवेत् तवसमीपे । (सास्रंशिरो नमयति) ततस्ततः ।

माया परेद्यु र्गत्वासर्वं न्यरूपयम् । मुरारेरात्मकथैवेतिनिरदीधरम् । तमवगणय्य स्त्रीवियोगदुःखोदधौनिमग्नमचीक्लृपत ।

छन्द्रचूडः भविष्यत्कालमपिकथमैन्धिष्ट तस्या दृष्टिः । यद्वा सूक्ष्मदृष्ट्या आञ्जि । विदुषीन्दुमतीति नात्र विप्रतिपत्तिर्विद्यते ।

माया स्वेनैवमित्त्वा तस्यभाग्यं कथममास्त सेतिकीदृशास्ते तर्कः ।

चन्द्रचूडः आम । (सविस्मयम्) किंतथा, कोलाभ स्तत्र ।

माता (सखेदम्) विस्मृतं भवता तथाहि "अकारणा विस्कृतवैर दारूणादसञ्जनात्कस्य भयं नजायते ।"

चन्द्रचूडः असज्जना सेतिसंभावयति भवती, तादृशश्चतुरो मुरारिर्नाज्ञासीत्कथंरहस्य मिति व्यथते हृदयम् ।

माया तयोरुच्छृङ्खलतायै नरोचतेस्म मुरारिः ।

चन्द्रचूडः विशदस्ते तर्कः । तथैवावधारयामि । तात्त्विको विरोधः

सिद्धान्तेऽभूत् । आयति रुत्तरयति सुरेशः कीदृशो भविष्यतीति। सोऽपि निर्धनैः साधं नाचीकमत स्थातुम् ।

माया कथं भवता ज्ञातम् ?

चन्द्रचूडः शृणु भद्रे ! एकदा भ्रान्त्वाऽवाँ चतुस्पथेऽभूव। तदा याचका धावित्वा तत्र समागताः ।

माया किमिति ?

चन्द्रचूडः तेषां शाणनिर्मितानि जोर्णशीर्णमयानि परिधानानि द्वित्रहस्तपरिमितानि, लज्जानिवारणायाऽपर्याप्तानि··· ···

माया (मध्ये) दारिद्र्यस्वरूप प्रतिरूपाणि इतिज्ञायते ।

चन्द्रचूडः (दीर्घं निः श्वस्य) तन्मध्ये द्वित्र जनानांहस्ते लगुडाश्चासन धाविताः श्वानश्च पृष्ठे समागच्छन् दृष्ट्वा तद् दृश्यं तत्रैवातिष्ठम् । तत्पश्चात भोजनोच्छिष्ट पुटकादीन् न्यसितुं समागतं जनं साक्षादवालोकयम । ततः पत्राणि हातुं स समुद्यत । एको याचकः स्वोत्तरीयं तनित्वाऽयाचिष्ट । लगुडहस्ताः सर्वे कुक्कुरान ताड़यन् । कुक्कुरमुखात् पुटकमेकोऽलुञ्छत् । सर्वे ततो ऽहृष्यन । (सास्रम्) स्मारं स्मारं तद्रुदनीयं दृश्यम द्यावधिर्मे स्वान्तं · · · · · · · (वाष्पनिरुद्ध कण्ठ

क्षणंतूष्णीं भवति) कदापि नापक्षीयते हृदये, सङ्केतयित्वा सुरेशं तत्सर्वं मदर्शयम्। किन्तु नादयिष्ट।

माया (सास्रम्) अतिशयोक्त्या विशदयत्यार्यपुत्रः (सलज्जम्) आर्य,

चन्द्रचूडः परिहास कथास्वपि नापलपामि सत्यम्। सखि, स्वल्पमेव वर्णित मित्यवजानीहि। वाचा हार्दं भावं न व्यक्त मापाद्यते।

माया आधुनिकाः साम्यवादिनो वा सुधारवादिनो ये केचनसर्वे मनसि वचसि कर्मणि चैकरूपतां नसंभजन्ते।

चन्द्रचूडः लोकहित भावनां परित्यज्य साफल्यं नहि ते समधिगच्छन्ति वासु,।

माया सुरेशमप्यतीत्यगिरिशोवर्णयत् पाश्चात्यानां कृत्यम्। मदिरामाहात्म्यं व्याकरोत्, पाश्चात्यदेशे मद्यं विनाशरणं नान्यदिति।

चन्द्रचूडः तेषां दुर्गुणमेवानुकुर्वन्त्यत्रत्याः। तेषा मशीलतोपकरणं पृथिवी नच सुकृतसंस्मरणोपकरं हृदयम्।

माया किंबहुना, सत्यस्वरूपं तस्याधुनानरीनर्ति नग्नरूपेण अहोकीदृशी प्रवञ्चना।

चन्द्रचूडः प्रायश्चित्ताय कारायां वत्स्यति द्वादश वर्ष पर्यन्तम्।

माया (साश्चर्यम्) किं गिरिशो विवत्सति कारागारम्?

चन्द्रचूडः को वाञ्छति कारायां वस्तुं, किन्तु परिस्थितिः पर-
वशयति बलात्।

माया स्पष्टं व्यवहरति सुरेशः। तादृशो व्यवहारो नतस्य
किन्तु वत्स्यति सोऽपि सत्वरं कारागारम्।

चन्द्रचूडः प्रणयं रोद्धुं कोऽपि नसमर्थतरः।

माया (सस्मितम्) लोकस्थितयः केन शक्यतेऽन्यथाकर्तु
मेकपदे।

चन्द्रचूडः सत्यमाह भवती, स्वसंस्कृति सपद्येव त्यक्त्वा
उत्प्लवते सः। कथमेकपदे सर्व मापादतो विच्छिद्यते।
सुरेशस्य सिद्धान्तोऽधुना विपर्य्यस्यतीति मन्ये।

माया अपथेपदमर्पयन्तित्ते श्रुतवन्तोऽपि रजोनिमीलिताः।
किन्तु राजनीतिप्रवीणं सम्भावयामि तम्।

चन्द्रचूडः स्वायत्ताश्चासन् विद्याविन्दवः कतिचित्तस्य। समान
सिद्धान्तयो स्तयो प्रीतिः श्लिष्यति परस्परम्।

माया (सानुरागम्) सत्यम्। नखलु वहिरूपाधीन् प्रीतयः
संश्रयन्ते। (सकटाक्षम्) सिद्धान्तानुसारेणायंजनो-
ऽपि .... (लज्जते)

चन्द्रचूडः (स्वगतम्) मांविचालयतिमाया। प्रथम दर्शना
दारभ्य पर्युत्सुक इवास्मि। अहो! प्रख्यातैव
मनोदुर्निवारता। भवतु। नास्या अवसरं दास्ये।

(प्रकाशम्) कुलकुमारि ! असाधुदर्शीखलु तत्रभवान् पिता भवतीं सेवाधर्मे नियुङ्क्ते ।

माया (सकटाक्षपातम्) नाल्प पुण्यै रवाप्येत सर्वातिशायि-सुखरस प्रसूति र्भवत्पादपल्लवच्छाया ।

चन्द्रचूडः (सस्मितम्) वक्रोक्तिर्विलम्वयति वाच्यार्थम् ।

माया (सस्मितम्) तेनैवकाव्येभवेत्तस्य स्थानं सुरक्षितम् तस्मात् भवानस्मिन्कर्मणि पटुः ।

चन्द्रचूडः भगिनि, विशदय विस्रब्धम् ।

माया सेवा धर्मस्यनिन्दामिवभवद्वचनारविन्दाच्छ्रुत्वा-कथमिव किमिव कलयामि । सेवासुख मार्द्रयतिमे स्वान्तमित्य सकृदुक्त्वा प्रत्यूहति मां किमर्थमार्यः। परोपदेशेपाण्डित्यं सर्वेषां सुकरमिति भवद्सिद्धान्तः परिपुष्णाति ।

चन्द्रचूडः नाहं मोहं व्रवीमि विदुषि, परोपकारार्थं विसर्जयामि स्वजीवनंम । एषमेराद्धान्तः । किं कुर्वीय, लोकोमा-मभ्यर्थयते ।

माया सत्यम् । समाजे जजन्मो वयम ।

चन्द्रचूडः परिग्रहं परित्यज्य संहरामि शरीरम। नाहंपरिण-यामि ।

माया (सेर्ष्यं सवैलक्ष्यम्) विरम । इतः परम् ।

चन्द्रचूडः (सस्नेहम्) वत्से, नाहं विरमामि स्वकृत्यात्। सर्वं श्रोतव्यं त्वयाजाते !

माया (सास्रम्) श्रुतं श्रोतव्यम्। कोवान्तरायो येन द्विधा नभवति हृदयम। श्रुत्वा, ग्रावापि रोदिति वज्रस्य हृदयमपि दलति।

चन्द्रचूडः भद्रे, भिक्षेऽधुना, सावधानाभव। पश्य, विवाहानन्तरं लोक सेवा लीयते। मुरारिं विलोक्य तत्सर्वं संयुनक्तु भवती।

माया विहायाऽर्धाङ्गं नपूर्णतां श्रयति मानवः (सवाष्पकण्ठम्) नाहं प्रत्येमि।

चन्द्रचूडः किन्तु, विचारय। तदा समष्टेर्विश्लिष्य स्वार्थ परिधिरेव पतति। (स्वगतम्) कामयते माम्। किंकरोमि। बाधते मामस्यः प्रणयः। सत्यम्। अत्याऽऽरूढोहि नारीणामकालज्ञो मनोभवः।

माया (दीर्घं निःश्वस्य) विधुरो विधवेवोच्छिनत्ति समाजम। बुद्धस्यदर्शनं शङ्करस्य संन्यासश्च विघटते लोकम्। दयस्व, विवाहिता महापुरुषाः सेवा धर्मे बहवो बद्ध-परिकरा आसन्निति कलयस्व। देशप्रेम्णि हिटलर सुभाषादिभ्यो गान्धि स्टेलिनादयो न्यूना नवर्तन्ते।

चन्द्रचूडः सखि, सत्यं कलयसि।

माया अवधीरयति मामार्यः, व्यामिश्रेणैव वाक्येन मां मोहयसि। भवतु। यदि समाज सेवां सन्दधाति पाणिग्रहश्चेत् नाहमप्युद्वहामि। अहमपि समीहे समाज सेवासुखम्।

चन्द्रचूडः (शोचित्वा) किं भणत्येषा, 'इदं किला व्याजमनोहरं वपु स्तपःक्षमं साधयितुं त्वमिच्छसि"।

माया (सगर्वम्) इतः परं ज्ञायत एव। समाजं छेत्तुं नाहं व्यवस्यामि। भवद्विचरेणात्मानं तोलयामि।

चन्द्रचूडः (सस्नेहम्) प्रसीद प्रिये, मुरारे रग्रे स्वामानं नग्नमेव दर्शयित्वाऽप्येतुं तस्मै ददे। मामपि तवप्रेम्णि बद्ध-हृदय मनुजानीहि (तूष्णी मास्ते)।

माया (साञ्जलिम्) प्रतीक्षायै नमया दत्ता जलाञ्जलिः। देह्यवसरं मह्यमपि हृदयेश्वर!। कथ मेक पदे निरागसं जनं मृद्नासि।

चन्द्रचूडः प्रिये, त्यज संकल्प सञ्चयं, स्वार्थिकी परिस्थिति श्चोप युक्ता नास्ति मम।

माया प्रिय, हृदयमामृशति प्रीतिरिति त्व मनुजानीहि। मम व्यक्तिगतां स्वतन्त्रतां मुधैव संचिनोषिकिमर्थं भो! नाहं भिक्षे प्रणयं त्वत्तः किन्तु त्वदर्थं विमर्मि तनुम्। (वस्त्राञ्चलेनमुखमावृत्य रोदिति)

चन्द्रचूडः (स्वगतम्) कथमपास्यामि प्रेमविह्वलामेनां कथंवा स्पृहयामि । व्यथयति मामपि प्रणयोऽस्याः । कृतं संदेहेन । एष नूनमस्या आत्मगतो मनोरथः । (प्रकाशम्) प्रिये, प्रयतिष्ये, समाश्वसिहि ।

माया (स्वगतम्) मर्यादा मप्युल्लङ्घयति मे मनोरथः । कृतं संदेहेन ज्ञातं तस्य स्वान्तम् । प्रियोऽपिमां समीहते । (सलज्जम्) कदर्थयामि त्वा मनवरतं क्षमस्व । अद्यापि कुत्र वर्तते मुरारिः । जीवितं तमनुजानाति आर्यः

चन्द्रचूडः प्रिये, दुष्कराकिलात्महत्त्या अथवा सुकरा खलु ।

माया कथमिव ।

चन्द्रचूडः मुरारि र्न संशेते परत्र, वितर्कयामि नकरिष्यति तस्माद् स्वात्महननम् । यः किलात्मनो पुनर्जन्म स्वीकरोति विभेति स स्वात्मानं पातयितुम् ।

माया ये मृत्वाऽसामर्थ्यं प्रकटयन्ति तैर्दुःखोपरि न प्राप्तो विजयः ।

चन्द्रचूडः किञ्च विवशीभूत्वा कदा तादृशी परिस्थितिः समा गच्छति ।

माया कासापरिस्थिति र्या प्रेरयत्यात्महत्त्यार्थम् । कोऽसौ- परिणामः यत्र ताम्यति चेत स्तप्यते चात्मा ।

चन्द्रचूडः शृणु बाले, यदा मस्तिक चक्रे परिभ्रमति वेदना,

व्रणयति हृदय कुहरं यातना, आतङ्कतति विध्वंसोमा॰ नसं, विचेतयते चित्तमासक्तिः अङ्कयति निरर्था प्रतिष्ठा लक्ष्यं, कल्पयति भीतिरात्मानम्, ऊनयति प्रक्रिया प्रकृतिं, गर्हयति शरीरं त्वरा, घोषयति निरर्थकं तर्कः छादयति मेधांमोहः तर्पयति ग्लानि-र्लालसाम्।

माया (मध्ये) ज्ञातम्, तदा मुह्यति मतिः।

चन्द्रचूडः नहि तदा बुद्धिर्विमुह्यति, चित्तं म्लायति, अभिमानो ज्वलयति, मनोभ्राम्यति, चक्षुक्लिद्यति, कर्णः क्लाम्यति त्वग् स्विद्यति, जिह्वा ताम्यति, नासिका क्षुभ्यति।

माया अथकिम्।

चन्द्रचूडः ततः प्रियतमं स्वात्मानं सम्राडपिघातयति, युवापि पातयति, द्रविणवानपि विनाशयति।

माया सत्यं शंसति सत्यवादी भवान्। प्रबुद्धाऽस्मि। तस्मात स्यात् गिरिशस्य पिताऽवधीत स्वात्मानम्।

चन्द्रचूडः (सखेदम्) पुत्रौ पाठितौ, धनश्चार्जितं किन्त्वस्य परिणाम आत्महत्त्यासदृशः परितापोऽभूत्।

माया उन्मत्त आत्मघाती जुगुप्सते सर्वम्। विमुह्य स्मयते स्फुटित्वापि स्पर्धते।

चन्द्रचूड सखि, स्खलति सर्वतः स्वात्मघाती । त्वया दृष्टं सर्वं गिरिशस्यपितुः किंकरोतु कथंशरणदं मरणं नपरिष्व-जताम् पुत्र्या समालिङ्गितो भुजङ्गः ।

माया पुत्रेणापि ब्राह्मणी विधवा धर्षिता ।

चन्द्रचूडः ओम् । धनानि चापचीयन्ते, दुःखंनिर्य्यातयति,लोकः प्रतिकरोति, कोलाहलो विप्रतिपद्यते, विवादोऽवहे-लयति प्रयोजनान्यवसाययन्ति ।

माया ततः प्रयोगा विध्वस्ताः ।

चन्द्रचूडः ततोऽव्यापादयत्यात्मानम् । गृहकलहेनोद्विग्नानामात्म-घातिनां वार्ता प्रायशो विद्यते पत्रिकासु ।

माया सपत्न्योर्विवादःगृहकलह कारणे मूलं कारणं संभाव यामि । सपत्नीकिंस्विद्स्यात् ?

चन्द्रचूडः स्वकामपियासां तर्पयितुं षष्टिवर्षेषोडशवर्षां विवहति बृद्धः कामान्धः । (*सस्मितम्*) तेन जायते कथं स्तृप्तिः युवत्याः । सत्यम् । नहि पश्यति कामान्धः ।

माया (*सस्मितं सलज्जम्*) अरमणीयः खलु पलितानां मदन विषयावतारः । किञ्चागामि सुखं वा दुःखं वा प्रागेव को विचारयति ।

चन्द्रचूडः देवि, नवर्तन्ते परमार्थतो धनिनः सुखिनः । तेषामशनं वसनं यानं दाराश्च बिलोक्य सुखिन इत्यनुमेमीयन्ते ।

माया (सविस्मयम्) कथमिव श्रद्दधे !

चन्द्रचूडः सदाशान्तास्ते, अशान्तस्य सुखं कुतो भवेत्। ते हर्म्ये वयंपर्णशालायां निवसामः। परन्तु तेभ्य आत्मानं सुखिनं गणयामि।

माया तथात्वे धनमेव तापहेतुं संभावय त्यार्यपुत्रः (सलज्जम्) श्रीमान्।

चन्द्रचूडः प्रिये, त्रस्यसि नकोऽपित्रासहेतुः। हृदय स्थित भावं वाणी प्रकटयति किंतेन (विहस्य) विदुषि, यस्य तृष्णा विशाला वर्वर्ति वर्वरः स कदापि नपरि शीलयति परितोषम्।

माया (सस्मितम्) बारंबारं नियन्त्रयति भवानेव मेजिह्वां भवतु, मिथ्यैवार्थं शपति भवान्। अर्थाभावादेव निमज्जति लोकः। धनं विज्ञानञ्चेदुरुपयोगाल्लुञ्छति धनिनम्।

चन्द्रचूडः कंश्रीर्न दर्पयति भद्रे, अर्थशास्त्र विदः कामयन्तेऽर्थमित्यत्रनास्ति विप्रतिपत्तिः। किञ्च तेनैव हेतुना निगिरति लोकं लोकः, निर्दिशति प्रेरणा नीवीवादम्।

माया गान्धिवादः मार्क्सवादश्चमिमीते परस्परं स्वसिद्धान्त ञ्चात्रैव। भवतु। प्रकृतमनुसरामः।

चन्द्रचूडः (संस्मृत्य) तेनैव पत्नी पतिं पतिः पत्नीञ्च संरभते।

दास्याः कृते पिता पुत्रौ कलहायेते। किञ्च। "प्रवृत्तिः कुत्र कर्तव्या जीवितव्यं कथंनुवा"।

(परिचारिका इन्दुमती मानीय निकट तमायां खट्वायां स्थापयन्ति)

माया (साश्चर्यम्) आः कस्मात्। अत्यन्तमेवकृशशरीरासि। अनुदिवसं खलु परिहीयसेऽङ्गैः। कस्ते रोगःकिमर्थमा नीतासि मानिनि,।

इन्दुमती (सर्वतोविलोक्य) कुतस्त्वमद्यात्र प्रियसखि, वैजननेमासि सुखप्रसवार्थमानीतास्मि (निःश्वस्य) मम जोवन संग्रामं पदे पदे प्रतिदिनं प्रचलतीति विदितं भवत्या।

चन्द्रचूडः (स्वगतम्) धीरावीराङ्गनैषा, भवतु। (प्रकाशम्) कारागृहात् स्यात् समानीता। हला, केवलं लावण्यमयी छाया त्वां नमुञ्चति।

इन्दुमती (सव्यङ्ग्यम्) सत्यम्। छाया केवलं मां नमुञ्चति। सर्वेऽन्ये ...... (स्मितं करोति)

माया व्रणयसि मामार्ये, कोदोषः येन स्वात्मानंकुत्सयसे।

इन्दुमती नाहं कुत्सये स्वकर्म, किन्तु पवित्रकर्मण्यपिदोषं व्याहरन्ति नीवीवादे न्यायविदः।

चन्द्रचूडः तथाहि विन्यस्यन्ति न्यायस्य स्वरूपं सिद्धान्तानुसारेण।

इन्दुमती नमया (*उदरस्थं वालं संकेतेनदर्शयित्वा*) अत्याजि वात्सल्य प्रणयः मातृत्वस्य कृते । स्निह्याम्येनंसुकुमारं कुमारम् । यस्माद् यातयन्ति यन्त्रयन्ति माम् ; यः सर्वाधिकार मेवव्यपोहति तादृशधर्मस्य विनाशो निष्पद्यते शीघ्रम् । (*निःश्वस्य*)

"धूमोनिवर्त्येत समीरणेन ।
यतस्तुकक्षस्तत एववह्निः ॥"

माया (*सास्रम्*] गर्भस्थस्य शिशोः कोपराधः येन यन्त्रयति लोकः । सर्वथाऽन्यायमेतेत । अहो गर्भवती मेनां कथ कारायां प्रसह्य प्रक्षिपति प्रमत्तः समाजः ।

चन्द्रचूडः सुरेशस्य वर्तते कीदृशी दशा ?

इन्दुमती श्रुत्वा किं कुरुथो युवाम् ।

माया साम्यवादिनां कृते कठोर यातना किमर्थं निरमायि ।

इन्दुमती वलान्निरसितुं सिद्धान्तम् । सिद्धान्तस्य संग्रामे किमर्थं मिध्येते शस्त्रास्त्रम् । लोकाः स्वच्छन्दतः स्वोपकृतये यंमार्गं निरूपयन्ति तेनैववर्त्मनागच्छन्तु । किमर्थं यन्त्रयन्तिते । नहिवलान्निरस्यते सत्यम् । भवति सत्यस्यैवविजयः ।

चन्द्रचूडः (*सस्मितम्*) तथात्वे, साम्यवादप्रचलिते राष्ट्रे किमर्थं रूध्यते व्यक्तिगतस्वातन्त्र्यम् । किमर्थञ्चविभीषन्ति

तथाकर्तुं । नहि मृत्यु दण्डेन प्राप्यते परस्य सौहार्दम्।

माया हलासखि, जानामिसर्वम्।

इन्दुमती नहिजानासि प्रिये, वयंस्वल्पे कारागृहे यूयं महति कारागारे वरीवृत्यध्व एतावानेव विशेषः।

माया नहिसम्यगुपलक्षितं भवत्या । अन्यदेवाभिहित-मन्यदेवाश्रावि । सुरेशो निरामयो वर्तते नवा ?

इन्दुमती (*सास्रम्*) प्रिय सखि, जाने तव तस्योपरि विद्यते प्रणय, इति। शृणु, सोऽपि मृत्युशय्यायामधिशेते। कारायां यातनां क्लिष्ट्वा ततोऽपि यातनामये कालकोष्ठे स्थपितोऽस्ति। कालकटाक्षपतन शवलमिवशरीरमु-द्वहन्तं तं दृष्ट्वा कस्यहृदयं सहस्रधेव नस्फुटति।

माया (*सस्नेहम्*) धिक् कष्टम्। महतिदुःखे वर्तते।

इन्दुमती (*अश्रूणि प्रमृज्य*) जानीहि प्रिये, तद्दुःख मनुभवगम्य मनिर्वचनीयमिति। यत्र प्रकाशपवनायोऽपिनिरूद्धा वर्तन्ते । किंबहुना, स्वल्पे त्रिहस्तपरिमिते कोष्ठे सार्धत्रिहस्तमितं शरीरं प्रसार्य स्वप्तुं नशक्यते । तत्रैवपच्यते भुज्यते सुप्यते हग्यतेच।

माया रौरवमेव मन्ये।

इन्दुमती सम्यगधीतं तत्र गत्वा । किञ्च कारास्थिताः सर्वे दोष-रहिता इति संमानयामि।

माया (साश्चर्यम्) कथमिव।

इन्दुमती (सोद्वेगमुच्चैः) सर्वकारौबीजं वपति पत्राणि लुनाति च कीदृश माश्चर्यम्। शाखासु समुत्पन्नोनि पत्राणि लवित्वा कथं वृक्षं पत्रपुष्परहितं कर्तुं शक्यते। वृथाप्रयाशोऽयम्।

माया व्याकुरु विवक्षितम्।

इन्दुमती कारागृहे चौराः, व्यभिचारिणः राजद्रोहिणः परहिंसका विद्यन्ते वहिस्तेषां कृते दण्डोविहितो न्तस्तत्त्वमनधिगम्य। किं कुर्वन्तु तेवराकाः क्षुधाज्वालाशान्तये चौर्य्यनिरताः केचन, परस्परयोः प्रणयपरिपाको दर्काद् व्यभिचारिणो विहिताःकेचन, अन्यायावलोकनासमर्था संजाता राजद्रोहिणो वहवः, अज्ञानाच्छिक्षाया अभावात्, क्षुद्रस्वार्थेपहताः क्रोधान्धा परहिंसकाश्चकेचन तत्रमया समुपलब्धा। तत्रगत्वा निवृत्ताः के नाम विद्रोहिणो नभवेयुः। वद विदुषि, कस्यदोषोऽयम। यदिनामाऽशिक्षया वुभुक्षयाच परिपीडिता ते नभवेयु स्तदा किमर्थ मपराद्धाः स्यु। कुत्रगत्वा व्यवहारः क्रियते। धिक् कष्टम्।

चन्द्रचूडः भामिमि, त्वमेवंभण, गणतन्त्रे राजवन्दिनः नतथा, निर्यातयन्ति यथाधिनायक शासने साम्यवादे। तत्र

कारायां गत्वा न स पुनरावर्तते। गणतन्त्रे ऽस्मिन् बहुवारं गत्वा पुनः प्रतिनिवर्तन्ते । राजद्रोहिणो नतथा निर्यातयन्ति यथा विकत्थसे। सुरेश मुग्रवादिनं मत्वा निर्यातयति शासकः।

माया साम्यवादमूर्धन्यस्थिते रूसदेशे राजद्रोहिणं!सूदयन्त्येवेति शृणुमः।

चन्द्रचूडः नहि सर्वे सर्वोदयं समीक्षन्ते महात्मनो गान्धि-महोदयस्य सिद्धान्तं सर्वोदयं सर्वजनहिताय सुखायच प्रभवति।

इन्दुमती (सेर्ष्यम्) अलं बहुविकत्थ्य, प्रतिक्रियावादं वयं नस-मर्थयामः । देशप्रेम राजद्रोहश्चैकाया मुद्राया नीचोर्ध्वस्थितमङ्कं संभावयतु महानुभावः।

माया नचात्रावयो विरोधः सत्यं किलै तत्।

इन्दुमती तथाहि, येषां हस्ते देशस्य भाग्यनिर्णयकारिणी शक्ति र्विद्यते ऽधुना ये राष्ट्रकर्णधारा वर्तन्तेते प्राग् वन्दिन आसन्।

माया शोचनीया दशा वर्तते सुरेशस्य कथं प्राणिति।

इन्दुमती (दीर्घनिः श्वस्य सास्रम्) अनशनशायिन हृदय स्थितजीवनाशस्य यस्यमरणं प्रकृति र्विकृति र्जीवितम्।

माया — हा धिक् । अनशनायति । प्रेषय संदेशं हठं विमुञ्चेति ।

चन्द्रचूडः — महात्मनः सिद्धान्तं समाश्रयति । गान्धिमहोदयस्य मतं सर्वजनहितं भवति ।

इन्दुमती — (*सास्र मूर्द्धमवलोक्य सनिर्वेदनिःश्वस्यच*) मृत्युः पार्श्ववर्ती, किमर्थं विचालयामि सिद्धान्तात्तम् । तथाहि 'कृष्यांदहन्नपि खलुक्षितिमिन्धनेद्धोबीजप्ररोह जननीं ज्वलनः करोति ।' (*रोदिति*)

माया — (*सवाष्पकण्ठम्*) पश्य प्रिये, रमा प्युपरता, तस्यैषा कन्या । त्वया यथोपादित मुपन्यासे संजातं तथैव ।

इन्दुमती — (*संस्मृत्य*) ममोपन्यासस्यान्तिमाध्यायं पूर्णं कृत्वा प्रकाशमानयतु भवती । (*अवशिष्ट मेकं नासिकाभरणं निष्काष्य ददाति*) विक्रीय प्रकाशनव्यय मुपकल्पय ।

माया — प्रियसखि, स्थाने नियोजयावशिष्टमाभरण मेकम् । त्यजभद्रे रुप्यकस्य चिन्तां यथाकथञ्चिदुपसंहरामि । (*बलादेव नासिकायांमलंकारयत्याभरणम्*)

(*परिचारिके आगत्येन्दुमतीं सोध्यन्त्यर्थं नयत; शनैः शनै र्मायाच पृष्ठे गच्छति*)

चन्द्रचूडः — (*मन्दंमन्दम्*) पावकस्य महिमा सगण्यते ।
कक्षव ज्ज्वलति सागरेऽपियः ॥

(*मुहुर्मुहुः पठति*) धन्यवादार्हौ द्वावेव । (*पुनः पठति*)

"विकारहेतौ सतिविक्रियन्ते
येषांनचेतांसि तएव धीराः ।"

(बालिका रोदिति, तस्यै दुग्धं पाययति, तत्पश्चात् औषधं पाययित्वा इतस्ततःकोष्ठे परिभ्रति । सवाष्पनयना माया समागच्छति ।)

माया (ताम्यता चेतसा संभ्रमम्) प्रिये, किं प्रसूतवती ?
(मञ्चे स्थित्वा सवाष्पगद्‌गदम्) हा ! धिक् ! शल्यकर्मणाव्यापादितो बालः ।

चन्द्रचूडः (सखेदम्) आः किमाहात्र भवती मारित शिशुरिति ।

माया (सास्रम्) चिकित्सिकया शस्त्रं प्रवेश्य...... ...(वक्तुं नशक्नोति)

चन्द्रचूडः (निःश्वस्य) धिक्दैवम् । यंसमवलम्ब्य यस्य सुखं प्रकल्प्य, यं समाजं निर्मातुं बालक मेनं वरदान मिति व्यमृक्षत् तमपि लुञ्छति विधिः (सास्रमास्ते)

माया अपराधं कलयामि चिकित्सिकायाः । समयाभावे साऽत्वरत् ।

चन्द्रचूडः भवतु । मातरि जीवतिसत्यन्यो बाल उत्पस्यते । स्त्रीणां जीवन मरणावस्था प्रसववेला ।

माया (निःश्वस्य) मातयपि वर्तते मे संदेहः । कवलीकृत भिव रोगशोकाभ्यां स्वास्थ्यमासीत । बहुकाल पर्यन्त-

माभिः कृता शल्यक्रिया। मूर्च्छितैवासीत। (रोदिति)

चन्द्रचूडः (सोद्वेगम्) अब्रह्मण्यम! हंहो!! निमज्जतीव रसातले कल्पित समाजः।

माया (सवाष्प गद्गदम्) चिकित्सकालये पर्याप्तं नविद्यते भेषजम। मदिरां समीहतेस्म चिकित्सिका, किञ्च नास्तीति परिचारिका प्रावोचत्।

चन्द्रचूडः (सोद्वेगम्) प्रिये, माये! विना धारं मुन्मत्तवद् भवानी ति संभावयामि।

माया (सास्रम्) नलक्षयामि कर्तव्यकर्मणोरेखोमात्रमपि किं करोमि, क्वागच्छामि।

चन्द्रचूडः (सदैन्यम्) शक्तिर्न विद्यते। ईश्वरः शक्तिहीनाय यद् ज्ञानं ददाति तत् वरदान स्थाने संजायतेऽभिशापः। हृदयेऽहर्निशमन्तर्द्वन्द्वो दहति, देशार्थं जीवितस्थिति र्नकस्यापि वर्तते स्वल्पः स्वार्थः सर्वत्र सङ्कच्छते।

(इन्दुमतीं समानीय तत्रैव समीपस्थितशय्यायां शाययित्वा परिचारिके गच्छतः)

माया भगिनि, कादृशाऽस्या आशा विद्यते नवा?

एकापरिचारिका हुम। (उत्तर मदत्वैव गच्छत उभे)

चन्द्रचूडः (सवैलक्ष्यम्) कीदृशी विडम्बना। (किञ्चित्कालान्तरं तृष्णाया इन्दुमत्या समीपंगत्वा निभालयति) हा

धिक् ! कीदृशी प्रतारणा (आक्रोश्य) मृतामेनां शय्यायां स्थापयित्वा······(नासिकायां निश्वासंनिभोल्य) नश्वसिति नचस्पन्दते । माये, माये, मृता ······इन्दुमती······

माया (रुदित्वा) हाधिक् पञ्चत्वंगतेन्दुमती·········प्रिये, कथमेकपदे गतासि (विलपति) सखि करुणाभिमुखेन मृत्युना हृतंसर्वं समाजस्य (सर्वत्र विलोक्य) निष्ठुरं लोकं पदा ताडयित्वा पलायितासि ।

(करुण स्वरेण रोदिति)

चन्द्रचूडः (सखेदम् सास्रम्) मारयित्वा दोष निर्मुक्तये शवमत्र संस्थाप्य विप्रलभन्ते । (दन्तैर्दन्तान् संघट्य) मानवानां जीवने वानर्य्यं उत्प्लवन्ते । भवतु । गत्वा निवेदयामि ।

माया यदि सुयोग्यो भवेदधिकरणाध्यक्षस्तदा कथं नाम माद्यन्ते । सर्वत्रसमाजे नास्ति व्यवस्था । (दीर्घं निःश्वसिति)

चन्द्रचूडः (सकम्पम्) एवंसति वद, किमत्र क्रियते कतम उपालभ्यते, कस्यपुर उच्चै राक्रन्द्यते हृदयदाहिदुः-खं ख्याप्यते । (उच्चैः) अधमोयं निष्ठुरः समाजो ऽस्या प्राणान् रुधिरञ्च पीत्वा, मांसं लुञ्छित्वा स्वात्मानं तर्पयित्वा पिशाचवत ताण्डवं नृत्यति ।

मायाः धिक्करोमि, विश्वबन्धुत्वं त्वमकल्पयः किन्त्वधुना नास्ति तव समीपे कोऽपिबन्धुः ।

चन्द्रचूडः न खल्वक्षिदुःखितोऽभिमुखे दीपशिखां सहते ।

मायाः आशाबन्ध एवैनां न्यराजिष्ट ।

चन्द्रचूडः मायें, ललाटंतपोविधिः सदैव ममललाटं लेढि । लिखितं ललाटाक्षरं नशुध्यति नवामार्जयति ।

मायाः प्रिय, मैवंभण । त्वमसि परोपकारायनिर्मितो विधिना । अस्या दाहादिकं विधेहि ।

चन्द्रचूडः सर्वं समापतित ममैव हस्ते, तापयामि चितानले हृदयम । ततोविन्दामि स्वेदबिंदून् । हा ! नप्राप्यते शवप्रावरणाय बस्त्रम् । भवतु । *(उत्तरीयं स्वस्कन्धान्निष्कास्योच्छादयितुं मुखमिन्दुसत्या उन्नमयति)* अहो ! सर्वास्ववास्थास्वनवद्यताऽस्य सौन्दर्य्यंमयरूपस्य । *(रुदित्वा तस्या मुखमाच्छादयति)*

माया श्रुत्वेदं किंकरिष्यति सुरेशः स्वात्मानमुज्जासति वा । *(अश्रूणिप्रमृज्य)* अस्या ईदृशोऽयंपरिणामः । अनया ध्वन्वनि चातकायितम् । अये ! परावृत्तभागधेयानां दुःखं दुःखानुबन्धि ।

चन्द्रचूडः *(सास्रम्)* अनेन परिणामेन किंभविष्यति कोजानीते । अतिद्रुतवाहिनी चानित्यतानदी ।

माया किंभवेत् सुरेशस्य परिणामः । अपुनरावर्तिनीं गतिं श्रुत्वाप्रियतमायाः सुरेश रूदित्वा रूदित्वा ताम्यता चेतसा किंनिर्वर्तयंति । यद्वा निराशया सञ्ज्ञपयत्यात्मानम् ।

चन्द्रचूडः यद्वा दृढ़ीभूत्वा, भित्त्वाकारां हत्वाकर्तव्यं, त्रुटित्वा समाजशृङ्खलां विक्त्वा नीवीवादं जिगलिषति वा सर्वं समाज मेव को जानीते ।

माया अलमुक्त्वा । नात्वा कुरुभस्मावशेषा मेनाम् । किमर्थं विलम्बसे । (निश्वसिति)

चन्द्रचूडः (निश्वस्य) सत्यम् । प्रिये, सकललोक कवललेहलम्पटा लेढि लोहिताचिता चिताङ्गारकाली कालरात्रि जिह्वा जीवितानि जीविनाम् ।

राजपुरुषौ (प्रविश्य) शवः कुत्र वर्तते भो ।

चन्द्रचूडः (साञ्जलिः समभ्यर्थयते) नाहं प्राप्नोमि किं मृताया अस्या कलेवरम् । देहि भो मह्य मनुगृहीस्वभो । किं मृताया शरीरमपि पराधीनं भवति । (अश्रूणि विसृजति)

राजपुरुषः तुभ्यंदातुं न वयं प्रभवामः नसमधिगता राजाज्ञा ।

माया धिक् धिक् (वहुवारं धिक्कारं विधाय वक्षस्ताडयित्वा ऽतिचिरं करूणकाहलेन स्वरेण रोदिति)

(चन्द्रचूडस्तूष्णीं शवं निर्दिशति)

(ततःससंभ्रमेको जटिल उन्मत्तवत् प्रविश्य चन्द्रचूडस्य पादयोः पतति)

चन्द्रचूडः (सनिर्वेदं संस्मृत्य) आः कस्मात्त्व मद्य मुरारे !

मुरारिः अकारणबन्धो, नीचमाततायिनं मां दयस्व, मच्छदृशः पापिष्ठो जनो जगत्यां नवर्तते। त्राहिमाम् किं नाम मया नाकारि? सती:प्रियतमा मया मारिता, इन्दुमत्या चेदृशीदशा मया विहिता, प्रियवर प्रतिशोधभावनया यद्यद् विहितं तत् सर्वं प्रायश्चितेन पराकरोमि। (रोदिति)

चन्द्रचूडः (उत्थाप्य) दार्शनिकोऽसि । सर्वं विस्मृत्य तमेव शरणं गच्छ सर्वभावेन।

मुरारिः (साञ्जलिः) तव सर्वं कार्यं मह्ं सम्पादयामि तव सर्वं भारं मह्यं देहि। त्वं मायाया पाणिग्रहणं कुरु मम वाञ्छां परिपूरय। जानेत्वाम् कर्तव्यपरायणं जनन्। (पादयोः पतति)

(चन्द्रचूडः सास्रं स्तूष्णी मास्ते मायाया वदनं विकसति पुरुषाः शवं वहिर्नयन्ति, जवनिकापतति)

इतिसप्तमोऽङ्कः

समाप्तं शुभम्

संवत् २०११ भाद्रमासस्य २५ गते, भाद्र शुक्ल त्रयोदश्यां, शुक्रवासरे संस्कृत प्रसारिणी समितेस्तत्वावधाने संजात संस्कृतज्ञसंमेलनावसरे प्रदर्शितम्; तथा संवत् २०११ आश्विनमास ५ गते आश्विन कृष्णदशम्याँ मङ्गलवासरे पूर्वाह्ने ६।६ वादनसमयात् ६।५७ वादनसमयपर्यन्तं नेपालाकाशवाणी द्वारा (नेपाल रेडिओ) प्रसारितम् परिणाम नामधेयं नाटक मिदमत्रप्रस्तूयते ।

तस्मिन् नाटके यैःसक्रियं कार्यं कृतमासीत् तेभ्यो धन्यवादान् दत्त्वा तेषांनामानि कृतज्ञता प्रदर्शन पूर्वकं नीचैः प्रदीयते ।

लेखकः–श्री प्राध्यापकः चूडानाथ भट्टरायः सर्वदर्शनाचार्यः ।
(नेपालराजकीय संस्कृतमहाविद्यालयीय आचार्यः)

निर्देशकः–श्री पण्डितः तोयनाथ पाण्डे सिद्धान्तज्यौतिषाचार्यः
(ने. रा. सं. प्र. पाठशालाध्यापकः)

पथिकोक्तगीतिकारः श्री पण्डितः गोविन्दप्रसाद भट्टरायः साहित्याचार्य ।
(ने. रा सं. प्र. पाठशालाध्यापः)

पुरुष पात्राणि

चन्द्रचूडः गणेशवल्लभः (शास्त्रिप्रथम खण्ड) संस्कृतमहाविद्यालयीयश्छात्रः ।

मुरारिः मधुसूदनशर्मा (शा. २ खण्डः) संस्कृतमहाविद्यालयीयश्छात्रः ।

गिरिशः केशवराज दीपकः (शा. १ ख.) संस्कृत महाविद्यालयीयश्छात्र।

सुरेशः रामकृष्ण विमलः (पूर्वमध्यमायाःप्रथमखण्ड) सं. प्र. पाठशालीय श्छात्रः

गोपालः मणिराम (शा २ ख) संस्कृत महाविद्यालयीय श्छात्रः।

गायकः बलदेवः (शा. १ ख.)संस्कृत महाविद्यालयीयश्छात्रः।

मृदङ्गवादकः झंकेश्वरः (शा १ ख)संस्कृत महाविद्यालयीयश्छात्रः।

स्त्री पात्राणि

रमाः (मुरारे पत्नी) इन्दुदेवी (प्र. २ ख.) नारीविद्यापीठस्य छात्री।

इन्दुमतीः (गिरिशस्यभगिनी) रोहिणी (प्र. ३ ख.) सं. प्र. पाठशालीय श्छात्र

शम्पोः (गोपालस्य भगिनी इन्दुदेवी (प्र. २ ख.) नारीविद्यापीठस्यछात्री।

मायाः (इन्दुमत्याःसखी) रामप्रसादः (पू. म, १.ख.) सं. प्र. पाठशालीय र श्छात्रः।

'परिणाम' नामध्येयस्य नाटयस्य यो भागः परिस्कृत्य प्रदर्शितः श्रासीत् सएव पुनरत्र भवतां बोधार्थं लिखति

विदुषां विधेयो लेखकः—

चूडानाथ भट्टरायः

नान्दी)

ज्वलिते चैतन्यदीपे, उदिते मधुर प्रकाशे
संसार सारभूते स्फुरित सत्य विकासे।
मधु विषयमयि हे स्वर्गीय नादमयिरे
आगच्छदेवि, वरदे जीवनतत्व विहारे ॥१॥

वीणा क्वणन प्रवृत्ते, भाव प्रकटितनृत्ये
कोकिला लापगीते, सत्यसौन्दर्य पीते
मधुरलास्य मयिहे स्वरसार मयिरे
आयाह्नि देविवरदे ललितकला कलिते ॥२॥

विश्ववैभवभूते शिवसंकल्पगीते
प्रणयसमुल्लसिते स्नेहसमुज्ज्वलिते
प्रेमरहस्यमयिहे स्वप्नसंसार मयिरे
आगच्छदेवि वरदे चितिसर्वस्वसारे ॥३॥

(नान्द्यन्ते)

सुत्रधारः (प्रविश्य, परितोविलोक्य) प्रिये, सज्जीभूताः सभ्या विलम्वं माकुरू।

नटी (नपेथ्ये) अत्रापि सर्वे सज्जीभूताः (नेपथ्येकलकलः)

सूत्रधारः (निरूप्य) परिवर्तिनिसमाजे परिणामनमधेयं नाटकं विरच्य, तात्कालिकी सामाजिकस्थिति कविर्दशयति। चूडानाथभट्टरायस्य तदेव नाटकं प्रस्तूयते। (सवितर्कम) संसार एव दुःखान्त इति निर्दिशतिकविः सत्यं, नवीनमार्गेणगतः सकविः। भवतु। दृश्यकाव्ये दर्शनपर्याप्तं मन्ये। (अन्जलिंबद्ध्वा) संभावयामि गन्तुम। (निष्क्रान्तः)

(पूर्वार्धविसृष्टतल्पःदृश्यतेचन्द्रचूडः)

चन्द्रचूडः (स्वगतम्) मुरारिणा बलादानीतः अस्मि। रोगेण आक्रान्तः अहम्। रमा अहोरात्रं परिचरति। तस्याः प्रत्युपकारं कृत्वा मर्तुम् इच्छामि। (निश्वसिति) (रमा हस्ते कटोरीं गृहीत्वा कपाट मुद्घाटय प्रविशति)

रमाः (परिक्रम्य) आर्य, किमितिखिद्यसे। रोगेण त्यक्तः असि इतिवैद्यः अवदत्। वमनं कृतं प्राक् इति मण्ड पत्त्वा आनीतं विद्यते पिव। (कटोरीं ददाति)

चन्द्रचूडः आयुष्मति, क्लेशं सहसे (कटोरीं गृहीत्वा पिबति) बुभुक्षा नास्ति तेन भोक्तुं नइच्छामि (पीत्वावमति)क्षमस्व

रमा (शून्यमवलोक्य) आर्य, क्षुधाया अभावे अपि पथ्यं ग्राह्यम्। अन्नमया हि प्राणाः। किमर्थं वितर्कयसि। सत्येन शपे सुश्रूषा मां नदुःखयति। सेवाधर्मः मनुष्यं सुखयति।

चन्द्रचूडः आर्ये, विषादं मा गा, (निःश्वसिति)

रमा (अश्रूणि विसृज्य) नहिमां विश्वसिषि। त्वद्विधानां पीडा पीडयति सकलं भुवनकोषम्। (रमासंमार्जन्या कोष्ठं संमार्जयति)

चन्द्रचूडः रमे, गच्छ ओदनपाकाय।

रमा (सहर्षम्) क्षुध्यति भवान्। ज्वरोद्वेग अपगत इति विचारयामि। समाप्य संभार्जनं गच्छामि।

चन्द्रचूडः (सस्मितम्) मनसा स्निह्यति अत्रभवती।

रमा बुद्धं सर्वम्। तस्यकृते प्रेरयसि। अकाले श्रपितं प्रतीक्षितञ्च भक्तं स्वादुतरं नभवति। तिक्तापरिचर्या भवन्तं तापयति। गच्छामि। (गन्तुमिच्छति)

चन्द्रचूडः (सान्त्वयित्वा) रमे, तवमर्यादा क्षुधितं मे मानसं तर्पयति। तववाणीं श्रुत्वा कोनाम विमनायेत। तव प्रेरणायां सत्यं प्रेम प्राप्नोमि। स्व प्रक्रियया मर्त्ये मण्डले स्वर्गं कर्तुं मवतीर्णा असि देवि!।

रमा (सलज्जम्) चन्द्रचूड, हृदयैकबन्धो, त्वत्तः स्तुतिं श्रोतुं नाहं वाञ्छामि। किमर्थं सदा सन्तप्त इव

उदासीन इव दृश्यसे।

चन्द्रचूडः (विहस्य) अस्मिन् समाजे वसतः मे मनोरथा व्यलीयन्त।

रमा (सास्रम्) नमां विश्वसिषि।

चन्द्रचूडः (सस्नेहम्) वत्से चिरं परीक्षिता असि। दुःखाग्नौ पतिता सुवर्णमिव कान्ति मावहसि, तृणमिव भस्म सात् नभवसि।

रमा (अश्रूणि विमुच्य) स्त्रियः शोकस्य विषय इति जनाति भवान्।

चन्द्रचूडः (सखेदम्) वासु, दुःखदग्धानां भूति अमङ्गला अप्रशस्ता, निरूपयोगाच भवति। हृदयस्थितं काल-कूटं वान्त्वा त्वामपि दग्धुं न इच्छामि।

रमाः ममोपरि एषा करूणावा निष्ठुरतावा। अथवा गृहं स्मरति।

चन्द्रचूडः (संस्मृत्य) वत्से, अत्रैव गृहबुद्धिं करोमि। पुनरेवंन-वक्तव्यम्।

रमाः (सभयम्) आर्य प्रसीदतु।

(रमादिशोऽवलोक्य निष्कामति चन्द्रचूडः प्रावरणेन मुखमाच्छाद्य हृदयेकिमपि मन्त्रयते मुरारिः प्रविशति)

मुरारिः (भर्त्सयन्) अरे, प्रावरणेन मुखमाछाद्य कति व्यथसे।

पुनः पुनः दैवोपालम्भेन किं भवति । श्वः अन्यंचिकित्सकमानेतास्मि ।

चन्द्रचूडः (प्रावरणमपसार्य) सखे, मुरारे, मृत्युस्तु सदैव प्रार्श्ववर्ती भवति । प्रिय, पाश्चात्यचिकित्साकानां बहुव्यय साध्यासरणि विद्यते । तामनुगन्तुं निर्धना वयं नशक्नुमः । अस्मिन् विषये पूर्वेद्यु र्मायया सार्धं विवादमकरवम् ।

मुरारिः (साक्षेपम्) प्राणरक्षणान्नपरं पुण्यं जगति गीयते किं श्रोत्रंपिदधासि । साहसं त्यज ।

चन्द्रचूडः केन अध्यगायि शास्त्रं, लोकं प्रतार्य चिकित्सकाः स्वच्छन्देन प्राणोपरि खेलन्ति । को व्यवसति स्वकर्तव्ये

मुरारिः सत्यम् कुत्रापि व्यवस्था नास्ति ।

चन्द्रचूडः धनिक निर्धनेषु महती विभिन्नतां दर्शं दर्शं कस्य हृदयं नव्यथते ।

मुरारिः महामात्रैः विचारणीयेऽस्मिन् राष्ट्रिय विषये अस्माभिः साफल्यं कथं प्राप्यते । सदैव ताम्यसि अनयादिशा ।

चन्द्रचूडः (सस्मितम्) ज्ञानस्य प्रकाशः यदा हृदयान्धकारमपसारयति, तदाते ते मार्गं स्वयं निर्दिशन्ति ।

मुरारिः (सखेदम्) दरिद्राः पठनाय समयमेव नलभन्ते, कथं बहु व्ययसाध्यमध्ययनं कुर्वन्तु ।

चन्द्रचूडः (सदैन्यम्) प्रजातन्त्रे अधिकारस्तु सर्वैः प्राप्यते ।

सत्यम् । को बहु नमन्येत कल्याण रूपमीदृशं संकल्पम् । परन्तु, देवि, स्वतन्त्रते ! निर्धनस्य हेतो र्न निर्मिताऽसि विधिना ।

मुरारिः आम् । प्रजातन्त्रस्याधारीभवति विद्या, यदि प्रजाः अशिक्षिता भवेयु स्तदा मूर्खैः कथं संचाल्यते संसद् ।

चन्द्रचूडः ग्रामीणानां दशां दृष्ट्वा मे हृदयं सहस्रधा स्फुटति । महत्करुणं वर्तते । (सास्रं तूष्णी मास्ते)

(कपाट मुद्घाट्य माया प्रविशति)

माया (दूरादेवावनतेन मूर्द्धा प्रणमति) वन्दे ।

मुरारिः (आसनं निर्दिश्य) इदमासन मास्यताम् ।

माया (लम्बपटस्यप्रान्ते वसति) (संस्मृत्य) रोगस्तु अपगत इव विचारयामि ।

चन्द्रचूडः स्यात् ।

मुरारिः माये, बी. ए. परीक्षाया मुत्तीर्य किंत्वयादिश्यते ।

माया नजाने, पिता कस्मिन् कर्मणि नियोजयति ।

मुरारिः अधिकरणस्थानं समलंकृत्य तस्मात् पुरुषवर्गं गलहस्तयन्ति । सर्वाः स्त्रियः पुरूषायितु मिच्छन्ति । (हसति)

माया (सखेदम्) स्त्रीणामिमा मवस्थां विलोक्य किं विद्वां-

सोविहसन्ति। नराणां नार्य्य एवमातरः मातृदेवो भवेति भगवती श्रुतिरूपदिशति। मातृजाति नियन्त्य केनापि राष्ट्रेण महत्वं गौरवञ्च नासादितम्।

चन्द्रचूडः कुलकुमारि, सत्यमेव जटिला समस्या। पाश्चात्य-देशे विषमा समस्या समुत्पन्ना इति श्रूयते। तथैवा-त्रापि किं भवतु।

माया महत्यां दुरवस्थायां वयं स्मः। स्त्रीणां किं लक्ष्यं तन्निधरिणीयम्।

मुरारिः कैर्निर्धायते ?

चन्द्रचूडः माये ! नारीभि रेव निर्धारणीया स्वविषयाः।

माया पञ्चदशवर्षाद् प्रागेवोपयच्छते। का विचारयतु।

चन्द्रचूडः (संस्मृत्य) आङ्गलभाषा अस्माकं स्वार्थं न साधयति

मुरारिः (विहस्य) ज्ञाने द्वैविध्यं नभवति, संस्कृतस्य ज्ञानमन्यदेव, आङ्गल भाषायाः ज्ञानमन्यदेव। भाषायां ज्ञानं सीमितं नभवति। सत्यम्। "नहि-ज्ञानेनसदृशं पवित्रमिह विद्यते।"

चन्द्रचूडः नाहं विवादं करोमि। किन्तु, ज्ञानमपि संस्कृते रनुरूपं भवति। आङ्गलसंस्कृतिः स्त्रीस्वातन्त्र्यं पुष्णाति। आर्यसंस्कृतिः स्त्रीणामुच्छृङ्खलतां गर्हयति।

मुरारिः भद्रे ! प्रायः तरुणीषु लोकः सौहार्दं कुरुते। परन्तु

स्त्रीशिक्षा कया रीत्या स्वसंस्कृति हिता भवति. एतानि कैरपि न विचारितानि।

चन्द्रचूड: मेकालस्य दूरदर्शिता सफलीभूता । सिद्धस्तस्य मनोरथः।

माया कथमिव ?

चन्द्रचूड: एतादृशीं परीक्षा प्रणालीं निर्माय, आङ्ग्ल भाषायाः महत्त्वं विधाय, परीक्षा मुद्रालयात् समानाकारा एक-परिमाणा मुद्रा इव स्नातका ! तेन निस्कासिताः। वृत्तिमप्राप्य ते सर्वे परतन्त्राः सर्वकारस्याधिकारणे स्थानं समीहन्ते। स्वानुकूल शासनं चालयितुं ते कर्मकराः स्थाने यन्त्रवत् संयुज्यन्ते।

मायो (सवितर्कम्) यदि परीक्षा नभवेत् योग्यता कथमवबुध्येत। सर्वत्र परीक्षा प्रणाली प्रचलिता स्ति।

मुरारिः सत्यम्। किञ्चात्र कीदृशी स्तत कीदृशा विद्वासः संजायन्ते विचारणीयोऽयंविषयः। इङ्गल्याण्ड देशे सर्वे साक्षराः सन्तिन्यथा चात्र निरक्षर महाचार्याः आङ्ग्लैः स्वराष्ट्र भाषायां शिक्षा प्राप्यते।

चन्द्रचूड: क्षुब्धं वातावरणं विलोक्य मनसि महती आशा समुदेति।

माया अर्थशास्त्रस्य राजशास्त्रस्य तथा विज्ञानस्यापि ग्रन्थाः

भारतीय वाङ्मये नविद्यन्ते।

मुरारिः विज्ञानप्रकाश चाकचैक्यात् भ्रान्त्या तान्प्रत्यत्यधिक मन्धविश्वासं कृत्वा स्वविवेकशक्ति त्यजन्ति।

चन्द्रचूडः विज्ञाने आङ्गलैः सह स्पर्धां कर्तुं मार्या नशक्नुवन्ति। किन्तु विज्ञान मेकेनैव देशेन स्वायत्तीकृतं नहि। यदि अन्यदेशीयैराविष्कृतं विज्ञानं स्वभाषासु आङ्गलैरनुवादं क्रियतेचेत् स एवमार्गोऽस्माभिरनुसरणीयः।

माया कुत्र प्राप्यते धनं तथाकर्तुम्।

चन्द्रचूडः सप्तदशवर्षात् पूर्वं यदि रूस स्तथैवा शङ्केत, तदा तस्य वाङ्मये परमाण्वस्त्र निर्माण प्रक्रियायाः पुस्तकं कथं प्रभवेत्। (*सगर्वम्*) अस्माकं समीपे द्रव्यस्य न्यूनता नास्ति।

मुरारिः पञ्चकोटि संस्थाका फ्रांन्सीयाः सर्वोच्चंवाङ्मयं स्वभाषायां संपादयन्तिचेत वयं कथं तूष्णीं निवसेम परमर्षिभि स्तपस्तप्त्वा या आराधिता भारती स्वतन्त्रदेशे कथं सा लुप्येत, यस्याममरभारत्यामार्याणां मस्तिष्क सर्वस्वं वर्तते।

माया (*सप्रणयं स्वगतम्*) किमर्थमद्यमे हृदयं मनोविकारं भाववैलक्षण्य मापद्यते। कथमिव किमिव कलयामि।

चन्द्रचूडः (*स्वगतम्*) प्रथमदर्शनादारभ्य पर्युत्सुक इवास्मि।

(प्रकाशम्) सेवाधर्मे शरीरं कथं सहरसि ।

माया (सकटक्षपातम्) सेवा सुख मार्द्रयतिमे हृदयम् ।

मुरारिः बाढम् । समाजे जजन्मो वयम् ।

चन्द्रचूडः (सस्नेहम्) वत्से, किं कुर्वीय लोकोमामभ्यर्थयते ।

(माया घटीयन्त्रं विलोक्य, समुत्थायपरावृत्य सानुरागं चन्द्रचूडं विलोक्य प्रणम्य च गच्छति) (जवनिकापतति)

(पथिको गायति)

सत्यः सुमार्ग एकोयं लोकोपकार संचारः ।
सततं जगति भवेतमाम् लोकोपकार संचारः ।।
संसरणानां तूपकृतिसाराज् जगदीशोऽपि संतोषं गच्छेत् ।
दिवि भुविकीर्तिरमलास्याद्भो भुवि संचिनुसुकृतसमूहम् ।। सत्य०

(गिरिशस्य सुसज्जीकृतंकोष्ठम्)

गिरिशः (पुस्तकं परित्यज्यलिखति, अग्रतः सुरेशंमवलोक्य) अयि वयस्य, स्वागतम् । बह्वोः कालादागतोऽसि सुरेश । अद्य-कस्मात् त्वम् । (आसनं निर्दिश्य) इदमासनमास्यताम्

सुरेशः (उपसृत्य) सखे, गिरिश, आधि व्याधिना ग्रस्यते शरीरम् । भवान् कं प्रबन्ध महोरात्रं प्रायः लिखति ।

गिरिशः (प्रसार्य चक्षुषी) अर्थशास्त्रे प्रबन्धमेकं गुम्फितु मुद्यतोऽस्मि, शक्ष्यामि नवा ।

सुरेशः अर्थशास्त्रे भवान् निपुणोऽस्ति । आर्थिक संघर्षस्य

एषकालः ।

गिरिशः (संस्मृत्य) सर्वं समाप्य संशोधनाय इन्दुमत्यै दास्यामि ; प्रतिलिपिं सैव करिष्यति ।

सुरेशः युज्यते । इन्दुमती विदुषी प्रगल्भाच, सासर्वं विवेचयति ।

गिरिशः तस्याः सखी मायापि प्रबुद्धा पण्डिताच । मायायाः पिता प्रख्यात श्चिकित्सको विद्यते ।

सुरेशः स्त्रीशिक्षां समुन्नेतुं स इच्छति । पुत्रपुत्रीषु समानव्यवहारिणो विरला भवन्ति ।

गिरिशः शम्पा माययोर्मध्ये कतरासुन्दरी, सत्यं भणतु भवान् । (विचार्य) शम्पा द्वादश वर्षे विधवा संजाता, मायापि कुमारी । रूपेण द्वे एव विनश्यतः ।

सुरेशः द्वे एवानाघ्रातपुष्पे (हसति) 'स्त्रीष्वनर्गल चेष्टासु-कस्येच्छानोपजायते ।'

गिरिशः (विचिन्त्य) रमाचन्द्रयो र्वधमाने प्रेम्णि शलभायते माया अथवा भ्रातृ भगिन्यो रित्रसंबन्धः स्यात ।

सुरेशः कथं कल्पते युवकयो र्भ्रातृभगिन्यो रिवैष संबन्धः । शङ्कते मे हृदयम् ।

गिरिशः साक्षात् पतिं मुरारिं विश्वसिति चेत वयं कथमन्यथा संभावयामः; स्निग्ध-मुग्धाहि सत्स्त्रिय इतिश्रूयते ।

(मायेन्दुमत्यौ प्रविशतः)

सुरेशः (साश्चर्यम्) माये, अद्यकस्मात ?

गिरिशः इन्दुमति, एनां संगृह्य कुत आनयसि ?

इन्दुमटी आमन्त्रिताऽस्ति। (मन्दंपरिक्रम्य उपविशतः)

सुरेशः कस्यहेतो : ?

गिरिशः एम्. ए. परीक्षायाम् मे भगिनी समुत्तीर्णा। अद्य-भोजनं कारयति परिचितान् सखीन्।

सुरेशः अन्ये केके निमन्त्रिताः। शोभैव मुद्रिता भवति सभाया मुरारिणा विना। नसा सभायत्र नचास्ति वादः।

गिरिशः चन्द्रस्तु रूजा परिभूत इति विमृश्यनाहूतः ?

माया स्वस्थ शरीरः संजातः।

सुरेशः ज्ञातवती कथमत्रभवती ?

इन्दुमतो शश्वत् तत्रगच्छति।

गिरिशः (सस्मितम्) चिकित्सकस्य पुत्री रोगिणां गृहे गन्तुं प्रभवेत।

सुरेशः तं कीदृशं मनुते।

माया (सस्मितम्) ननु प्रवातेऽपि निष्कम्पा गिरयः।

सुरेशः चन्द्रादमृतमित्यत्र किमाश्चर्यम्।

माया सत्यम्।

गिरिशः (स्वगतम्) अलमनल्पजल्पनेन। (प्रकाशं, पुस्तिकां

गृहीत्वा) भगिनि, पुस्तकं समीक्ष्य दोषजातं निराकृत्य प्रतिलिपिं कर्तुं त्वां निवेदयामि । स्वेनैव कर्तुं समयाभवो विद्यते ।

इन्दुमती ममापि समयो नास्ति । तथापि प्रयतिष्ये ।

सुरेशः अर्थशास्त्रे भारतीयैः संशोधनं विधेयम् । समाजस्यार्थिक्या अवस्थया परि स्थित्यनुसारं मनुष्यः समाजं सङ्घटयति । यदा विकासात् समायातो वैयक्तिक सम्पत्तिकाल स्तदा नारीनरस्य संपत्तिः सञ्जाता ।

माया (सुरेशं प्रति) श्रूयतामार्य, समाजस्य रक्षणार्थं द्वावेव तुल्याधिकारिणौ ।

इन्दुमती (*विहस्य*) कीदृशी प्रवञ्चना, यद्येवम्, आर्थिक दृष्टिकोणे ईदृशी भिन्नता किमिति भवेत् । भूय सदैव कस्यहेतो परतन्त्रता नियन्त्रयति । (*साक्षेपम्*) नारी मनेन प्रकारेण सान्त्वयन्ति । एषपिण्डितार्थः व्यक्ति गत वित्ताधारे निर्मितं समाजं नविनश्येदिति बुद्धया पतिव्रता महात्म्यं कल्पयन्ति । इतिहास पर्यालोचनया स्थित मेवम् ।

सुरेशः अहं व्याख्यामि माये, शृणु । यदि द्वौपती स्यातां तदातेन द्वामुष्यायणेन कस्य दायं प्राप्येत । तस्मिन् विवादे कागतिः स्यात । इत्थंविचार्य तादृशी व्यवस्था

कृता भवेत्। विदुषि नैतन्न्याय्यम्।

इन्दुमती हला, श्रमस्या परिगणनया यन्त्र युगे शारीरिक बले-न्यूना अपि स्त्रियः पुरुष वर्गं निरस्यन्ति।

माया (सभ्रूक्षेपम्) महान्तः समाज शास्त्रिणः स्वदेशे दाम्पत्य मधुना समर्थयन्ति।

सुरेशः (विहस्य) तत्रकिल नार्य्यः भवति प्रतिशतं परिणय-नात् प्राक स्वजीविकायै परिभ्रमन्त्य इतस्ततो दास्यं कृत्वा जीवनंयापयन्ति। विवाहंकृत्वा सन्ततिं रुरु-त्सन्ति। यद्वा वेश्या वृत्तिमारभन्ते। किमर्थं भवती तादृशं पाश्चात्याना मादर्श मस्माक मग्रे स्थापयति।

इन्दुमती सत्यम्। धनिक वर्गाणां स्त्रियोऽनुपयुज्यमानाः केवल मलङ्कारा इव शृङ्गार हेतोः संगच्छन्ते इत्यब्रवीत आदमस्मिथः।

सुरेशः किंस्विदन्यथैव माया संभावयेत्। किन्तु, आर्या-दर्शपक्षपाती कविरेव लिखितुं प्रभवेत्। "उपपन्नाहि दारेषु प्रभुता सर्वतोमुखी।"

इन्दुमती (सगर्वम्) स्त्री पुरूषयोः लिङ्ग भेदं विहाय साम्यं यदा नाद्रियते तदापर्यन्तं यातना ननश्यति। स्त्रीपु-मानि त्यनास्था एषा। (निःश्वसिति)

माया (सखेदम्)सखि,अनेन प्रकारेण लोकशोषण पद्धतिःनि

कृता नभवति। (*सगर्वम्*)आर्यनारी नशुनी सर्वैरनुगता।
भारतीयाणां संस्कृतौ "मातृदेवो भव" इत्युपलभ्यते।
(*निःश्वस्य*) प्रिये, पुरूषस्य गुणं ग्रहीतुं नारी समर्था न, नार्या गुणं पुरूषस्य कृतेऽभिशापो भवति। जीवनोपायं पुरूषाधीनं स्वीकृत्य परिवार रक्षणार्थं स्वातन्त्र्यं विसृज्य एकीभूय नारी आत्मानं पिण्डयति। अज्ञात्वैवं रहस्यमा मूलचूडान्तं परिवर्तयितुं नाहमुत्सहे।

गिरिशः भवतु। नात्रपारं गम्यते द्वौसिद्धान्तौ प्रचलत एव।

माया (*सस्मितम्*) सत्यम्।

सुरेशः हला, शम्पा विधवाधर्मं स्यात् किम्? त्वमेवभण।

इन्दुमती सा स्व सर्वस्वं कामाग्नौ जुहोति। यदि सा वर्णाश्रमेतराणां समाजे जाता स्यात् तदावैधव्ये काऽपि हानिर्नभवेत्। युवतितामन्य एव परिणयेत। सर्वत्रब्रह्माण्डे प्रचलति विधवाविवाहः।

सुरेशः सर्वे धर्षयितुं ताम् यतन्ते इति श्रूयते। धिक् कष्टम्!।

गिरिशः (*सस्मितम्*) यौवनोन्मेषे यस्याः शृङ्गारशोभा म्लायतिस्म।

सुरेशः यदि हिन्दू धर्मानुयायिभिः प्रगतिः ज्ञाता स्यात् परिणतिरीदृशी नभवेत्।

(*शम्पा, मुरारि गोपालाः प्रविशन्ति*)

(सर्वे तूष्णीं भवन्ति)

मुरारिः (प्रणम्य समन्तादवलोक्य) सहसैव किमिति सर्वे तूष्णीं भूताः (स्वगतम्) किमस्माकमेव वार्ता प्रचलति ।

इन्दुमती सखे, चिरंजीवसि, श्वशुरगृह गमन इव विलम्ब्य समागता एते इति विचारयामः ।

(शम्पा कटाक्षपातेन गिरिशं मुहुर्मुहु विलोकयति)

माया (प्रसङ्ग मन्यथाकर्तुम्) गोपाल, कतिवर्षो भवान् ।

गोपालः षट्चत्वारिंशद् हायना व्यतीताः । (मायां पृच्छति) भवती कामवस्थां श्रयति ।

सुरेशः (मध्य एव) भवेत् भगिनी कियत् वर्षा संजाता ?

इन्दुमती (विहस्य) कायुवतिः स्ववत्सर मुक्त्वा जीर्यति ।

माया शम्पे, कतिषु भवती विधवा संजाता ?

शम्पा नाहं जाने ।

गोपालः सा भूत् एकादशवर्षा, वराकी तदा काचोर्मिकां करात् निष्कासयितुं बहुविलपतिस्म ।

माया विवाहसमये वरःकतिवर्ष आसीत् ।

गोपालः स स्यात् षष्टि वर्षः ।

सुरेशः (सानुकम्पम्) शम्पायाः सौभाग्य मुन्मूलयितुं प्रवृत्तं भवन्तं लक्षयामि ।

गोपालः (सरोषम्) नमया ज्ञात्वैव भगिन्याः सौभाग्यवीजं
भर्जितम् ।

माया (सखेदम्) किं विलोक्य तस्मै अदित ।

गोपालः रूपं, वित्तं श्रुतं कुलं सर्वं विलोक्य मया अदायि ।
यस्यप्राङ्गणे ग्रामे गजा वसन्तिस्म ।

गिरिशः अधुना तथात्वे शम्पा षोडशवर्षा संजाता ।

मुरारिः वरस्य सर्वं विचारितं किन्तु वयः नसमीक्षितम् ।

सुरेशः धनंविद्यत एव ।

गोपालः (अबुद्ध्वा) सत्यम् । अधुनापि दायविभागे लक्ष-
रूप्यकाणि अस्याः हस्ते आयान्ति ।

इन्दुमती अनपत्याया अस्या वित्तं भवद्हस्ते समायास्यति ।

सुरेशः (सुसस्मितम्) प्रीयतां पूर्यतां भवान् ।

इन्दुमती तेनैव हेतुना प्राग् दत्ता भवेत् ।

शम्पा अल मनेन भाग्योपालम्भनेन ।

गोपालः तृषितोऽस्मि, जलंदेहि, पिवामि ।

सुरेशः (सहर्षम्) पिपासा शान्तये आनीयतां स्वादुमदिरा ।

गोपालः (कर्णौ स्पृशन्) शान्तं पापन् । भवतु भवतु पानीयमपि
नपिनामि ।

इन्दुमती पुरा सुरा सुरै रसुरैः भूसुरै रपि सेविता । चरकादि
महर्षिभिः सुराणां प्राशस्त्य मलेखि ।

मुरारिः (जनान्तिके) नैषा सभा पानगोष्ठी एषा। (सावज्ञम्) भवताकुत्राध्यगायि।

सुरेशः प्रागत्रैवाध्यगीषि, पश्चात् कालिकातायामपठिषम्।

(इन्दुमती जलमानीय ददाति गोपालः जलपात्रं गृहीत्वा)

(सन्निधावेव स्थापयति)

माया इतो बहुव्ययं तत्र भवेत्।

इन्दुमती सत्यम्। किन्तु प्रधानाध्यापक ताडनाभियोगान् महाविद्यालयतः निष्कासितोऽभवत्।

शम्पा (सस्मितम्) किमर्थं प्रधानाचार्यं भवान् ताडयतिस्म।

सुरेशः वस्तुतस्तु ममकोऽपि दोष स्तत्र नासीत्।

गोपालः पित्रा अध्यक्षो न प्रार्थितः ?

सुरेशः (सखेदम्) गर्भे सत्येवमयि पिता पञ्चत्वं गतः।

इन्दुमती भर्तृमरण दुःखंविसह्य माता एवास्य पितृतामकरोत्।

शम्पा भवतैव नप्रार्थितः किमु ?

सुरेशः निरपराधो जनः कथं साञ्जलिः स्वापराध मोक्षणाय प्रार्थयते।

इन्दुमती अभ्यर्थनान्तु दोषस्य स्वीकारो भवति।

माया (सस्मितम्) त्वमसि वज्रमन्दिरं दर्पस्य।

इन्दुमती सखि, अनुमान्यस्ते तर्कः।

मुरारिः (*निःश्वस्य*) जटिला समस्या, परिस्थितिश्च विकटो कःस्यात् समाजस्य परिणामः ।

इन्दुमती (*विहस्य*) माभैषीः "सत्यमेवजयते" ।

सुरेशः (*विचार्य*) कति विधा वस्था समतीत्याद्य वादान्तिके समाजो वर्तते । अतिरिक्तार्घ एव श्रमिकनीवीपत्यो युद्धकारणं भविष्यति ।

माया एकत्रीभावो भवतीव लक्ष्यते प्रतिदिनं वित्तस्य ।

इन्दुमती विदुषि, तेनोपक्रमतेमध्यवर्गस्य लोपः । नीवीपति संख्याप्यपचीयते । किमवलम्ब्य वैषम्य प्रणालिं नीवीवादिनः प्रमाणयन्तिभो !!

सुरेशः धर्म एवालम्बते वैषम्यम् ।

इन्दुमति धर्मं प्रति विप्रतिपन्ना बहुविदः केचिदन्यं धर्ममाहु केचिदन्यम् । सोऽयमविचार्य प्रवर्तमानो विहन्येत, अनर्थं चप्राप्नुयात् ।

सुरेशः धर्मः प्रसिद्धोवा स्यादप्रसिद्धोवा । सचेत् प्रसिद्धः नजिज्ञासितव्य अथा प्रसिद्धः नतराम् ।

(*मुरारि गोपालौ विहाय सर्वे हसन्ति*)

मुरारिः (*सगर्वम्*) अवलीयान् वलीयां समाशंसते धर्मेणेति निवृत्ति सर्वेसम धिगच्छन्तु । परिवर्तिनिसंसारे वन्धनं निरस्य निरर्गलो भूत्वा उच्छृङ्खलत्वं समधिगम्य तमपि

निराकृत्या नुशासनं पुनः समाजः स्वीकरोति । यथा काल चक्रं भ्रमति समाज स्तथैव सञ्चरति ।

माया युज्यते

इन्दुमती सत्यम् । समाजस्य स्वरूप मधीत्य वर्तितव्य मासीत् । कानीना व्यासकर्ण खिष्ट प्रभृतयोऽपि समाज मुद्धरन्तीति स्मर्तव्य मासीत् । किन्तु प्रगतिं रोद्धुं वस्तुतत्त्वसन्यथाकर्तुं प्रयतते संस्कृतिः ।

(माया किमपि व्याजेन वहि र्गच्छति)

गिरिशः वत्से, भवती विवादेऽवसरमादत्ते चेदामन्त्रि तानां सत्कारः कथंसंजायेत ।

गोपालः (ससंभ्रमम्) गन्तव्यमन्यत्रापिविद्यते । शम्पे, त्वंवस । अहंसत्त्वरमा गच्छामि ।

गिरिशः भोजनं कृत्वा गम्यताम् ।

गोपालः गृहे भुक्त्वैव समागतोऽहम् । त्यजतुमामार्यः ।

मुरारिः गोपालेन सह गत्वा भोजनसमये पुनः समागच्छानि ।

(द्वौ उत्थाय प्रणम्य गच्छतः)

सुरेशः मदिरायाः नामश्रुत्वा पलायितौ भवतः । (हसति)

शम्पा (सस्मितम्) तथैवसंभावयामि ।

गिरिशः गम्यतां प्रबन्धं निभालयितुम् । समयोऽपि संजातः । त्वर्यतां वत्से ।

इन्दुमती (सुरेसं प्रति) सहाय्य दानार्थं मामन्त्रये भवन्तम् ।

शम्पा अहमपि समागच्छामि ।

सुरेशः (सस्मितम्) स्थियतां चात्रभवती, अलमायाशेन ।

(सुरेशेन्दुमत्यौ गच्छतः)

(मार्गे गोपालोमुरारिणा सहवदति)

गोपालः भणतु, भवान् । किमहं तेषांमुपहास्यः किमर्थं सदैव मामुपहसन्तितते मूर्खा मनुष्य रूपिणो मृगाः ।

मुरारिः सत्यं एषदोष स्तेषाम ।

गोपालः (सगद्गदम्) गुरुजनेषु गौ···गौ···गौरवम्, । वयो वृद्ववृद्ध जनान् प्रति य···य···यथोचित सन्···मा··· मान प्रदर्शनं, तेषां मामा मा ज्ञानु वर्तित्वं, सूसूसू नृतेन व···व वचसा तैः संलाप तदन्तिके चा चा चा पल्प प प प रिहारः एकस्य दुः दुः दुःख मपरेण स्व स्व स्व स्वमिव परि गणनीयमय् एतत्सर्वं ममममपगतम् आ आ आ धुनिकेषु युवके के केषु (मुरारिं प्रति) ससत्यं भणतु भवान् । शोभायैकेवलं धृतानि मया श्मश्रूणि (श्मश्रूणि दर्शयति) किं बालकैः सह क्रीडमादेव व्यतीता मेषट्चत्वारिंशद् हायनाः पश्यतु श्वेतानि लोमानि (शिरो दर्शयति)

मुरारिः कोवदति तथा । अनुभव सूचकानि लोमानिश्मश्रूणिच।

गोपाल: सदैव मदिराया नाम जप्त्वा उपहसन्ति । सत्यम् पि···पि पिशुन चेतसि साधुवृत्ते व्यवहरण तेषामसाधु-वृत्ते रेव सहायकं यथा भुजग शिशुभ्यो दुग्ध दानेन ।

(इत्थं विवादंविधाय उद्यानात्तौवहि र्गच्छतः)

गिरिश: प्रिये, कृतं मया निर्मक्षिकम् ।

शम्पा (सकटाक्षम्) कीदृश श्चतुरः ।

गिरिश: *(आकृष्य आलिङ्गितुं हस्तौ गृह्णाति)*

शम्पा मुञ्चतावन् माम् । मुञ्च, कोऽपि समागच्छेत ।

गिरिश: मोक्ष्यामि ।

शम्पा (सलज्जम्) कदा ?

गिरिश: सुन्दरि !

(सहसा माया प्रविशति, तथा विलोक्य माया निर्गन्तु मिच्छति गिरिशः शम्पां सहसा परित्यज्य सवैलक्ष्यंतिष्ठति

(जवनिकापतति)

'आकाशे गीतं श्रूयते'

धनिनो निन्दन्ति निःस्वान् निस्वाश्चद्विषन्तिहिधनिनः;
तेन जाता नाना वादाः ।
कम्युनिज्म, सोसलिज्म फासिष्टवादाः
साम्राज्यगान्धिजनतन्त्रवादाः ।
भुवनंव्याप्तं भौतिक मुख्यै र्विविधैर्वादै भुवनं व्याप्तम्

रोषण दोषण शोषण रूपैः । धनिनो०
नास्तिकतायै भौतिकवादोऽनुदिनमशान्तेर्वृद्धिर्जाता ।
अध्यात्मवादो भुवने शान्त्यै तस्माद्यत्न स्तस्मिन्कार्यः ।
नास्ति विनातं नास्ति विनातं नास्ति विनातं भुवने शान्ति ।
मानव ! तस्मिन्माकुरु भ्रान्तिम् ।। धनिनो०

(औषधालयस्य दृश्यम् । रुग्णारमा शय्यायां सुप्ता)

(समीपेस्थितो मुरारिःपृच्छति)

मुरारिः *(सवैलक्ष्यम्)* मधुरया वाचो किमर्थं माम् प्रतारयसि।

रमा *(सानुरागम्)*भवन्त मपहाय संसारे मम कोविद्यतेऽधुना

मुरारिः चन्द्रचूडोजीवत्येव ।

रमा पितृ स्थानीयो ममैषः । अहोरात्रंरुग्णाया मम सेवां कृत्वाऽत्रैवगृह वुद्धिवध्नाति *(वैलक्षण्यं निरूप्य)* विमनायसेकिमर्थम् ।

मुरारिः *(निःश्वस्य)* अयत्नेनैवहतविधिना पृथक्कृतोऽस्मि ।।

रमा *(सास्रम्)* असाध्योऽयं मे रोगः ।

मुरारिः सत्यव्रते, त्वमसि रूग्णा कथंतेप्रियमाचरामि । यदि चन्द्रस्य हस्ते निक्षिप्य कुत्रापि गत्वा श्वसिमिचेत् ते मनोरथाः पूर्यन्ते, वद, किमत्रक्रियते ।

रमा सर्वथा स्थातव्यं मयातवनियोगे । मेधाविन्, मृदुनि मनसि तमसः प्रसरं दातुं नात्यर्थ मेवार्हसि । हृदये

ऽन्यथा कृत्वा मन्त्रयसे। (*साञ्जलिबन्धम्*) मयि त्यज-त्वविश्वासम्। कुलकलत्रमस्मि चारित्रधना। सती-नारी संसारं संधारयति। (*रोदिति*)

मुरारिः (*सबाष्पम्*) किमर्थं निर्धनं मां खेदयसि, तापयसि, दुःखयसि पोडयसि विह्वलयसि। शरीरे शक्तिर्न वर्तते। गेहे धनं नविद्यते। किं करोमि, क वागन्त-व्यम। एकत्र धनिनः कुक्कुरेभ्यः पर्याप्तं मांसौदनं भोजयन्ति। मानवाः वयं क्षुत्क्षाम कण्ठा अनया दिशा कालं नयामः।

रमा भारभूताऽस्मि भवतः। येनाद्यापि निष्ठुराः प्राणाः नप्रतिष्ठन्ते।

मुरारिः सर्वथा तवदुःखस्य मूलकारणमहमेवास्मि वृथैव मृतं मां मारयसि। (*सबाष्पकठं तूष्णीं विचारमग्नंभवति*)

(*हस्ते विद्युत्किरणचित्रं गृहीत्वा चन्द्रचूडः प्रविशति*)

रमा (*सबाष्पं नयनेनिमीलयति*)

मुरारिः चन्द्रचूड, रमातवे हस्ते विद्यतेऽहंगच्छामि। (*सह-सोत्थायनिर्गच्छति*)

(*रमा रोदितुं प्रवृत्ता*)

चन्द्रचूडः जाते, धैर्यमवलम्बस्य, धैर्यं हि महतां लक्षणम् चिन्तां माकार्षीः चिन्ता सजीवं दहति। अद्यावधिस्तु

जीवति भद्रे, तवासौभ्राता। (मुखं सास्रं करोति)

रमा जानामि भवतोवात्सल्यम्। कोरोगोनिर्धारितः।

चन्द्रचूडः चित्रेणा नेनन निर्धारितोरोगः।

रमा (चित्रं गृहीत्वा) गृहे मण्डं पातु मसमर्था वयं पदे पदे रूप्यकाणि व्ययीकृत्य बहु मूल्यसाध्य मौषधं कर्तुं कथं शक्नुमः।

चन्द्रचूडः वत्से (ललाटस्थस्वेदविन्दून् तस्याः प्रमृज्य) रूप्यकचिन्तां त्यज्य। स्वात्मानं विक्रियापि तवौषध्यर्थं मूल्यमुपकल्पयामि।

रमा भ्रातः प्राणाधार, निष्कारणैकबन्धो! (चैलाञ्चलेन मुख मावृत्यरोदिति)

(माया प्रविशति)

माया (चन्द्रं प्रणम्य उपविश्यच) सखि, कीदृशीतेऽवस्था।

चन्द्रचूडः (मन्दम्) अद्य बहु शोणितंविद्यते। (उच्चैः) रमे! त्वां द्रष्टुं मायासमागता। भगिनी, इव माया त्वां स्निह्यति।

माया (जनान्तिकेकिमपिवदति, चन्द्रः सशिरःकम्पंस्वीकरोति) निरूप्य) अद्यतवमणिबन्धे घटीयन्त्रं नपश्यामि।

रमा (सवाष्प कण्ठम्) तदेवविक्रीय औषध मानीतंभवेत्।

चन्द्रचूडः (सस्मितम्) नाडी घटीयन्त्रा भावात् नमे कार्यं रूद्धं

स्यात्।

माया पित्रा मरण समये दत्तं स्मृतिमूलं वस्तु विक्रीयापि त्वामुपास्ते!

रमा (रुदित्वा) त्यजमयि स्नेहमेतादृशम्। (तन्द्रया लोचनेनिमीलयति)

(आनीय इन्दुमतीं निकटतमायां खट्वायां स्थापयन्ति)

माया (साश्चर्यं चन्द्राय दर्शयित्वा) पश्य भो! किमर्थमानीता इन्दुमती। (ससंभ्रमम्) आः कस्मात्? कस्तेरोगः किमर्थमानितासि मानिनि,

इन्दुमती कारागारात् आनीतास्मि।

माया अत्यन्तमेव कृश शरीरा असि। हला, केवलं लावण्य मयीछाया त्वां नमुञ्चति।

इन्दुमती छायैव केवलंनमुञ्चतिमाम्। अधुना सर्वेऽन्येत्यजन्ति। सत्यम् भणसि प्रिये,। भवतु। (विचार्य) पवित्रकर्मण्यपि नीवीवादे न्यायविदः दोषं व्याहरन्ति।

माया (सास्रम्) सर्वथा अन्याय्यमेतत्। अहो! गर्भवर्तीमेनां प्रसह्य कारायां कथंसमाजो मर्षति।

चन्द्रचूडः सुरेशस्य दशा कीदृशी वर्तते!

इन्दुमती श्रुत्या किं कुरुथो युवाम्। सोऽपि मृत्यु शय्यायां शेते। कारागारे यातनां द्विष्ट्वा ततोऽपि यातनामये कालकोष्ठे

स्थापितोऽस्ति। तं दृष्ट्वा कस्य हृदयं सहस्रधैव नस्फुटति।

माया महद्दुःखे वर्तते, धिक्कष्टम्। सखि; जानामि सर्वम्।

इन्दुमती नहिजानासि त्वमार्ये, वयंस्वल्पे कारा गृहे वर्तामहे। यूयंमहति कारागारे वर्तध्वे, एतावानेवविशेषः।

चन्द्रचूडः प्रियसखि, प्रजातन्त्रे राजबन्दिनो न तथा निर्यातयन्ति यथाधिनायक शासने साम्यवादे। तत्रतु गत्वा नसपुनरावर्तते। गणतन्त्रे गत्वा प्रतिबारं प्रति निवर्तन्ते। तथा ह्यधुना येषां हस्ते देशस्य भाग्यनिर्णय कारिणी शक्तिर्विद्यते ते राष्ट्रकर्णधारा प्राग् बन्दिन आसन्।

इन्दुमती देशप्रेम राजद्रोहश्च एकाया मुद्राया नीचोर्ध्वस्थितं चिन्ह मिवसंभावयामि।

माया शोचनीया दशा सुरेशस्य वर्तते कथं प्राणिति ?

इन्दुमती अनशन शायिनो हृदयस्थितजीवनाशस्य तस्य भरणं प्रकृतिः जीवितं विकृतिः। (*निःश्वसिति*)

माया हाधिक्। अनशनं करोति सुरेशः। हठं विमुञ्च इति संदेशं प्रेषय।

इन्दुमती (*सास्रं मूर्ध्वं विलोक्य, सनिर्वेदं निःश्वस्य*) महात्मा ससिद्धान्तं समाश्रित्यमर्तु मिच्छति। किमर्थं तं सिद्धान्तात् विचालयामि। तथाहि 'कृष्यां दहन्नपि

खलुक्षितिमिन्धनेद्धोबोजप्ररोह जननींज्वलनः करोति'
(वाष्पकण्ठी भवती)

माया (सवाष्पकठम्) पश्य प्रिये, त्वया यथोपपादित मुपन्यासे तथैवसंजातम्। (रमां दर्शयति)

इन्दुमती (संस्मृत्य) अहो ! तथैव संजातम्। ममोपन्यासस्यान्तिमाध्यायं पूर्णकृत्वा कःकिल प्रकाशयिष्यति।

मोया यथाज्ञान मुपसंहरामि। त्यज चिन्ताम्।
(परिचारिके आगत्य इन्दुमतींनयतः शनैःशनैः माया च पृष्ठे गच्छति)

चन्द्रचूडः (मन्दंमन्दम् मुहुर्मुहुः पठति)
"पावकस्यमहिमा सगण्यते, कक्षवज्ज्वलति सागरेऽपियः"

रमा (उन्मील्यनयने) मरणाच्चमेजीवितमेवास्मिन् समये साहसम्।

चन्द्रचूडः वत्से, इन्दुमती मरणासन्ना अत्रानीतासीत्।

रमा (अबुद्ध्वा) का ?

चन्द्रचूडः (उच्चैः) इन्दुमती

रमा (सघृणम्) नामापि गृह्णतोस्या पापमलेनलिप्पत इव जिह्वा प्रागेव किमर्थं नावादीः।

चन्द्रचूडः जाते, किमर्थं कुप्यसि ?

रमा यया ममैतादृशीदशा विहिता।

चन्द्रचूडः निर्धनानां कृते ते स्वजीवनं शरीरञ्चबलि मुपहरन्ति ।

रमा (सखेदम्) सर्वं जानामि रहस्यम् । भवतु । अतत्त्वदर्शिनी भवतिमतिः तादृशाम् ।

चन्द्रचूडः मुरारिः कतिवादन समये प्रतिनिवर्तते ।

रमा (सास्रम्) नसपुनरावर्तते । स्यात् मम मरणावधिश्चेयं यात्रा । (मूर्च्छां नाटयति)

चन्द्रचूडः धिक्धिक् पिशाचोऽपि क इदमाचरेत (तस्याः शिरसि जलंप्रक्षिप्य पटान्तेन वीजयति)

(जवनिका, पतति)

* * * *
समाप्तम् *
* * * *